आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्
आरा (विहारः)

चतुस्त्रिंशं वर्षम्-प्रथमोऽङ्कः
मार्च 2026

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् द्विशतं (200) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् एकशतं (100) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**neelmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. 'आरण्यक'सम्बद्धा सर्वविधा जिज्ञासा **प्रो. गोपबन्धु मिश्रः, नीलकण्ठ अपार्टमेंट, रवीन्द्रपुरी एक्स्टेनसन, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email- **gopabandhuh@gmail.com**
    **aranyakam94@gmail.com** इत्यनयोरन्यतरेण सङ्केतेन विधातव्यः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता


वर्षाङ्कौ - चतुस्त्रिंशं वर्षम् - प्रथमोऽङ्कः

**चैत्रः, वि.सं. २०८३**

**मार्च २०२६**


**प्रतिवर्षं प्रकाशनकालः**

**चैत्रः, आश्विनः-विक्रमाब्दः**

**मार्च, सितम्बर**

*प्रत्यङ्कम् - 100 रूप्यकाणि* *वार्षिकं शुल्कं 200 रूप्यकाणि*

**परामर्शदात्री समितिः**
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
पूर्वसंस्कृतविभागाध्यक्षः
काशीहिन्दूविश्वविद्यालयः, वाराणसी
पूर्वकुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) ८02301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

अस्तीति सत्, नास्तीति असत्। सदसतोः एककालावच्छेदेन समानाधिकरणं न शक्यते। गीतायां श्रीभगवान् उवाचापि–

**नासतो विद्यते भावो नाभावो विद्यते सतः।** (गीता 2/16)

अत्र 'अस्' भुवि इति धातोः 'सत्–असत्' इत्युभयोः शब्दयोः निष्पत्तिः, किं च 'भू' सत्तायाम् इति धातोः घञि 'भावः' इत्यस्य निष्पत्तिः इति उभयोरपि धात्वोः तुल्यार्थकतायां सत्यां केवलं विषयस्पष्टतादृष्ट्या तादृशोरुभयोः प्रयोगो गीतायां दृश्यमानोऽस्तीति कथयितुं शक्यते। व्यावहारिकजीवने शतृ–प्रत्ययान्तयोः सदसतोः शब्दयोः (अस्+शत् = सत्) विशेषणरूपेण बहुधा प्रयोगः विद्यते। तद्यथा–

**नासदासीत् नो सदासीत्।** (ऋग्वेदः 10/12) इति

नासदीयसूक्ते, 'तत् सत्' इति ब्रह्मस्वरूपकथनावसरे, सद्रूपेण प्रतिभासमानं जगत् वस्तुतः 'ब्रह्म सत्यं जगन् मिथ्या' इति तात्त्विकदृष्ट्या असदिति हेतोः 'सदसद्भ्याम् अनिर्वचनीयम्' इति वेदान्तदर्शनसिद्धान्ते सदसतोः नपुंसकलिङ्गे प्रयोगः दृश्यते।

**दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।**
**मणिना भूषितः सर्पः किमसौ न भयङ्करः॥** (नीतिशतकम्)

इति सुभाषिते 'सन्' इति पुंलिङ्गे प्रयोगः,

**तथा समक्षं दहता मनोभवं**
**पिनाकिना भग्नमनोरथा सती।** (कुमारसम्भवम् 5/1)

इत्यत्र 'सती' इति स्त्रीलिङ्गप्रयोगः परिलक्ष्यत एव।

साक्षात्कृतधर्माणो ये ऋषयो मनीषिणः साधवश्च भवन्ति, ते वस्तुतः सत्त्वतत्त्वयोरन्तिके भवन्तीति हेतोः।

**मनसि वचसि कार्ये पुण्यपीयूषपूर्णा-**
**स्त्रिभुवनमुपकारश्रेणिभिः पूरयन्तः।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥** (नीतिशतकम्)

इत्यत्र यत् 'सन्तः' इति पदं प्रयुक्तम्, तदेव उत्तरकाले हिन्दीभाषया 'सन्त' (महात्मानः) इति सञ्जातम्, तद्वत् मठमन्दिराधिपतयः यद् हिन्द्यां 'महन्त' इति पदेन उच्यन्ते, तत् पदं संस्कृतस्य 'महान्तः' इति पदस्य लौकिकः प्रयोगः अस्ति।

तात्पर्यमिदमत्र यत् वैयाकरणव्युत्पत्त्या केवलं गच्छति इति गच्छत्, पठति इति पठत् इतीतरशतृप्रत्ययान्तशब्दवत् यत् अस्तीति 'सत्' इति शब्दः विशेषणतया वर्तमानकालिकीं सत्तां 'भावदशां' वा बोधयति, तत् शब्दस्वरूपम् 'असत्' इति प्रतिरूपेण सह महतो दार्शनिकविमर्शस्य आधाररूपतां प्राप्तवदस्ति। तेन कारणेन लोके 'सन्तः' अर्थात् सत्पुरुषाः सज्जनाः महान्तो वा

एव बोध्यन्ते, न तु केवलं जीवसत्ताधारिणः सामान्याः जनाः। तादृशानां 'सत्' इति पदवाच्यानां जनानां मानसिको वाचिकः कायिकश्च स्तरः सामान्यजनगतेभ्यः तेभ्यः ऊर्ध्वभागे भवति इत्यतः समाजे ते 'सन्तः' परमश्रद्धास्पदाः सुतरां पूज्याः नमस्याः अनुसर्तव्याश्च भवन्ति। वैयाकरणसिद्धान्त-कौमुद्याम् 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' इति सप्तमीविभक्तिविधायकस्य वार्तिकस्य उदाहरणप्रस्तुत्यवसरे सताम् अर्थात् सज्जनानां किं च तद्विपरीतानाम् असताम् असाधुपुरुषाणां द्वारा आचर्यमाणाः क्रियाः अपि तयोः सदसतोः तत्तत्क्रियाकर्तृत्वदृष्ट्या अर्हतां अनर्हतां च विनिश्चेतुं समर्थाः इति उपस्थापितमस्ति, तद्यथा–

**सत्सु तरत्सु असन्तः आसते,**

अथवा **असत्सु तिष्ठत्सु सन्तः तरन्ति।**

अत्र **तरण**क्रिया सतामेव कृते उचिता, न तु असताम्। तथैव **स्थान**क्रिया असतामेव कृते उचिता, न तु सताम् इति भावः। अतः तदाधारेण सन्तः तरणे अर्हाः, असन्तः च स्थाने अर्हाः इति स्पष्टीकृतो व्यापारो विद्यते। तत्त्वबोधिनीकारोऽपि अत्राह–

**यस्यां क्रियायां ये उचिताः, ते अर्हाः।**

क्रियौचित्यदृष्ट्या अर्हतानिर्धारणकारणेन पूर्वोक्तवाक्यद्वयस्य विपरीतवाक्यद्वयमपि तत्रैव निर्दिष्टम्, यत्र क्रियानौचित्येन तरणं कुर्वाणाः असन्तः 'अनर्हाः' इति दर्शिताः, तद्यथा–

**सत्सु तिष्ठत्सु असन्तस्तरन्ति** (सतां हि तरणम् उचितम्, किन्तु अस्मिन् वाक्ये तादृशानां सताम् अकर्तृत्वे सति तत्र सप्तमी)। अथवा **असत्सु तरत्सु सन्तस्तिष्ठन्ति** (अत्रापि असतां तरणम् अनुचितम् इति वक्तुमद्दिष्टमस्ति, तादृशानाम् अनर्हाणां कर्तृत्वदर्शनात् तत्रापि सप्तमीति भावः)।

अत्र तरणं क्रिया जन्ममरणबन्धनात् पारे तरणम्, तत्र सतां क्रियाशीलता, किं च जन्ममरणबन्धनबद्धानाम् 'असतां' स्थानम् अवस्थानं बन्धनं वेति बोद्धव्यम्।

**सतः स्वरूपाणि**

सतोऽपि स्वरूपं द्रष्टृद्रष्टव्यादिभेदैः भिद्यते।

**श्वोभावा मर्त्यस्य यदन्तकैतत्**

**सर्वेन्द्रियाणां जरयन्ति तेजः।** (कठोपनिषद् 1.1.26)

इत्यादिनित्यानित्यविवेकप्रचोदितं नचिकेतसो वचनं श्रुत्वा आयुषा बालेऽपि नचिकेतसि सत् 'धीर'स्वरूपं पश्यति यमराजः–

**श्रेयश्च प्रेयश्च मनुष्यमेत-**

**स्तौ सम्परीत्य विविनक्ति धीरः।**

**श्रेयो हि धीरोऽभि प्रेयसो वृणीते**

**प्रेयो मन्दो योगक्षेमाद् वृणीते।।** (कठोपनिषद् 1.2.2)

'मन्त्रेऽस्मिन् प्रथमपुरुषरूपेण उच्यमानोऽपि जनः नान्यः अपितु योगक्षेमाद् प्रेयः वरयितुकामात् ऊर्ध्वं विद्यमानः श्रेय एव विवेक्तुं समर्थः त्वं नचिकेतः धीरोऽसि' इति मृत्योरुक्तेः तात्पर्यं स्पष्टमेव।

एवमेव गीतायाम् आदौ विषादयोगे पार्थस्यार्जुनस्य मुखात् विषादजन्यानि किं च

पलायनपराणि वचनानि श्रावं श्रावं श्रीभगवान् तदा तन्मुहूर्तावच्छिन्ने काले विश्वस्य सर्वश्रेष्ठे धनुर्धरे अर्जुने सत् 'क्लीब'रूपं पश्यन् एवं वक्तुं प्रभवति–

**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।** (गीता 2.3)

तदानीं ताटस्थ्येन विषण्णम् अर्जुनं पश्यता श्रीकृष्णेनैव तस्य तत्कालदेशगतपरिस्थिति-जन्यं सदेव क्लीबत्वं द्रष्टुं शक्यम्, न तु तत् अर्जुनेन स्वयं स्वगतं तद् अवगतम्, न तु श्रीकृष्णाद् भिन्नेन अपेरण केनचित् तद् विज्ञातुं शक्तम्।

धनुर्भृत् कश्चित् राजा अरण्यं प्रविशन् मृगादिजीवेषु निर्दयो भूत्वा तद्धनने प्रवृत्तो भवतीति सामान्येयं स्थितिः। किन्तु रघुवंशे गोः नन्दिन्याः सेवां कुर्वाणो राजा दिलीपः ताम् अनुसरन् दावं तदा प्राविशत् यदा सः धनुर्भृत् तु आसीत्, किन्तु तदवस्थायां तत्र विद्यमानेऽपि तस्मिन् हरिण्यः विशङ्काः आसन् यतो हि तस्मिन् एकः सत्स्वरूपो दयार्द्रभावः आसीदिति वर्णयति महाकविः कालिदासः–

**धनुर्भृतोऽप्यस्य दयाऽऽर्द्रभाव–**
**माख्यातमन्तःकरणैर्विशङ्कैः।**
**विलोकयन्त्यो वपुरापुरक्ष्णां**
**प्रकामविस्तारफलं हरिण्यः।।** (रघु. 2.11)

तदानीं राज्ञो दिलीपस्य एषा दयार्द्रवृत्तिः स्वयं तेन नानुभूता स्यात् किं चापरेण गोमृगादिभिः विमृष्टा न स्यात्, किन्तु तटस्थदृष्ट्या महाकविना तत् सत्स्वरूपम् यद् अदर्शि तत्र कवेः सूक्ष्मेक्षकम् अवेक्षणमेव हेतुः।

एवमेव तत्र वसिष्ठधेनोः नन्दिन्याः सेवायै वनं गते राज्ञि दिलीपे नन्दिन्या सह तस्य राज्ञः सायम् आश्रमं प्रति प्रत्यागमनकालं यावत् राज्ञी सुदक्षिणां किं करोति अथवा तस्याः गवा सह राज्ञः आगमनप्रतीक्षा कीदृशी आसीत् इति वर्णयन् महाकविः वदति 'निमेषालसपक्ष्म-पङ्क्तिः सा' आसीदिति–

**वसिष्ठधेनोरनुयायिनं तम्**
**आवर्तमानं वनिता वनान्तात्।**
**पपौ निमेषालसपक्ष्मपङ्क्ति-**
**रुपोषिताभ्यामिव लोचनाभ्याम्।।** (रघु. 2.19)

अर्थात् भर्तरि गोसेवायै वनं प्रयाते आदिनं विश्रान्तिं स्वीकर्तुं शक्तापि राज्ञी सुदक्षिणा स्वयमपि व्रतमाचरन्ती निरन्तरमनलसैव आसीदिति तस्याः तत् सत्स्वरूपं महाकविः पश्यन् प्रवर्तते।

एवमेव कठोरं द्वादशवर्षावधिकं वनवासं भ्रातृभिः जायया च सह यापयन् युधिष्ठिरः कुटिले शत्रौ दुर्योधने इदानीमपि अकौटिल्यमेव आचरतीत्यतः सः 'मूढधीः' इति तस्य यत् स्वरूपं सदस्ति तत् परोक्षवचनेन तमेव सूचयति याज्ञसेनी द्रौपदी–

**व्रजन्ति ते मूढधियः पराभवं**
**भवन्ति मायाविषु ये न मायिनः।**

**प्रविश्य हि घ्नन्ति शठास्तथाविधा-**
**नसंवृताङ्गान्निशिता इवेषवः॥** (किरातार्जुनीयम् 1/30)

शिवनिन्दनं कुर्वन्तं किं चेतोऽप्यधिकं तत्कर्तुकामं स्फुरितोत्तराधरं बटुं तत्कर्मणः निवर्तयन्ती पार्वती तस्मिन् बटौ महतोऽपभाषणजन्यं पापभाक्त्वं पश्यन्ती भवति–

**निवार्यतामालि किमप्ययं बटुः**
**पुनर्विवक्षुः स्फुरितोत्तराधरः।**
**न केवलं यो महतोऽपभाषते**
**शृणोति तस्मादपि यः स पापभाक्॥** (कुमारसम्भवम्, 5/83)

नेदं विशिष्टं सत्स्वरूपाकलनं सर्वथा ताटस्थ्येन प्रवर्तमानं भवति, तत्तु मनीषिभिः आत्मतत्त्वदर्शिभिः स्वयमपि आत्मनि अपरैः अदृश्यमननुभूतमपि अनुभवगम्यं सत् स्वरूपं प्रकाश्यतेऽपि। तद्यथा भगवत्पादेन आद्यशङ्कराचार्येण आत्मनि मनोबुद्ध्यादिषु विद्यमानेष्वपि तन्निषिध्य आत्मनः चिदानन्दरूपं शिवं सत्स्वरूपं सम्यक्तया वर्णितमस्ति, तद्यथा–

**मनोबुद्ध्यहङ्कारचित्तानि नाहं**
**न च श्रोत्रजिह्वे न च घ्राणनेत्रे।**
**न च व्योमभूमी न तेजो न वायुश्**
**चिदानन्दरूपः शिवोऽहं शिवोऽहम्॥** (निर्वाणषट्कम्, 1)

एतेन एतत्तु विज्ञायते यत् 'एकं सद् विप्रा बहुधा वदन्ति' इत्युक्त्या तत् पारमार्थिकं सत् तु एकमेवाद्वितीयं विद्यते एव, किन्तु नानादेशकालाद्यवच्छेदेन अनुभूयमानानि उत अनुमीय-मानानि सत्स्वरूपाणि नानाविधानि भवन्ति। किं च तत् सूक्ष्मं गूढ्यं सामान्यतः ज्ञानेन्द्रियग्राह्यम् असदपि आत्मनि यैः अनुभूयते तादृशैः भगवत्पादैः आद्यशङ्कराचार्यतुल्यैः शब्दार्थसाहित्यमुखेन यदभिधीयते तत् अस्मादृशैः पामरैः तेनैव रूपेण ज्ञातुं प्रयत्यते। एवञ्च पूर्वोक्तरीत्या आत्मनः भिन्नेऽपरस्मिन् शरीरे मौढ्य-क्लैब्य-धैर्यादिरूपं सद्रूपेण यत् तर्क्यते तदपि तस्य वक्तुः समीक्षकस्य वा तात्कालिकया सूक्ष्मेक्षिकया निष्पद्यते। इत्येवंक्रमेण आत्मानुभूतम् उत आत्मानुमितं सत्स्वरूपं नानाविधं नानाप्रकारकावेगोद्वेगाशानिराशादिजनकं भवतीति अत्रायं विशेषः।

सम्प्रति 'आरण्यक'मिदं तत्तत् सत् स्वभावतः ईदृक्तया इयत्तया वा अनिर्वचनीयं भवति चेदपि तदेव नानारूपेषु विद्यमानं भवतीति हेतोः शब्दार्थसाहचर्येण शास्त्रशास्त्रान्तरसमीक्षणं प्रवर्त्तेत इत्येतदर्थम् आत्मनः आनुकूल्यं साधयदेवास्ति।

भारतीयमनीषायां शास्त्रगतं तत्तत् सत् स्वरूपं तार्किकदृष्ट्या तर्कसिद्धम् अनुमानप्रमाण-गम्यमिति कदाचित् प्रतीयमानं भवति चेदपि मूलतः तत् सर्वं साक्षात्कृतधर्मभिः मनीषिभिः चिन्तकैः अनुभूयमानमेव प्रवर्तितम् अस्ति। तत्र तत्र तादृशं तथ्यं सम्प्रत्यपि अज्ञातम् अल्पज्ञातं वास्ति चेत् तद् उररीकर्तुं शोधर्थिनः अध्यापकाः छात्राश्च प्रवर्त्तेरन् इति संप्रार्थ्यात्र विरम्यते।

विदुषां वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकम्

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **शब्दकौस्तुभ-उद्द्योतदिशा 'अकथितञ्च' इति सूत्रार्थविमर्शः** | डॉ. लक्ष्मीकान्त मुर्मुः<br>सहायक-अध्यापकः, राणीबाँध-सर्वकारीय-महाविद्यालयः,<br>जिला- वाँकुडा, पश्चिमबङ्गः-722135 | 1-8 |
| 2. | **रामायणस्य सांस्कृतिकी यात्रा-दक्षिण-पूर्व एशिया देशे ( लाओस, म्यांमार, मलेशिया सिंगापुरं च )** | डॉ. देशराजः<br>सहायकः आचार्यः, संस्कृतविभागः<br>कालिन्दीमहाविद्यालयः दिल्ली विश्वविद्यालयः, दिल्ली | 9-18 |
| 3. | **हरिनामामृतव्याकरणे संज्ञाशब्दानां तात्पर्यानुसन्धानम्** | डॉ. अनुप कुमार रानो<br>सहकारी-आचार्यः, चण्डीदास-महाविद्यालयः, खुजुटिपाडा, बीरभूमः<br>पश्चिमबङ्गः- 731215 | 19-40 |
| 4. | **परमाणुवादखण्डनप्रसङ्गे वेदान्ते आत्मतत्त्वसिद्धिः** | डॉ. राजेश प्रामाणिकः<br>अतिथ्यध्यापकः, संस्कृतम्<br>हैदराबाद विश्वविद्यालयः | 41-48 |
| 5. | **प्रणवोपनिषदः तात्त्विकानुशीलनम्** | *डॉ. प्रमोद कुमार सिंहः<br>**डॉ. अवनीन्द्र कुमार पाण्डेयः<br>*मैत्रीय म. वि. दिल्ली<br>**रामवचन सिंह राजकीय महावि. मऊ | 49-59 |
| 6. | **किञ्चिद् रामायणीयम्** | | 60 |
| 7. | **सांख्यसप्त्याः जयमङ्गलाटीकायाः रचयितुः शङ्करस्य प्रसङ्गे पण्डितानां मतानैक्यम् - एकं समीक्षणम्** | डॉ. सूरज रायः<br>सहायकाचार्यः (संस्कृतम्)<br>मानविकीविद्यापीठम्<br>इन्दिरा गान्धी राष्ट्रीय मुक्त विश्वविद्यालयः<br>मैदान गढ़ी, नई दिल्ली-110068 | 61-69 |

| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 8. | **किञ्चिद् रामायणीयम्** | | 70 |
| 9. | **सिद्धसिद्धान्तपद्धतौ परमपदम्** | पुलक दासः<br>अनुसन्धाता, सांख्ययोगविभागः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः<br>तिरुपतिः | 71-82 |
| 10. | **मीमांसादर्शनानुसारम् अपूर्व-तत्त्वम् : एकं संक्षिप्तं विश्लेषणम्** | *डॉ. सुप्रिय रायः<br>**डॉ. सोमनाथदासः<br>*सहायकाध्यापकः, संस्कृतविभागः कान्दिराजमहाविद्यालयः<br>**सहा. अध्यापकः संस्कृतम् आशुतोषमहाविद्यालय, कोलकता | 83-88 |
| 11. | **महर्षिपाणिनेः तन्त्रस्य समन्वय-वादिनी दृष्टि** | कु. दामिनी राय<br>शोधच्छात्रा, संस्कृतविभागः<br>कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः<br>वाराणसी। | 89-95 |
| 12. | **किञ्चिद् रामायणीयम्** | | 96 |


*

# शब्दकौस्तुभ–उद्द्योतदिशा 'अकथितञ्च' इति सूत्रार्थविमर्शः

**डॉ. लक्ष्मीकान्त मुर्मुः**

पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति उच्यते, पाणिनि–कात्यायन–पतञ्जलिभिः त्रिभिः मुनिभिः कृतकत्वात्। तस्य मूलं भवति पाणिनीयसूत्रात्मकः अष्टाध्यायी इति ग्रन्थः। पाणिनीयसूत्राणाम् अष्टाध्यायीग्रन्थस्य वा बहवः व्याख्यानग्रन्थाः लभ्यन्ते, तेषु एकः भवति श्रीमद्भट्टोजिदीक्षितस्य शब्दकौस्तुभः इति ग्रन्थः। ग्रन्थोऽयम् अष्टाध्यायी इति ग्रन्थस्य व्याख्यानग्रन्थः। परन्तु मूलतः फणिभाषितस्य अर्थात् श्रीमत्पतञ्जलेः महाभाष्यम् इति ग्रन्थस्य सारभूतः ग्रन्थः।

तथा च वैयाकरणभूषणसारे–

**फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।** इति।

श्रीमत्पतञ्जलेः मुख्यतमा कृतिः महाभाष्यम् इति। महाभाष्यं न केवलं संस्कृत-व्याकरणवाङ्मये विषयभाषाशैलीदृष्ट्या मुख्यस्थानं भजते अपि तु सम्पूर्णसंस्कृतवाङ्मये तस्य प्राधान्यमनस्वीकार्यम्, तस्मात् महाभाष्यं दार्शनिकग्रन्थेषु अन्तर्भवति। अस्य एव व्याकरणमहाभाष्यस्य सर्वजनप्रसिद्धा टीका श्रीमत्कैयटस्य प्रदीपटीका। श्रीमन्नागेशः प्रदीपटीकायाः उद्द्योत इति टीकां विरचितवान्। तदेव सम्प्रदाये महाभाष्यस्य प्रदीपोद्द्योतटीका इति नाम्ना सुप्रसिद्धा, कालः प्रायः अष्टादशशतके आसीत् इति अभिप्रायः। उद्द्योतटीका वस्तुतः न केवलं प्रदीपटीकायाः व्याख्यानग्रन्थः अपि तु महाभाष्यस्य गूढार्थप्रतिपादनकाले भाष्यस्य प्रकृतम् आशयं, अतिरिक्तदार्शनिकतत्त्वं, प्रक्रियांशस्य विचारं च सम्यग्रूपेण स्पष्टयति श्रीमन्नागेशः तस्य उद्द्योत इति टीकायाम्। प्रदीपव्याखानज्ञानं विना उद्द्योतज्ञानं नैव सम्भवति इति तु सुप्रसिद्धमेव। तेन इदं बोद्धुं शक्यते यत् महाभाष्यम् इति शब्दशास्त्रे सन्तरणं प्रदीपोद्द्योतं विना नैव सम्भवति। शब्दकौस्तुभः ग्रन्थः अष्टाध्यायीग्रन्थस्य व्याख्यानग्रन्थः, अपरं च उद्द्योत इति टीका अष्टाध्यायीक्रमेण महाभाष्यव्याख्यानग्रन्थस्य प्रदीपटीकायाः व्याख्यानटीका। अतः उभयोः क्रमः समानः,

विषयोऽपि समानः, परन्तु व्याख्याकारौ भिन्नौ, यतो हि शब्दकौस्तुभकारः श्रीमद्भट्टोजिदीक्षितः प्राचीनः, श्रीमन्नागेशभट्टश्च नवीनः। अत्र अवधेयं यत् विषयः समानः परन्तु व्याख्याकारौ भिन्नौ अतः मतभेदः स्यादेव, 'अकथितञ्च (1–4–51)' इति सूत्रस्य, अतः शब्दकौस्तुभ–उद्योतदिशा विशदेन विमर्शयितुं प्रस्तूयते।

अयम् अंशः शब्दकौस्तुभग्रन्थस्य प्रथमस्याध्यायस्य चतुर्थपादस्य तृतीयाह्निकस्य नवविंशतितमे क्रमे आयाति, तथैव महाभाष्ये अपि प्रथमस्याध्यायस्य चतुर्थपादस्य तृतीयाह्निकस्य नवविंशतितमे क्रमे। कर्मकारकस्य कर्मसंज्ञायाः प्रतिपादनकाले कर्मसंज्ञा-विधायकं 'अकथितञ्च (1–4–51)' इति सूत्रं महर्षिणा पाणिनिना प्रणितम्।

**अकथितञ्च ( 1–4–51 )–** 'अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।' नटस्य शृणोति इत्यादौ अतिप्रसङ्गं वारयितुं परिगणनं कर्तव्यम्।

**दुहियाचिरुधिप्रच्छिभक्षिचिञमुपयोगनिमित्तमपूर्वविधौ।**
**ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।**
**नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।**
**द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः।।**[1] इति।

अपि च पुनः शब्दकौस्तुभे – इह प्रछीत्यत्र 'छे च' (अष्टा. सू. 6–1–43) इति तुङ् न कृतः, आगमशासनस्यानित्यत्वात् 'सनाद्यन्ता धातवः' (अष्टा. सू.3-1-32), 'इको यणचि' (अष्टा. सू. 6–1–77) इतिवत्।

उपयुज्यते इत्युपयोगः, मुख्यं कर्म क्षीरादि तस्य निमित्तिं गवादि दुह्यादीनां मुख्यकर्मणा सम्बन्धमानमिति यावत्। तथा ब्रुविशासिगुणेन कारकेण कर्मणेति यावत्, कारकाणां क्रियां प्रति विशेषणत्वात्। तत्रापि कर्मण एव प्रकृतत्वात्। यत्सचते सम्बन्धते। 'षच् समवाये' (भ्वा. उ. 997) स्वरितेत्। केचित्तु परस्मैपदिभिः सहैनं धातुं पठन्ति। षच समवाये, रप लप व्यक्तायां वाचि इति। तन्मते 'षच सेवने' (भ्वा. आ. 163) इत्यासावनुदात्तेतो धातुर्ग्राह्यः, धातूनामनेकार्थत्वात्समवाये वृत्तिर्बोध्या। उभयथापि सम्बध्नातेः कर्मव्यापारे सचिर्वर्तते। अत एव कर्तृपदस्य कर्मपदेनार्थकथनं न विरुध्यते। 'राध्यत्योदनः' इत्यस्य पच्यते इत्यनेन यथा। उभयत्राप्योदननिष्ठविक्लित्तेर्भानाविशेषात्। कविना मेधाविना सूत्रकारेण तदकीर्तितमित्याचरितं व्यवहृतमित्यर्थः। अपूर्वविधाविति। पूर्वोक्तानामपादानादिसंज्ञानां विषयश्चेन्नास्तीत्यर्थः। न चैवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषयेऽतिप्रसङ्गः स्यादिति वाच्यम्, एकसंज्ञाधिकारेण पराभ्यां हेतुकर्तृसंज्ञाभ्यां कर्मसंज्ञाया बाधात्। प्राञ्चस्तु पूर्वग्रहण-

मन्यमात्रोपलक्षणम्। तेन वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषये नातिप्रसङ्गः। सूत्रेऽप्यकथितमिति कथननिवृत्तिपरायणादत्र भूतकालो न विवक्ष्यते। यथा 'पराजेरसोढः' (अष्टा. सू. 1-4-26) इत्यत्रासहिष्यमाणस्याप्यपादानसंज्ञा भवति अध्ययनात्पराजेष्यते इति तथेहापीत्याहुः। तच्चिन्त्यम्, उक्तरीत्या यथाश्रुतेऽपि सर्वसामञ्जस्यात्। 'नीवह्योः' इति श्लोके गत्यर्थानामित्युत्तर-सूत्रोपात्तानामुपलक्षणम्। चकारेण जयत्यादयो गृह्यन्ते इति कैयटः।

माधवोप्याह–

**'जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः।**

**तारेग्रहस्तथा मोचेस्त्यार्जेदार्पिश्च संङ्ग्रहः॥**

**कारिकायाञ्च शब्देन सुधाकरमुखैः कृतः॥'**[2] इति।

अत्र 'अकथितम्' इति शब्दोऽसंकीर्तितपरः। असंकीर्तितत्वञ्च क्वचित् प्रसक्तस्यापादानत्वादेरप्यपादानत्वादिरूपेणाविवक्षितत्वरूपम्। क्वचिच्च सर्वथाऽपादानत्वा-प्राप्तिरूपम्। आद्यम् 'गां दोग्धि पयः' इति। द्वितीयं 'बलिं याचते वसुधाम्' इति। एवञ्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायाम्, सर्वथा पूर्वविधेरप्रसक्तौ चैतत्प्रवृत्तिरिति। यदि अपादानत्वादिना विवक्षा तदा तु पञ्चम्याद्येव। तेन रूपेणाविवक्षा, कर्मत्वेन यदा विवक्षा तदेदं सूत्रं प्रवर्तते इति भावः।

अयं भावः– विवक्षातः कारकाणि भवन्ति, कर्मादिषु निश्चयो नास्ति।

उक्तञ्च– **वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।**

**स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥** इति।

स्थ्याल्यां पचति, स्थाल्या पचति, स्थाली पचति इत्येवमादयः प्रयोगाः भवन्ति। दुहादिषोडशधातुवाच्यव्यापारजन्यफलाश्रयप्रधानकर्मसम्बन्धाकथितकारकस्य कर्मसंज्ञा विधीयते। कर्मयुक्तं धात्वर्थव्यापारात् प्राक् तदनन्तरं वा तत्सम्बन्धत्वम्। तत्र ब्रुविशास्यतिरिक्ते धात्वर्थव्यापारात्प्रागेव तत्सम्बद्धत्वम्। तद्विषये तु तदनन्तरं तत्सम्बद्धत्वं बोद्धव्यम् 'गां दोग्धि पयः' इति। अत्र अपादानत्वेन गोशब्दात्पञ्चमी प्राप्ता, किन्तु अपादानत्वेनाविवक्षया कर्मत्वेन विवक्षया चानेन कर्मसंज्ञा विधीयते। पय इति प्रधानं कर्म। तस्य कर्तुरिति कर्मसंज्ञा। द्रवद्–द्रव्यविभागानुकूलव्यापारो दुहेरर्थः। अत्राप्रधानं कर्म गौरिति। तेन पूर्वोक्तषोडशधातूनां द्विकर्मकत्वम्। अकथितञ्चेति सूत्रविहितकर्मणो गौणत्वम्। पयस्सम्बन्धि-गोकर्मकं दोहनमिति बोधः।

ननु द्विकर्मकधातूनां कस्मिन् कर्मणि प्रत्ययः, इति जिज्ञासायाम्

उक्तम्– **गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।**
**बुद्धिभक्षार्थयोः शब्दकर्मणाञ्च निजेच्छया।।**
**प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।'**[3] इति।

वस्तुतस्तु दुहादिषोडशधातूनां तत्समानार्थकान्यधातूनाञ्च व्यापारद्वयार्थकत्वं स्वीकृत्याकथितञ्चेति सूत्रं न करणीयमिति वदन्ति नव्याः। तथाहि– 'गां दोग्धि' इत्यत्र गौः पयस्त्यजति, गवा पयस्त्याजयति इत्यर्थप्रतीत्या दुह् धातोः द्रवद्–द्रव्यविभागानुकूल-व्यापारानुकूलव्यापारोऽर्थः। एवञ्च नव्यमते प्रधानकर्मत्वं गवादीनामेवेति तत्रैव कर्मणि लादिसिद्धिः। प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानव्यापारस्य शाब्दबोधीयविशेष्यत्वरूपप्राधान्यम्।

**बलिं याचते वसुधाम्** इत्यत्र परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापारो याचेरर्थः। स्वत्वे बलेः निरूपकतयाऽन्वय इति नागेशः। वस्तुतस्तु अत्र व्यापारद्वयार्थकत्वं स्वीकृत्य पूर्वेणैव कर्मसंज्ञेति नेदं सूत्रमावश्यकमिति। अत्र बलेः अपादानत्वेनाविवक्षा, कर्मत्वेन विवक्षा बोध्या।

**अविनीतं विनयं याचते** इत्यत्र अविनीतं विनयाननुनयतीत्यर्थः। विनयस्यानेन कर्मत्वम्। अविनीतस्य पूर्वेण। अनुनयानुकूलव्यापारानुकूलव्यापारार्थकत्वे तु पूर्वेण गतार्थता।

**तण्डुलानोदनं पचति** इत्यत्र पच् धातोः अर्थद्वयम्। विक्लित्त्यनुकूलव्यापारवाचको यदा तण्डुलः कर्म तदा। ओदनरूपं कर्म तदा सिद्ध्यनुकूलव्यापारः। तण्डुलानां करणत्वाविवक्षायामनेन कर्मसंज्ञा। अत्रापि विक्लित्त्यनुकूलव्यापारानुकूलव्यापारवाचकत्वं पचेस्तदा पूर्वेण कर्मत्वम्।

**गर्गान् शतं दण्डयति** इत्यत्र अपादानत्वेनाविवक्षायां गर्गाणामनेन कर्मसंज्ञा। शतस्य पूर्वेण। बलात् परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापारो दण्डेरर्थः। अत्र गर्गपदं गर्गगोत्रवतां पुरुषाणां बोधकम्। तेभ्यः शतकर्मकं दण्डनम्, न तु प्रत्येकस्मात् शतकर्मकं दण्डनम्।

**व्रजमवरुणद्धि गाम्** इत्यत्र व्रजस्याधिकरणत्वाविवक्षायां कर्मसंज्ञाऽनेन। निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। व्रजे गौः तिष्ठति, तत्र वा निर्गमप्रतिबन्धकपूर्वकं चिरं स्थापयतीति सम्प्रत्ययात्। अत्रापि व्यापारद्वयार्थकत्वे तु पूर्वेण कर्तुरित्यनेन कर्मत्वम्।

**माणवकं पन्थानं पृच्छति** इत्यत्र जिज्ञासाविषयार्थज्ञानानुकूलव्यापारः पृच्छेरर्थः।

जिज्ञासा च केन पथा गन्तव्यमित्येवंरूपा। अत्र ज्ञानविषयत्वेन पथः कर्मत्वम्। माणवकेन च तज्ज्ञानाश्रयत्वं सम्बन्धः। अपादानत्वन्तु नात्र, 'न प्रश्नादेवापायो भवति, पृष्टोऽसौ यद्याचष्टे तदाऽपायेन युज्यते' इति। सम्प्रदानत्वमपि न, कर्मसम्बन्धवत्त्वेनेच्छा-विषयत्वाभावात्। व्यापारद्वयार्थकत्वे तु कर्तुरिति कर्मत्वम्।

**वृक्षमवचिनोति फलानि** इत्यत्र विभागपूर्वकादानानुकूलो व्यापारः चिञ् इत्यस्य अर्थः। वृक्षात् फलानि आदत्ते। अपादानत्वविवक्षायामनेन कर्मत्वम्।

**माणवकं धर्मं ब्रूते शास्ति** इत्यत्र कण्ठताल्वाद्यभिघातपूर्वकज्ञानजनकशब्द-प्रयोगरूपव्यापारो ब्रूञर्थः। प्रवृत्तिपर्य्यवसायी शासेरर्थः। अध्ययनं कुरु इति शिष्योपदेशरूपः। सम्प्रदानत्वाविवक्षायामनेन कर्मत्वम्, उपदेशानुकूलधर्मसम्बन्धकरणपरीक्षणमपि आचार्यस्येति कर्तव्यतायामागच्छति। न केवलोपदेशदानेन आचार्यस्य कृतार्थतेति दिक्। शतं जयति अपादानत्वाविवक्षायां देवदत्तस्यानेन कर्मत्वम्। पराक्रमप्रदर्शनपूर्वकपरस्वत्वनिवृत्ति-स्वस्वत्वोत्पत्त्यनुकूलव्यापारो जिधात्वर्थः। व्यापारद्वयार्थकत्वे तु पूर्वेण कर्मत्वम्।

**सुधां क्षीरनिधिं मथ्नाति** इत्यत्र सुधायै इति प्राप्ते सम्प्रदानत्वविवक्षायामनेन कर्मत्वम्। अन्तःस्थितसारभूतद्रव्यबहिःप्रकाशनाय विलोडनानुकूलव्यापारार्थकत्वं मथेः।

**देवदत्तं शतं मुष्णाति** इत्यत्र गुप्तप्रकारेणान्यायेन परस्वत्वस्वाधीनीकरणरूपव्यापारो मुषेरर्थः। व्यापारद्वयार्थकत्वे कर्तुरिति कर्मत्वम्।

**ग्राममजां नयति हरति कर्षति** वहति वा इत्यत्र नयतेः संयोगानुकूलो व्यापारः। स्कन्धादिग्रहणपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारो वहेरर्थः। गत्यनुकूलव्यापारविशेषः कृषेरर्थः। बलाद् ग्रहणपूर्वकं देशान्तरप्रापणं हरतेरर्थः।

वस्तुतः द्विकर्मकधातूनां विषये यः श्लोकः भगवता पतञ्जलिना उक्तोऽस्ति तत्र पच्धातोः पाठः नास्ति, अतः नागेशमते दुह् याच् प्रभृतिषु पच्धातोः पाठः अप्रामाणिकः, परन्तु व्यापारस्य द्व्यर्थकत्वस्वीकारे पच् धातुः द्विकर्मकः इति। हरदत्तः कैयटादीनां व्याख्यानमते च श्लोके 'च' शब्दस्य व्यवहारे 'जि' प्रभृतिधातूनां ग्रहणं भवति। यथा– जि, मष्, दण्ड्, कुष्।

अर्थनिबन्धनेयं संज्ञा अत्र भवति यतो हि 'अकथितं च' इति सूत्रे कर्मसंज्ञा अर्थाश्रया भवति न तु स्वरूपाश्रया। तेन षोडशधातुपर्य्यायवाचकधातुयोगेऽपि 'अकथितञ्च' इति सूत्रं प्रवर्तते एव। अत्रार्थे 'तद्राजस्य तेनैवास्त्रियाम्' (2–4– 62) इति सूत्रभाष्ये पृच्छिपर्य्यायस्य चुदेरपि द्विकर्मत्वबोधनपरं भाष्यमेव। तथाहि– 'यो हि उभयोर्दोषो न

तत्रैकश्चोद्यः' इत्यर्थमुपक्रम्य 'अचोद्यं मां त्वं चोदयसि' अहमपि त्वां किमचोद्यं चोदयामि इति कर्तरि प्रत्यये प्रयोगः। कर्मणि प्रत्यये 'अहमपीदमचोद्यं चोद्ये' इति।

तथा हि भट्टिः–

**स्थाणुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम्।** इति।

महाकविः कालिदासः–

**शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव।** इति।

भारविः अपि–

**उदारचेता गिरिमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः।** इति।

एवं पूर्वोक्तधातुसमानार्थकानेकधातूनां द्विकर्मकत्वं ज्ञेयम्।

परन्तु आचार्यः नागेशः अत्र अर्थाश्रयं न स्वीकरोति। यतो हि अर्थाश्रये सति भाष्यकारस्य दुहि–याचि इत्यादिश्लोके याचि तथा भिक्षि इति एतयोः समानार्थकरूपेण ग्रहणं न स्यात्।

याचि अथवा भिक्षि इत्यत्र एकेन अपरस्य ग्रहणं स्यात्। कैयटः हरदत्तश्च वाचि इत्यस्य अनुनयम् तथा भिक्षि इत्यत्र याचनम् इत्यर्थं स्वीकरोति, अतः नैव एकः अपरस्य परिपूरकं भवितुमर्हति।

परन्तु पुनः आचार्यः नागेशः कथयति भिक्ष–धातुः यदि अनुनयम् इति अर्थे 'अविनीतं विनयं भिक्षते' इति प्रयोगः स्यात्, तेन अत्र एवं वक्तव्यं याच् धातुः भिक्ष–धातुः इति उभयोः उभयार्थकत्वम् अतः कर्मसंज्ञा अपि प्राप्नोति, तदर्थं भाष्यकारस्य श्लोके समानार्थकरूपेण धातोः ग्रहणं नैव आवश्यकम्।

किन्तु आचार्यः भट्टोजिदीक्षितः अर्थाश्रयं स्वीकरोति, केवलं ग्रह–धातोः द्विकर्मकत्वं नैव स्वीकरोति। अतः 'जग्राह द्युतरं शत्रुम्' इत्यत्र 'अकथितञ्च' इति सूत्रेण ग्रह् धातोः असाधुप्रयोगः इति मनोरमायाम्। किन्तु यदि 'दुह्याच्...' इत्यस्मिन् श्लोके ग्रह्–धातोः पाठः स्यात् तर्हि कथं ग्रह–धातोः द्विकर्मकता न इत्येव चिन्तनीयम्।

**अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्।**

धातवः द्वेधा भवन्ति सकर्मकाः अकर्मकाश्च। स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मत्वम्। स्वार्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्। स्वम्–धातुः। धातुत्वञ्च क्रियावाचकत्वरूपम्। क्रियात्वञ्च गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वम्। क्रिया

अपि द्वेधा विभज्यते, साध्यरूपा पचति इति उदाहरणम्। साधनरूपा च पाकः इति उदाहरणम्। साध्यत्वञ्च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्। पचति इत्युक्ते साधन (कारक) विषयिणी आकाङ्क्षा नियमेन भवति इति। क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वं सिद्धत्वम्। नास्ति कर्म येषां ते अकर्मकाः। अकर्मकाश्च ते धातवस्तेषां योगे–सम्बन्धे, देशः-कुरुपाञ्चालादिः तस्य कर्मसंज्ञा भवति। तेन 'अधिशीङ्स्थासां कर्म' इत्यस्य न वैयर्थ्यम्।

उदाहरणेषु यथा देशः– कुरुन् स्वपिति अत्र अभावप्रत्ययालम्बननिद्रारूपः स्वापः, कालः– मासमास्ते अत्र कालस्य कर्मसंज्ञा। कालशब्देन प्रसिद्धस्यैव मासादेर्ग्रहणम्, न तु गोदोहनादिकालस्य। भावः– गोदोहमास्ते। गन्तव्योऽध्वा गन्तव्यत्वेन विशेषितः। गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति। उदाहरणम्– क्रोशमास्ते। कर्मसंज्ञक इति। अत एव ' आस्यते मासः' इति कर्मणि लादयोऽपि। कर्मपदे निषेध्यसमर्पककर्मपदेन कालादिरूपकर्मणामग्रहणेनाकर्मत्वाभावेन लादय इति बोध्यम् इति प्राचीनाः। नव्यास्तु स्वकरणव्यापने वृत्त्या व्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वम्।

यथा च शब्दकौस्तुभे– 'न चैवं सकर्मकेष्वप्यतिप्रसङ्गः, लक्ष्यानुरोधेनाकर्मकाणामेवोक्तप्रकाराभ्युपगमात्।

आह च – **कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।**
**सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥** इति।

हेलराजस्त्वाह। सकर्मकेष्वपि मासमोदनं पचतीति भवत्येव। अत एवोक्तं सर्वैरिति। अकर्मकैरिति त्वविवक्षितमिति। कैयटोऽप्येवम्। अस्मिन्पक्षे 'मासमास्ते कटे' इति कटादेरपि द्वितीया प्राप्ता तथापि कालादेरेव व्यापनकर्मत्वं न तु कटादेरिति हेलराजः। अनभिधानञ्चेह शरणम्। 'अधिशीङ्' इत्यादिज्ञापकं वा बोध्यम्। इह च कर्मणि भावे च लकारे 'देवदत्तेन आस्यते मासौ मासं वा' इति रूपद्वयमपीष्टम्।

स्यादेतत्, भावे चाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं भावे ल इति चेत्, उच्यते, अकर्मकेभ्यः इत्यनेनान्तरङ्गं द्रव्यकर्म व्युदस्यते न तु बहिरङ्गं कालादिकर्म। कर्मणीत्यत्र तु व्यक्तिपक्षाश्रयणादन्तरङ्गासन्निधौ बहिरङ्गे कालादिकर्मण्यपि प्रतिविरुद्धा, जातिव्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्।

उक्तं च हरिणा –

**शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते।**
**क्रियासु कालयोगोऽतः प्राग्योगो द्रव्यकर्मणा॥** इति।

**अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः।**

**लस्य कर्मणि भावे च निमित्तत्वाय कल्पते॥** इति च।

एतेन-

**सस्तेमामघाभिधानि यमुना गङ्गोघसङ्गे यया।** इति श्रीहर्षप्रयोगो व्याख्यातः।[4]

**निष्कर्षः–** द्विकर्मकधातूनां विषये आचार्यः नागेशः कथयति भिक्ष–धातुः यदि अनुनयः इति अर्थे 'अविनीतं विनयं भिक्षते' इति प्रयोगः स्यात्, तेन अत्र एवं वक्तव्यम्, याच्–धातुः भिक्ष–धातुः चेति उभययोः उभयार्थकता, अतः कर्मसंज्ञा अपि प्राप्नोति, तदर्थं भाष्यकारस्य श्लोके समानार्थकरूपेण धातोः ग्रहणं नैव आवश्यकमिति वदति।

किन्तु आचार्यः भट्टोजिदीक्षितः अर्थाश्रयं स्वीकरोति, केवलं ग्रह–धातोः द्विकर्मकत्वं नैव स्वीकरोति। अतः 'जग्राह द्युतरं शत्रुम्' इत्यत्र 'अकथितञ्च' इति सूत्रेण ग्रह–धातोः असाधुप्रयोगः इति मनोरमायाम्। किन्तु यदि 'दुह्–याच्...' इत्यस्मिन् श्लोके ग्रह-धातोः पाठः स्यात् तर्हि कथं ग्रह–धातोः द्विकर्मकता न इत्येव चिन्तनीयम्।

यद्यपि प्राचीनवैयाकरणः श्रीमद्भट्टोजिदीक्षितः महाभाष्यस्य सारभूतग्रन्थे शब्दकौस्तुभे स्वमतं प्रतिपादयति, किन्तु नवीनाचार्यः श्रीमन्नागेशोऽपि स्वयुक्त्या प्रकटयति। अत्र केषां मतं साधु केषां मतम् असाधु इति स्पष्टं वक्तुं न शक्यते तथापि विचार्यमाणे विषये उभयत्र मम समर्थनमस्ति इति शिवम्।

*

## सन्दर्भाः


1. श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. 130
2. तत्रैव
3. वै. क. का. (कारिकाकरः), सं. 242
4. श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. 136, 137


*

# रामायणस्य सांस्कृतिकी यात्रा दक्षिण–पूर्व एशियादेशे ( लाओस, म्यांमार, मलेशिया सिंगापुरं च )

**डा. देशराजः**

**शोधसारः**

रामायणम्, भारतीयसंस्कृतेः अद्वितीयो ग्रन्थः, दक्षिणपूर्व–आस्यादेशेषु–लाओस्–म्यन्मार्–मलेशिया–सिङ्गापुर–देशेषु गाढं सांस्कृतिकप्रभावस्य कारणं जातम्। एषु देशेषु रामायणस्य प्रसारः धार्मिक–साहित्यिक–सांस्कृतिकरूपेण अभवत्, यः तत्तत् स्थाननिष्ठपरम्पराभिः संयुक्तः विशेषरूपेण दृश्यते। लाओसदेशे रामायणस्य 'लवाङ्गरामायण' इत्याख्यं रूपान्तरितं संस्करणं प्रमुखं वर्तते। तत् नृत्ये, सङ्गीते, लोककथासु च गाढं प्रभावं प्रदर्शयति। रामः, सीता, हनूमांश्च एतानि पात्राणि लाओसदेशीय–सांस्कृतिक–परिचये सम्पूर्णतः संलीनानि सन्ति।

म्यन्मार्–देशे रामायणम् 'थिरिविजय' इत्याख्यया प्रसिद्धम्। बर्मदेशीयसंस्कृतेः अन्तर्गतं रामरावणयोः संघर्षः काव्यरूपेण कलारूपेण च प्रदर्श्यते, तत्र च लोककथासु रामायणस्य अंशाः गाढं समाहिताः दृश्यन्ते। मलेशियादेशे 'हिकायत् सेरी राम' इति नाम्ना रामायणस्य मलयभाषायां संस्करणम् प्रसिद्धम्। अत्र कलायाम्, नृत्ये, नाट्ये च रामायणस्य विभिन्नपात्राणां चित्रणं दृश्यते, यत् तत्र राष्ट्रस्य सांस्कृतिक–आयोजनानां अभिन्नः अंशः अस्ति। सिङ्गापुर–देशे रामायणस्य प्रभावः हिन्दुधर्मे आधृतः अस्ति। अत्र धार्मिकोत्सवेषु रामलीलानाट्यादिषु च रामायणकथाः जीवन्ति, यत् सिङ्गापुरस्य सांस्कृतिकविविधतायाः प्रदर्शनं करोति। एवंप्रकारेण रामायणस्य सांस्कृतिकयात्रया दक्षिणपूर्व–आस्ये भारतीयसंस्कृतेः धर्मस्य च प्रभावः संस्थापितः। एषु देशेषु रामायणस्य विभिन्नरूपाणि सांस्कृतिकनिधिरूपेण प्रतिष्ठां प्राप्तानि। रामायणं केवलं धार्मिक-शिक्षायाः प्रतिनिधिः न, अपि तु सामाजिक–नैतिक–सांस्कृतिकमूल्यानां प्रतीकरूपेण अपि अधुनापि तिष्ठति।

रामायणं भारतीयसंस्कृतेः धर्मस्य नैतिकमूल्यानां च मूलस्तम्भः अस्ति। एषः केवलं पौराणिककथामात्रं न, अपि तु जीवनोपयोगिनी कला, कर्तव्यनिष्ठा, आदर्शचरित्राणां मार्गदर्शकमपि अस्ति। अस्य रचना आदिकविना महर्षिणा वाल्मीकिना कृता, एतत् जगति प्रथमं महाकाव्यम् इति कथ्यते। रामायणं मुख्यतया भगवतः श्रीरामस्य जीवनकथां वर्णयति। तस्य जन्म, वनवासः, पत्न्याः सीतायाः अपहरणम्, रावणेन युद्धम्, धर्मस्य पुनः प्रतिष्ठा च।

रामायणस्य विशेषता या अस्ति–सा एषा यत् एषः धर्मस्य नीतेः च मार्गं प्रदर्शयत् अपि सहजया भावपूरितया च भाषया प्रेम, त्यागः, दुःखम्, संघर्षः, विजयश्च–एतान् सर्वान् जीवनरङ्गान् प्रकाशयति। अतः रामायणम् एकं कालातीतम् महाकाव्यम् अस्ति, यत् केवलं धार्मिकविश्वासस्य चिह्नं न, अपि तु मानवमूल्यानां नैतिकतायाः च शाश्वतः संदर्भग्रन्थः अपि वर्तते।

रामायणं केवलं भारतदेशे एव न प्रसिद्धम्, अपि तु दक्षिणपूर्व–आस्यदेशेषु अपि–यथा थैलैण्ड् (रामाकीयेन), कम्बोडिया (रीमकेर), इण्डोनेशिया (काकविन् रामायण), नेपालम्, लाओस् इत्यादिषु– लोकप्रियं वर्तते। तत्र कलायाम्, नृत्ये, नाट्ये, लोककथासु च अस्य प्रतिध्वनिः दृश्यते। रामायणं केवलं भारतस्य सांस्कृतिकभूतिः न, किन्तु दक्षिणपूर्व–आस्यदेशेषु अपि गाढं प्रभावं संस्थापयति।

एतेषु देशेषु रामायणस्य स्थानिकरूपाणि, धार्मिक–सांस्कृतिक–कलात्मकस्वरूपैः च, तेषां परम्पराणां समृद्धिं कृतवन्ति। लाओस्, म्यन्मार्, मलेशिया, सिङ्गापुर् च एतेषु रामायणस्य महत्त्वपूर्णं योगदानम् अस्ति। तत्र लोककलायाम्, नृत्ये, साहित्ये, धार्मिकविश्वासेषु च रामायणं पूर्णतः संलग्नम्।

### 1. लाओस्–देशे रामायणपरम्परा – 'फ्रालक् फ्रालाम्' इति

लाओस्–देशे रामायणकथा 'फ्रालक् फ्रालाम्' इति नाम्ना प्रसिद्धा अस्ति। एतद् नाम रामस्य (Phra Lam) च लक्ष्मणस्य (Phra Lak) च नामाभ्यां निर्मितम् अस्ति, यत् सूचयति यत् अस्यां कथायाम् उभौ–रामः च लक्ष्मणः च–समं प्रमुखपात्रे स्तः। Phra इत्ययं उपसर्गः आदरसूचकः अस्ति, यः देवतानां वा पूजनीयपुरुषाणां प्रति प्रयुज्यते। Lak च Lam च– लक्ष्मणरामयोः लाओरूपे।

### बौद्धदर्शनं लोकपरम्पराश्च–

'फ्रालक् फ्रालाम्' नाम रामायणरूपं थेरवादबौद्धधर्मस्य प्रभावेण सह लाओस्–

देशीयलोककथाभिः गाढेन सम्बन्धेन युक्तम्। अत्र रामः (फ्रालाम्) केवलं देवः न, अपि तु बोधिसत्त्वरूपेण प्रतिपाद्यते – सः पुरुषः यः बुद्धत्वं प्रति गच्छति। अत्र कथायाम् 'धम्म' (धर्मः), करुणा, क्षमा, त्यागः इत्यादीनां गुणानां विशेषः प्रकाशः दृश्यते। अनेन सह देशीयाः पर्वताः, नद्यः, राजराज्यं च सांस्कृतिकसन्दर्भे समाहिताः सन्ति।

साहित्यपरम्परा मौखिकपरम्परा च 'फ्रालक् फ्रालाम्' न केवलं धार्मिककाव्यस्य, अपि तु लोककथानां, काव्यानां, पारम्परिकनाट्यविधीनां च अङ्गम् अस्ति। एषा कथा लाओसमाजे धार्मिकग्रन्थरूपेण वहति, अपि तु सांस्कृतिकसाहित्यिक-सामाजिकजीवनस्य अभिन्नः भागः अस्ति। 'फ्रालक् फ्रालाम्' न केवलं पवित्रकाव्यरूपेण संरक्षिता अस्ति, किन्तु एषा कथा पालिभाषायां च लाओभाषायां च संरक्षिता अस्ति, यत्र संस्कृत–लाओसामान्यसमाजे कथायाः श्रुतिपरम्परा प्रवहति। काव्यशास्त्रविधानानुसारं लोकनाट्यप्रस्तुतिमध्ये एषा कथा प्रचलति, यत् लाओसमाजे सामूहिकचेतना, नैतिकशिक्षा तथा च सांस्कृतिकसंचारः इत्येतान् विषयान् आदर्शरूपेण स्थापयति।

**प्रमुखेषु धार्मिकोत्सवेषु मन्दिरकर्मसु च एषा कथा नाट्यरूपेण अभिनयेन प्रदर्श्यते–**

लाओसमाजे प्रमुखेषु धार्मिकोत्सवेषु, मन्दिरकर्मसु च विविधसामाजिककार्यक्रमेषु 'फ्रालक् फ्रालाम्' कथा विशेषतः नाट्यरूपेण प्रस्तूयते। नाट्यप्रस्तुतिकाले, विभिन्नाः संस्कृतिपद्धतयः–नृत्य, संगीत, काष्ठपुत्तलिकानृत्यं अभिनयप्रदर्शनं च भवति। अस्मिन् नाट्ये पात्राणाम् अत्यन्तं सजीवप्रदर्शनं,वर्णमयवस्त्रविधानं, तथा च दृश्यात्मकः प्रभावः विशेषतया महत्त्वपूर्णः अस्ति, यः समाजे धार्मिकप्रेरणां नैतिकसंस्कारं च प्रकटयति। एषा कथा न केवलं धार्मिकसमाजे, अपि तु लोकजीवने, सांस्कृतिकसम्बन्धे च महत्त्वपूर्ण स्थानं वहति, यत्र प्रत्येकं जनः धार्मिकधारां, नैतिकनिर्णयम् एवं सांस्कृतिकदृष्ट्या जागरूकतां साधयति। एषा कथा स्थानिकसमाजे धार्मिकशिक्षायाः, नैतिकमार्गदर्शनस्य, सांस्कृतिकस्वपरिचयस्य च एकं महत्त्वपूर्ण साधनं वर्तते।

**नाट्यकलायाम् उपस्थितिः–**

लाओस्–देशे 'फ्रालक् फ्रालाम्' कथा पारम्परिकनृत्यनाट्येषु, छायायाः काष्ठपुत्तलिकायाः (shadow puppetry) माध्यमेन अभिनीयते। अस्मिन् नाट्ये पात्राणि वर्णमयवस्त्रैः मुखपुटकैः च अलङ्कृतानि भवन्ति, यैः तेषां प्रदर्शनम् अत्यन्तं आकर्षकं च जीवत् दृश्यते। विशेषतया हनुमान्, रावणः (लाओभाषायां 'Thotsakan')

इत्यादि पात्राणि अत्यन्तं जीववर्णमयम् अभिनयं प्रस्तुवन्ति। विशेषतया, रावणः अधर्मस्य, अहङ्कारस्य च प्रतीकरूपेण प्रदर्श्यते।

एषा नाट्यप्रस्तुतिः बौद्धविहारेषु (वाट्) उत्सवसमये आयोजिता भवति, यत्र न केवलं नाट्यकला, अपि तु धार्मिक–सांस्कृतिकपुनरावृत्तिरूपेण प्रस्तूयते। अस्मिन् धार्मिकसमारोहे नाट्यकला श्रद्धया, विश्वासेन नैतिकदृष्ट्या च संप्रेरिता भवति। नाट्ये धर्मः, सत्यं, न्यायः, करुणा, क्षमा इत्यादिमूल्यानि प्रकटितानि जातानि यानि लाओसमाजे, नैतिकतायाः प्रतीकतया व्यवह्रियन्ते।

**मुख्यभेदाः च वैशिष्ट्यानि – तुलनात्मकसारांशः–**

| **तत्त्वम्** | **वाल्मीकिरामायणम्** | **फ्रालक् फ्रालाम् ( लाओस् )** |
|---|---|---|
| रामस्य नाम | रामः | फ्रालाम् |
| लक्ष्मणः | सहायकपात्रम् | समं प्रमुखपात्रम् - फ्रालक् |
| धार्मिकदृष्टिः | हिन्दुधर्मः | बौद्धदृष्टिः (थेरवादबौद्धः) |
| प्रस्तुतीकरणम् | शास्त्रीयग्रन्थरूपेण | मौखिककथा, कविता, लोकनाट्यरूपेण |

**‘फ्रालक् फ्रालाम्’ इत्यस्य लाओस्–देशीयरामायणपरम्परा–**

‘फ्रालक् फ्रालाम्’ लाओसदेशे रामायणकथायाः स्थानिकं संस्करणं दर्शयति, यत्र भारतीयसंस्कृतेः प्रभावः स्थानिकबौद्धविश्वासैः च लोकपरम्पराभिः सह मिलित्वा एकं नवीनं सांस्कृतिकं स्वरूपं प्राप्तवान् अस्ति। लाओससंस्कृते रामायणस्य एतद् रूपं केवलं धार्मिकपाठ्यरूपेण न, अपि तु समाजस्य सांस्कृतिकजीवनस्य एकम् अभिन्नम् अङ्गं जातम् अस्ति।

**सांस्कृतिकस्वरूपं भारतीयप्रभावः च**

‘फ्रालक् फ्रालाम्’ ग्रन्थे भारतीयरामायणस्य तत्त्वानि लाओसस्य स्थानिकधर्मनिष्ठया तथा च विश्वासैः सह संयोजितानि। बौद्धधर्मः, यः लाओसदेशे प्रमुखः अस्ति, एतस्याः कथायाः धार्मिकीं नैतिकीं प्रभावयति, येन कारणेन एषः केवलं धार्मिकग्रन्थः न, अपि तु सांस्कृतिककाव्यं जातम् अस्ति। अत्र स्थानिकपरम्पराः, लोककथाः च भारतीयसंस्कृतेः तत्त्वैः सह मिश्रिताः सन्ति, याः लाओससमाजे जीवनदृष्टिं विश्वदृष्टिं च व्यक्तीकुर्वन्ति।

**अद्यापि प्रमुखं साधनम्–**

अद्यापि लाओससमाजे ‘फ्रालक् फ्रालाम्’ कथा धार्मिकशिक्षायाः, नैतिकमार्गदर्शनस्य सांस्कृतिकस्वपरिचयस्य च प्रमुखं साधनम् अस्ति। एषा केवलं लाओससमाजे जीवनस्य

अभिन्नः अंशः नास्ति, अपि तु सामूहिकचेतनां, सामाजिकधारां च सांस्कृतिकादर्शानां प्रतिनिधिरप्यस्ति।

**2. म्यांमारदेशे रामायणपरम्परा–यामा ज़टडॉ ( Yama Zatdaw )**

म्यांमारदेशे रामायणकथा 'यामा ज़टडा' इति नाम्ना अत्यन्तं प्रसिद्धा अस्ति। एतत् बर्मी–रामायणरूपं, यत्र श्रीरामः बोधिसत्त्वरूपेण प्रस्तुतः अस्ति। 'यामा ज़टडॉ' नाटकं धार्मिक–सांस्कृतिकदृष्ट्या अत्यन्तं श्रद्धया स्वीक्रियते, यत्र बर्मीजनपरम्परा, भारतीयसंस्कृतिः, बौद्धधर्मश्च एकत्र समाहिताः सन्ति।

**भारतीयतत्त्वैः सह बौद्धधर्मस्य प्रभावः–**

म्यांमारस्य 'यामा ज़टडॉ' नाट्यरूपे बौद्धधर्मप्रभावः स्पष्टरूपेण द्रष्टुं शक्यते, रामकथा एतेन भारतीयधार्मिकतत्त्वानुसारं परिष्कृतरूपेण प्रकटयति। रामः बोधिसत्त्वरूपेण प्रस्तुतः अस्ति, यः बौद्धधर्मीयगुणानुसारं संतुलितः, करुणाशीलः धार्मिकदृष्ट्या आदर्शसंगतश्च चित्रितः। एषा रामायणकथा केवलं भारतस्य पौराणिककथायाः रूपे न, अपि तु एकं बौद्ध–समन्वितसांस्कृतिकरूपेण प्राप्ता अस्ति।

**'यामा ज़टडॉ' इति नामरूपे च तस्य स्वरूपम्–**

'यामा ज़टडॉ' इति नाम द्वाभ्यां पदाभ्यां निर्मितम् अस्ति।

**Yama :** बर्मीभाषायां रामस्य अभिधानम्।

Zatdaw: 'Zat' = नाटकम्, 'Daw' = पवित्रम्। अतः 'यामा ज़टडॉ' इत्यर्थः– 'रामस्य पवित्रनाट्यप्रस्तुतिः'।

**नाट्यशैली तथा स्थानिकीकरणम्–**

'यामा ज़टडॉ' नाटकं बर्मी–राजकीय–नाट्यशैल्याः एकं महत्त्वपूर्णम् उदाहरणम् अस्ति। बर्मी–नाट्यशैल्याः प्रमुखं रूपं साङ्गीतिकं नृत्यात्मकं चास्ति। अत्र नाटकं वर्णशोभायुक्तं, भव्यनृत्ययुक्तं, तालबद्धसंगीतयुक्तं च भवति यत् दर्शकानां कृते अनुपमम् अनुभवं सञ्जनयति। नाट्ये स्थानिकभूमिका, संगीतं, वस्त्रं च धार्मिकदृष्ट्या सजीवप्रदर्शनं कृतम् अस्ति, यत्र एतद् दर्शकम् एकानुभवसम्पन्नम् आध्यात्मिक–सांस्कृतिकं भवितुं प्रेरयति।

**स्थानिकीकृतं लोकस्वरूपम्–**

'यामा ज़टडॉ' नाट्यरूपेण रामायणकथायाः बर्मीकरणे अस्मिन् नाटके मूलकथा, पात्राणि च बर्मीजनसंस्कृतेः अनुरूपेण प्रस्तुतानि। यत्र रामः, सीता, लक्ष्मणः, रावणः

इत्यादिप्रमुखपात्राणि, बर्मीजनपरंपरायां सम्मिलन्ति। तेषां चेष्टितानि, वेशभूषा च स्थानिकसंस्कृतेः अनुरूपेण परिवर्तितानि। बर्मी–राजसमानां देवालयानां च प्रभावः अस्मिन् नाट्ये स्पष्टतः दृश्यते। राजा, पुरोहितः, व्रजनं च प्राचीनबर्मी-समाजस्य उच्चवर्गीयव्यक्तित्वानि नाट्ये समाहितानि। देवालयेन प्रत्यक्षसम्बन्धः स्थापितः अस्ति, यत्र धार्मिकानि अनुष्ठानानि, पूजा विधिः च नाट्यकलया सह मिलित्वा प्रदर्श्यन्ते।

**नाट्ये प्रमुखं स्थानं–**

नाट्ये प्रमुखं स्थानं संगीतस्य नृत्यस्य च अस्ति। बर्मी–नृत्यशैली 'बाल्ल', 'लौंग', 'पोट्' इत्यादि परम्परागतशैली अत्र विशेषतः प्रयुक्ता अस्ति। एषा नृत्यशैली स्थानिककलाशिल्पं, धार्मिकविशेषता च लोकसंस्कृतिं संवर्धयति।

**धार्मिकसांस्कृतिकदृष्ट्या महत्त्वम्–**

यामा ज़टडॉ नामकं रामायणरूपं म्यांमारदेशे धार्मिकदृष्ट्या सांस्कृतिकदृष्ट्या च अत्यन्तं महत्त्वपूर्णं स्थानं धारयति। अत्र रामः केवलं राजकुमारः अथवा वीरः न, अपि तु बोधिसत्त्वः इति रूपेण, बौद्धधर्मस्य 'धम्मराजः' इति रूपेण च चित्रितः अस्ति। तेन धर्मस्य, करुणायाः, क्षमायाः संयमस्य च जीवनमूल्यानां सजीवप्रदर्शनं क्रियते। एषा कथा केवलं पौराणिकगाथा न, अपि तु नीति–कथारूपेण लोकमानसे प्रतिष्ठिता अस्ति। तत्र पात्राणाम् आचरणानि, निर्णयाः च जनानां नैतिकदिशा निर्दिष्टानि। विशेषतः बालकानां शिक्षायै एषा कथा अत्यन्तम् उपयोगिनी अस्ति, यतः तया सदाचारः, धर्मनिष्ठा सहिष्णुता च बोध्यते। पूर्वम् एषा यामा ज़टडॉ–प्रस्तुतिः कोंबांगवंशीय-राजसभायाः विशेषोत्सवेषु एव दृश्यते स्म, यत्र राजा स्वयं अपि दर्शकः आसीत्। किन्तु अधुना एषा परम्परा जनसामान्ये अपि व्याप्ता जाता लोकपर्वसु, देवालयोत्सवेषु, विद्यालयेषु, सांस्कृतिकमञ्चेषु च नियमितरूपेण प्रस्तूयते। एवं दृष्ट्वा ज्ञायते यत् एषा रामकथा धर्मस्य संस्कृतेः परम्परायाः च संवाहिकारूपेण कार्यं कुर्वती, समयानुसारं रूपान्तरं प्राप्य अपि, स्वमूल्यं न परित्यजति।

**पौराणिकपात्राणां देशीयरूपपरिवर्तनम् –**

रामायणस्य पात्राणि न केवलं भारतीयसंस्कृतेः भागः, अपि तु अन्यदेशेषु, विशेषतः म्यांमारे, अनुकूलितरूपेण प्रस्तुतानि सन्ति। एतानि रूपान्तरित-पात्राणि स्थानीयरूपेण स्थानिकसंस्कृतेः अनुरूपम् आहितानि, जातीयपरम्परायाः संरक्षणं कुर्वन्ति।

**हनुमान्**

म्यांमारे हनुमतः चित्रणं विशेषतः बालकानां कृते किञ्चित् हास्यपूर्णरूपेण कृतम् अस्ति।

**रावणः**

रावणस्य चित्रणं म्यांमारे 'Thotsakan' kee 'Dathagiri' इति नाम्ना प्रसिद्धम् अस्ति। रावणः, यः अहंकारस्य दुष्टतायाः च प्रतीकम्, अत्र देशीयरूपेण अधिक-बलवद्रूपेण प्रस्तुतः अस्ति। रावणस्य चित्रणम् अत्र बौद्धिकपरिप्रेक्ष्ये अहङ्कारस्य, अधर्मस्य च प्रतीकरूपेण परिवर्तितं कृतं अस्ति। एवं देशीयरूपपरिवर्तनं एव न केवलं पात्राणां परिचयाय, अपि तु सांस्कृतिककर्तव्यम्, लोकाचारं च जागरयितुं प्रवर्तितमस्ति।

**अधुनातनप्रासङ्गिकता**

अद्यत्वे 'यामा ज़टडॉ' कथा म्यांमारदेशस्य सांस्कृतिकपरम्परायाः अविभाज्य-भागरूपेण प्रतिष्ठिता अस्ति। एषा कथा केवलं प्राचीनकथामात्रं नास्ति, अपि तु एषा राष्ट्रस्य धार्मिकनैतिकसांस्कृतिकमूल्यपरम्परायाः संवाहिका अपि अस्ति। विद्यालयेषु, सांस्कृतिककेन्द्रेषु, रंगमञ्चेषु च एषा कथा आदरपूर्वकं पठ्यते, दृश्यरूपेण च प्रस्तूयते।

नवीनानां कृते अस्य कथा–सन्देशः अतीव प्रभावशाली अस्ति। यः न केवलं तेभ्यः स्वसंस्कृतेः परिचयं ददाति, अपि तु तेषां चित्ते गौरवबुद्धिं सांस्कृतिकसंबद्धतां च जनयति।

निष्कर्षतः 'यामा ज़टडॉ' म्यांमारदेशे रामायणपरम्परायाः धार्मिकसांस्कृतिकमहत्त्वं द्योतयति। एषः ग्रन्थः केवलं धार्मिकः न, अपि तु एकः जीवन् शिक्षकः, सांस्कृतिकबन्धः, अपि च सांस्कृतिक–स्वाभिमानस्य आधारभूतः अस्ति।

**विशेषता च देशीयरूपान्तरणं च**

| तत्त्वम् | वाल्मीकिरामायणम् | यामा ज़टडॉ ( म्यांमार ) |
|---|---|---|
| रामस्य नाम | रामः | यमः |
| लक्ष्मणः | सहायकपात्रम् | लुई अथवा लक्कमण |
| प्रस्तुतिरूपम् | शास्त्ररूपेण ग्रन्थः | शाहीनाटकम्, लोकनाट्यम् |
| धार्मिकदृष्टिः | हिन्दुधर्मः | थेरवादबौद्धधर्मः |

### ३. मलेशिया–सिंगापुरदेशयोः रामायणपरम्परा– 'हिकायत् सेरी राम्'–

मलेशिया–सिंगापुरदेशयोः रामायणकथा 'हिकायत् सेरी राम्' इति नाम्ना प्रचलिता अस्ति, या एकं विशेषं स्थानिकीभूतसंस्करणरूपेण दृश्यते। एषा कथा मलयभाषायां रचिता, यत्र रामायणस्य मूलसंस्कृततत्त्वानि इस्लामधर्मस्य च मलयलोकपरम्पराभिः सह समन्वयेन प्रस्तूयन्ते। 'हिकायत् सेरी राम्' केवलं धार्मिकपाठ्यरूपेण नास्ति, अपि तु मलेशिया– सिंगापुरयोः सांस्कृतिकचेतनायाः, लोककलाविकासस्य च प्रमुखं साधनं जातम्। रामः अत्र आदर्शनायकरूपेण चित्रितः, यः सत्यं, धर्मं, कर्तव्यं च प्रतीकत्वेन बिभर्ति। हनुमान् अत्र भक्तेः, वीर्यस्य च प्रतीकः; रावणः अधर्मस्य, अहङ्कारस्य च चिह्नरूपेण दृश्यते।

'हिकायत् सेरी राम्' कथायाः प्रस्तुतिः मलयनाट्यशैलीषु– 'मक योंग्', 'वायांग् कुलित्', 'दिकिर् बारात्' इत्यादिषु संगीतं, नृत्यं, अभिनयं च समन्वयीकृत्य जीवन्ततया दृश्यते। एषा कथा विद्यालयेषु, उत्सवेषु च सांस्कृतिकमञ्चेषु पाठ्यरूपेण, नाट्यरूपेण उपस्थाप्यते। एवं 'हिकायत् सेरी राम्' इति कथा मलेशिया–सिंगापुरदेशयोः धार्मिक–सांस्कृतिकसंवादस्य माध्यमं सञ्जातम्, या रामायणस्य मूल्यवत्ता, इस्लामीयचिन्तनं, मलयपरम्परा चेति एकत्र मेलयित्वा नवीनं सास्कृतिकं रूपं निर्मितवती।

**इस्लामीयतत्त्वानां मलयलोकसंस्कृतेश्च संयोगः**

हिकायत् सेरी राम इत्यस्मिन् ग्रन्थे रामायणकथायाः पुनरवलोकनं विशेषतः इस्लामीयदृष्ट्या कृतम् अस्ति। अत्र कथा केवलं पौराणिकवृत्तान्तमात्रं न, अपि तु धार्मिकनैतिकमूल्यानां प्रचाराय, विशेषतः इस्लामधर्मस्य सिद्धान्तैः सह सम्बद्धतया पुनर्निर्मिता अस्ति।

रामः, यः अत्र 'सेरी राम' इति नाम्ना निर्दिष्टः अस्ति, एकः आदर्शः इस्लामी नायकः इति रूपेण प्रस्तुतः अस्ति। सः ईश्वरस्य–अल्लाहस्य च इच्छानुसारं कर्तव्यपालनं करोति, धर्ममार्गम् अनुगच्छति, नैतिकसिद्धान्तानां पालनं च यथावत् करोति।

एषा कथा धर्मस्य, सत्यस्य, पवित्रतायाः च विजयम् उद्घोषयति या इस्लामीय-'अखलाक्' (नैतिकशास्त्र) सन्दर्भे अत्यन्तं सुसंगता दृश्यते। कथायाः प्रमुखपात्राणि लक्ष्मणः, सीता, हनुमान् च धर्मनिष्ठायुक्तानि, समर्पणशीलानि, विश्वाससम्पन्नानि पात्राणि निरूपितानि सन्ति।

रावणः अपि अत्र अधार्मिकः, अहङ्कारी, आत्मलोभयुक्तः इत्येवं दोषैः युक्तः

प्रतिपाद्यते, यः अन्ते धर्मेण पराजितः भवति। तस्य स्वरूपं धर्मात् विचलितस्य दुष्टस्य अधोगतेः प्रतीकमिव दृश्यते। एवं हिकायत् सेरी राम इत्यस्मिन्नेव काव्ये भारतीयरामायणस्य मूलतत्त्वानि च, इस्लामीयदृष्टिपथे प्रतिष्ठितनैतिकमूल्यानि च, मलयलोकसंस्कृतेः माध्यमेन सम्यक् समन्वयेन सह प्रस्तूयन्ते। एषः ग्रन्थः धार्मिकसंवादस्य, सांस्कृतिक-समन्वयस्य च एकं मौलिकं उदाहरणं भवति, यत्र भिन्नसंस्कृतीनां तत्त्वानि सहकारेण एकता प्रतिपाद्यते।

**नृत्यं नाट्यं चेति साहित्यिकी प्रस्तुतिः–**

हिकायत् सेरी राम इत्येषा कथा मलयसंस्कृतेः विविधकलाक्षेत्रेषु – नृत्ये, नाट्ये, साहित्ये च – प्रमुखतया प्रस्तुत्या जीवद्रूपेण प्रतिष्ठिता अस्ति।

मलयभाषायां लिखितम् एतत् काव्यं केवलं पठनाय न, अपि तु दृश्यश्रव्यरूपेण प्रस्तुतेः माध्यमेन लोकमानसस्य आकर्षणं करोति। विद्यालयस्तरे च सांस्कृतिकमञ्चेषु 'Hikayat Seri Ram' इत्यस्य पठनं, अभिनयः च आदरेण आयोज्यते। मलय-पारम्परिक-कला–शैलीषु अनेकेषां नाट्यरूपाणां द्वारा अपि एषा कथा सजीवतां प्राप्तवती। विशेषतया -

'Mak Yong' इति पारम्परिकनाट्ये,

'Wayang Kulit' इति छायाकठपुत्तलिकानाट्ये,

'Dikir Barat' इति संगीतप्रधाननृत्ये च

एतेषु सर्वेषु मञ्चरूपेषु हिकायत् सेरी रामस्य प्रसङ्गाः नाट्यात्मकतया, भावपूर्णतया च प्रस्तूयन्ते। एतद् दृष्ट्वा एवम् अवगन्तुं शक्यते यत् हिकायत् सेरी राम कथा न केवलं साहित्यिकरूपेण महत्त्वपूर्णा अस्ति, अपि तु एषः लोकजीवने, परम्परागत-कलासु, भावाभिनये च एकं जीवत् सांस्कृतिकपरम्परामूलं रूपं प्राप्तवती अस्तीति। एषा प्रस्तुतिः लोकसमाजे धार्मिकनैतिकमूल्यानां संवर्धनं, सांस्कृतिकैक्यस्य स्थापनां च साधयति।

**हिकायत सेरी रामे प्रमुखविषयाः –**

एषा कथा धार्मिकशिक्षायाः प्रमुखं माध्यमं भवति, यत्र धर्मस्य, सत्यस्य, न्यायस्य च विजयः प्रतिपाद्यते। रावणः अत्र केवलं शत्रुः इति न दर्श्यते, अपि तु सः एकः अधार्मिकः, आध्यात्मिकदृष्ट्या पतितः, धर्ममार्गात् विचलितः च जनः इति रूपेण चित्रितः अस्ति। सः तेन कारणेन अन्ते पराजयं प्राप्नोति। रामः च सीता च,

ययोः चरित्रे पवित्रता, कर्तव्यपरायणता, पारस्परिकसमर्पणं च दृश्यते, तयोः विवाहः आध्यात्मिकैकतानां प्रतीकः भवति। एषा एकता इस्लामीयपरम्परायामपि प्रतिष्ठिता दृश्यते, यत्र विवाहः केवलं सामाजिकबन्धनं न, अपि तु धार्मिकदृढसम्बन्धः अपि मन्यते। हनुमान् अपि हिकायते विशेषरूपेण निष्ठावान्, विश्वासयुक्तः, सेवाभावी भक्तः इति रूपेण वर्णितः अस्ति। इस्लामीयदृष्ट्या सः एकं आदर्श पात्रं भवति, यः अल्लाह–समर्पणस्य एकेश्वरभक्तेः वा उदाहरणं प्रस्तौति। एवं हिकायत सेरी रामे रामायणकथायाः मूलमूल्ये धर्मः, आस्था, पवित्रता, समर्पणम् इस्लामीयसंस्कृत्या सुसम्बद्धतया पुनर्निर्माणं कृतम् अस्ति, यः धार्मिकसंवादस्य च सांस्कृतिकसमन्वयस्य च उत्तमम् उदाहरणं भवति।

**निष्कर्षः –**

'फ्रालक् फ्रालाम्' लाओसस्य सांस्कृतिकपरम्परायाः अनिवार्यम् अङ्गं जातम् अस्ति, एतद् भारतीयरामायणस्य प्रभावेण सह स्थानिकबौद्धधर्मस्य सांस्कृतिकस्य च संयोजनं कुर्वन् नवीनं सांस्कृतिकं रूपं प्रस्तौति।

यामा ज़टडॉ (Yama Zatdaw) म्यांमारदेशे रामायणपरम्परायाः एकं जीवन्नाट्यात्मकं रूपम् अस्ति।

तद्वत् हिकायत् सेरी राम इति ग्रन्थः मलेशिया–सिंगापुरदेशयोः रामायणकथां प्रति एकं विशिष्टं बौद्धिकं सांस्कृतिकं च दृष्टिकोणं प्रस्तौति। अत्र रामायणस्य आदर्शानां सिद्धान्तानां च परम्परा मलयलोकसंस्कृतेः, विशेषतः इस्लामीयमूल्यानां च समन्वयेन नूतनरूपेण अभिव्यक्तिः क्रियते।

*

# हरिनामामृतव्याकरणे संज्ञाशब्दानां तात्पर्यानुसन्धानम्

**डॉ. अनुप कुमार रानो**

संस्कृतव्याकरणसम्प्रदायेषु हरिनामामृतव्याकरणस्य विशिष्टं स्थानं विद्यते। हरिभक्ति-भावमूलकम् इदं व्याकरणं श्रीजीवगोस्वामिना प्राकृतजनानां कृते भगवद्भक्तिविधानाय विरचितम्। ग्रन्थारम्भे तेनोक्तम्–

**हरिनामावलिवलितं व्याकरणं वैष्णवार्थमाचिन्मः।**[1]

श्रीमन्महाप्रभुः चैतन्यदेवः अस्य ग्रन्थस्य प्रेरणादाता आसीत्। तस्मिन् समये बङ्गदेशे मुग्धबोधस्य प्रचलनं नासीत्, व्याकरणचर्चायां कलापस्य एव एकाधिपत्यं दृश्यते। निमाइ पण्डितः मुख्यतः कातन्त्रस्य अध्यापनायां निमग्नः आसीत्। गयाधामतः नवद्वीपं प्रत्यागत्य कृष्णप्रेमाविष्टः गौराङ्गसुन्दरः व्याकरणस्य कृष्णमूलकव्याख्यानानि दातुम् आरब्धवान्। उच्यते चैतन्यभागवते–

**आविष्ट हइया प्रभु करेन व्याख्यान। सूत्र–वृत्ति–टीकाय सकल हरिनाम॥**
**प्रभु वले सर्वकाले सत्य कृष्णनाम। सर्वशास्त्रे कृष्ण वइ ना वलये आन॥**[2]

'सूत्र–वृत्ति–टीकायां सर्वत्र हरिनाम' इति भावादर्शः हरिनामामृतव्याकरणस्य मूलमन्त्रम्। शास्त्रे च विहितम्–

**यस्मिन् शास्त्रे पुराणे वा हरिभक्तिर्न दृश्यते।**
**श्रोतव्यं नैव तच्छास्त्रं यदि ब्रह्मा स्वयं वदेत्॥**

भगवतः श्रीकृष्णस्य विविधाः अवताराः विलासमयलीलाश्च ग्रन्थेऽस्मिन् निबद्धाः। व्याकरणाध्ययनेन शब्दचरित्रलाभः तथा देवचरित्रमननस्य परमलाभः अस्य व्याकरणस्य मुख्यवैशिष्ट्यम्। श्रीहरेः कृपालाभाय वैयाकरणानां परमाकाङ्क्षितं मात्रालाघवमपि गोस्वामिपादेन तिरस्कृतम्–

**मात्रालाघवमात्रं पुत्रोत्सव इति परेऽभिमन्यते।**
**हरिनामाक्षरलाभाद् वयं त्वमीदृक् तिरस्कुर्मः॥**[3]

हरिनामामृतव्याकरणस्य रूपद्वयं प्राप्यते– संक्षिप्तं बृहत् च। रूपद्वयं जीवगोस्वामिना एव विरचितम्। केषाञ्चिदाचार्याणां मतेन संक्षिप्तरूपस्य रचयिता सनातनगोस्वामी रूपगोस्वामी वा। हरिनामामृते सूत्रसंख्या 3162 इति। प्रकरणानि सप्त–संज्ञा–सन्धिप्रकरणम्, विष्णुपदप्रकरणम्, आख्यातप्रकरणम्, कारकप्रकरणम्, कृदन्तप्रकरणम्, समासप्रकरणम्, तद्धितप्रकरणञ्च। लघुरूपेऽपि सप्त प्रकरणानि दृश्यन्ते, परन्तु सूत्रसंख्या 757 इति। यद्यपि इदं व्याकरणं पाणिनिं कलापञ्च अनुसृत्य विरचितं तथापि भगवद्भक्तिविधानाय सूत्र–वृत्ति–उदाहरणेषु विशेषतः संज्ञासूत्रेषु श्रीहरेः तथा तद्विषकवस्तुभावानां च नामानि प्रयुक्तानि। एते हरिनाममयाः संज्ञाशब्दाः यदृच्छाक्रमेण न व्यवहृताः। संज्ञानिर्देशे गोस्वामिना गभीरमननशीलतायाः परिचयः दीयते। एतेषां संज्ञाशब्दानां धर्मीयतात्पर्यविश्लेषणं तथा च संज्ञिभिः सह संज्ञानां सम्बन्धविचारः प्रबन्धस्यास्य विषयः।

### संज्ञाशब्दानाम् अध्ययनम्

#### संज्ञाप्रकरणम्

**सर्वेश्वरः** 'तत्रादौ चतुर्दश सर्वेश्वराः' (ह.ना. 1.2) इति सूत्रेण वर्णक्रमे आदौ चतुर्दश वर्णाः सर्वेश्वर–नामानः भवन्ति। यथा– अ आ इ ई उ ऊ ऋ ऌ ॡ ए ऐ ओ औ। सर्वेश्वरः इति भगवान् श्रीकृष्णः। सर्वेषां स्थावरजङ्गमादीनाम् ईश्वरः भगवान् श्रीकृष्णः। यथा चराचरमिदं जगत् भगवतः श्रीकृष्णस्य अधीनम्, तथैव कादीनां व्यञ्जनवर्णानामुच्चारणम् एषामधीनम् इति सर्वेश्वराः। कलापव्याकरणे एते वर्णाः 'स्वराः' इति नाम्ना प्रसिद्धाः। 'स्वरः' इति पदेन सह उच्चारणसाम्यविधानाय अपि 'सर्वेश्वरः' इति संज्ञा प्रदत्ता।

**दशावताराः** 'दश दशावताराः' (ह.ना. 1.3) इति सूत्रतः ज्ञायते यत् सर्वेश्वरेषु आदौ दश वर्णाः दशावतार–नाम्ना अभिधीयन्ते। यथा– अ.... ऌ इति। परमेश्वरस्य श्रीकृष्णस्य दश अवताराः– मत्स्यः कूर्मः वराहः नृसिंहः वामनः परशुरामः रामचन्द्रः श्रीकृष्णः बुद्धः कल्किश्च। उच्यते पद्मपुराणे–

**मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः।**
**रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश॥**[4]

संख्यासाम्यवशात् अकारादीनां दशवर्णानां 'दशावताराः' इति नामकरणं कृतम्।

**एकात्मकः** अत्र सूत्रम्– 'तेषां द्वौ द्वावेकात्मकौ' (ह.ना. 1.4)। दशावतारवर्णानां मध्ये क्रमेण द्वौ द्वौ प्रत्येकं परस्परञ्च 'एकात्मक' नाम्ना प्रसिद्धौ। यथा– अ आ इति

द्वौ, इ ई इति द्वौ एकात्मकौ। एकः अद्वितीयः आत्मस्वरूपः यस्य सः एकात्मकः। एकात्मकपदेन जीवब्रह्मैक्यं प्रतिपादितम्। भगवत्प्राप्तिः तथा च ब्रह्मत्वप्राप्तिः एव जीवस्य परमं लक्ष्यम्। श्रीकृष्णस्य नामश्रवणभजनकीर्तनैः भगवत्प्राप्तिर्भवति। परमार्थलाभसूचकमिदं नामकरणम्।

**वामनः** 'पूर्वो वामनः' (ह.ना. 1.5) इति सूत्रेण एकात्मकानां पूर्वः पूर्वः वर्णः वामन–नाम्ना अभिधीयते। श्रीकृष्णस्य पञ्चमः अवतारः वामनः बलिदमनाय धरातले आविर्भूतः। वामनः ह्रस्वविग्रहं प्रकटीकृत्य दैत्यराजं बलिं निकषा त्रिपादपरिमितां भूमिं याचितवान्। आकृतिसादृश्यवशात् ह्रस्वस्वराः वामन–नाम्ना प्रसिद्धाः। भागवतानुसारेण वामनः श्रीकृष्णस्य पञ्चदशः अवतारः– **'पञ्चदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपम्॥'**[5]

**त्रिविक्रमः** 'परस्त्रिविक्रमः' (ह.ना. 1.6) इति सूत्रेण एकात्मकानां परः परः वर्णः त्रिविक्रमसंज्ञः भवति। वामनरूपधारी विष्णुः बलेः सकाशात् त्रिपादपरिमितां भूमिं प्राप्य बृहद्वपुः प्रकटीकृत्य त्रिलोके पादत्रयं समाविष्टवान्। प्रथमपादेन पृथिवी व्यापृता, द्वितीयपादेन आकाशं, तृतीयेन स्वर्गराज्यं च आवृतम्। दीर्घाकृतिवशात् दीर्घोच्चारणवशाच्च दीर्घस्वराणां त्रिविक्रमत्वं सिद्ध्यति।

**महापुरुषः** 'त्रिमात्रो महापुरुषः' (ह.ना. 1.7)। ह्रस्वः दीर्घश्च वर्णः यदा त्रिमात्रत्वेन उच्चार्यते, तदा तस्य महापुरुषसंज्ञा भवति। 'पाणिनीये व्याकरणे अस्य प्लुतसंज्ञा स्यात्। ह्रस्वः एकमात्रः, दीर्घः द्विमात्रः, प्लुतश्च त्रिमात्रः। शास्त्रान्तरे महापुरुषस्य लक्षणमुच्यते न्यग्रोधपरिमण्डलः महापुरुषः। परन्त्वत्र महापुरुषशब्देन सर्वसल्लक्षणान्वितः पुरुषः उच्यते। अयं पुरुषः भगवान् श्रीकृष्णः इति भगवन्नामता।

**ईश्वरः** 'अ–आ–वर्जिताः सर्वेश्वरा ईश्वराः' (ह.ना. 1.8)। यथा– इ...औ। सर्वे स्वरवर्णाः एकत्र सर्वेश्वरनाम्ना अभिधीयन्ते। इवर्णादयः स्वराः ईश्वराः इति ज्ञेयाः। इवर्णात् प्रारभ्यते इति ईश्वराः। यथा इकारादयः वर्णाः सर्वेश्वरस्य अपि अन्तर्गताः, तद्वत् 'ईश्वर'शब्दः 'सर्वेश्वर' शब्दस्य अन्तर्गतः। ईश्वरशब्देन मायानियन्ता भगवान् उच्यते।

**ईशः** 'दशावतारा ईशाः' (ह.ना. 1.6) इति सूत्रानुसारेण अ–आ–वर्जिताः दशावताराः ईश–नाम्ना ज्ञायन्ते। यथा– इ लृ। ईशशब्देन मायाच्छादितस्य जगतः नियामकः श्रीकृष्णः उच्यते।

**अनन्तः** 'अ–आ–इ–ई–उ–ऊ अनन्ताः' (ह.ना. 1.10)। अनन्तशब्देन सहस्रफणविशिष्टः शेषनागः बोध्यः। पाणिनिव्याकरणे एते वर्णाः 'अण्'संज्ञकाः भवन्ति। 'अण्'शब्देन सह उच्चारणसाम्यवशात् अनन्तनामकरणम्।

**चतुःसनाः** अत्र सूत्रम् 'इ–ई–उ–ऊ चतुःसनाः' (ह.ना. 1.11)। चतुःसनशब्देन सनक–सनातन–सनन्दन–सनत्कुमाराः उच्यन्ते। सनकादयः ब्रह्मणाः चत्वारः मानसपुत्राः। उच्यते श्रीमद्भागवते– 'मानसा मे सुता युष्मत्पूर्वजाः सनकादयः। चेरुर्विहायसा लोकाल्लोकेषु विगतस्पृहाः।। एते सनकादयः महर्षयः विगतस्पृहाः सन्तः भगवन्माहात्म्यप्रचाराय त्रिभुवनेषु पर्यभ्रमन्। हरिभक्तिविलासोत्कर्षैः ते जराव्याधिदुःखरहितं परमानन्दस्वरूपं वैकुण्ठलोकं गतवन्तः। एतेषां हरिभक्तानां भक्त्याधिक्यप्रदर्शनाय इकारादयः चत्वारः वर्णाः चतुःसन–नाम्ना अभिहिताः। पाणिनीये व्याकरणे एते वर्णाः 'इण्'संज्ञकाः भवन्ति। अत्रापि उच्चारणतुल्यत्वात् 'चतुःसनाः' इति नामकरणमिति वक्तुं शक्यते।

**चतुर्भुजः** 'उ ऊ ऋ ॠ चतुर्भुजाः' (ह.ना. 1.12)। चत्वारः भुजाः येषां ते चतुर्भुजाः। चतुर्भुजशब्देन भगवान् नारायणः उच्यते।

**चतुर्व्यूहः** अत्र सूत्रम्– 'ए–ऐ–ओ–औ चतुर्व्यूहाः' (ह.ना.1.13)। पञ्चरात्रतत्त्वे प्रथमरात्रौ भगवता विष्णुना चतुर्व्यूहतत्त्वं व्याख्यातम्। सृष्टिस्थितिविनाशेभ्यः भगवता चत्वारि रूपाणि प्रकटितानि। एतानि रूपाणि यथा– वासुदेवः श्रीकृष्णः, सङ्कर्षणः बलरामः, श्रीकृष्णपुत्रः प्रद्युम्नः, प्रद्युम्नपुत्रः अनिरुद्धश्च। वासुदेवः चतुर्व्यूहतत्त्वस्य मुख्यावतारः, सत्त्वगुणान्वितः, चैतन्यस्वरूपः, परमसत्यस्य प्रकाशस्वरूपः परमात्मा एव। श्रीकृष्णस्य अग्रजः सङ्कर्षणः बलरामः जीवात्मनः प्रतिनिधिभूतः। रुक्मिणीपुत्रः प्रद्युम्नः रजोगुणान्वितः कर्मशक्तेः नियन्ता च। प्रद्युम्नपुत्रः अनिरुद्धः तमोगुणान्वितः संहारकारकश्च। सृष्टिस्थितिविनाशाः चतुर्व्यूहतत्त्वाधीनाः।

**विष्णुचक्रम्** 'अम् इति विष्णुचक्रम्' (ह.ना. 1.14) इति सूत्रेण अनुस्वारस्य विष्णुचक्र–संज्ञा भवति। अत्र अकारः उच्चारणार्थे प्रयुक्तः। अनुस्वारः आकृत्या चक्रसदृशः, तस्मादियं संज्ञा। विष्णोः चक्रस्य नाम सुदर्शनम्।

**विष्णुचापः** 'अँ इति विष्णुचापः' (ह.ना. 1.15) अर्थात् अर्धचन्द्राकृतिवर्णः विष्णुचापनाम्ना अभिधीयते। चापशब्देन धनुरुच्यते। नामकरणे अत्रापि आकारतुल्यत्वं विवेचितम्।

**विष्णुसर्गः** 'अः इति विष्णुसर्गः' (ह.ना. 1.16) अर्थात् बिन्दुद्वयाकारस्य वर्णस्य विष्णुसर्ग–संज्ञा भवति। कातन्त्रे अयं विसर्ग–नाम्ना प्रसिद्धः। विष्णोः सर्गः सृष्टिः

विष्णुसर्गः इति। ब्रह्मलोकस्य उपरि वैकुण्ठध्रुवलोकयोः बिन्दुद्वयाकारत्वेन विसर्गस्य विष्णुसर्गरूपेण अभिधानम्। विसर्गेण सह उच्चारणसाम्यवशादपि ईदृशं नामकरणम्।

**विष्णुजनः** 'कादयो विष्णुजनाः' (ह.ना. 1.17) इति सूत्रेण ककारादयः हकारान्ताः वर्णाः विष्णुजन–नाम्ना ज्ञायन्ते। यथा– क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह इति। कलापे एतेषां व्यञ्जनसंज्ञा, उच्चारणसाम्ये अत्र विष्णुजनसंज्ञा। दार्शनिकदृष्ट्या यथा स्थावरजङ्गमादयः सर्वे जनाः सर्वव्यापकस्य भगवतः विष्णोः अधीनाः, तद्वत् ककारादयः वर्णाः उच्चारणविषये अकारादीनां सर्वेश्वरादीनाम् अधीनाः। विष्णुजनशब्देन सुनन्दनप्रमुखाः पार्षदाः उच्यन्ते।

**वलः** 'य–व–वर्जितास्तु वलाः' (ह.ना. 1.18)। अस्य सूत्रस्य अर्थः य–व–भिन्नाः विष्णुजनाः वल–संज्ञकाः भवन्ति। पाणिनिव्याकरणे एते 'रल'–नाम्ना ज्ञायन्ते। अत्र वलशब्दः बलरामवाची, तस्मात् भगवन्नामता। भगवान् श्रीकृष्णः एकोनविंशे अवतारे बलरामरूपेण आविर्भूतः अभूत्। उच्यते श्रीभागवते– **'एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरम्॥'**[8] अत्र रामशब्देन बलरामः बोध्यः।

**विष्णुवर्गः** 'ते मान्ताः पञ्च पञ्च विष्णुवर्गाः' (ह.ना. 1.16) अर्थात् विष्णुजनेषु पञ्च पञ्च वर्णाः विष्णुवर्गाः भवन्ति। यथा– क ख ग घ ङ इति कवर्गः, एवं चवर्गः, टवर्गः, तवर्गः, पवर्गश्च। अत्र वर्गशब्देन सह विष्णोः नामयोजनात् भगवन्नामता। विष्णुवर्गशब्देन सत्यलोकोपरि वैकुण्ठस्य अधीश्वरादयः उच्यन्ते।

**विष्णुगणः** 'ञ्-वर्जितास्तु विष्णुगणाः' (ह.ना.1.20) इति सूत्रेण ञ–भिन्नाः विष्णुवर्गाः विष्णुगण–संज्ञकाः भवन्ति।

**हरिकमलम्** 'क–च–ट–त–पा हरिकमलानि' (ह.ना. 1.21) अर्थात् वर्गाणां प्रथमस्थाः वर्णाः हरिकमलनाम्ना प्रथिताः। ककारादित्वात् कमलमिति नामकरणम्।

**हरिखड्गाः** 'ख–छ–ठ–थ–फा हरिखड्गाः' (ह.ना. 1.22)। अस्य सूत्रस्य अर्थः वर्गाणां द्वितीयवर्णाः हरिखड्ग–नाम्ना ज्ञायन्ते। खकारादित्वात् खड्गः इति संज्ञा। हरिखड्गशब्देन नन्दकः उच्यते।

**हरिगदा** 'ग–ज–ड–द–वा हरिगदाः' (ह.ना.1.23), इति सूत्रेण वर्गीय–तृतीयवर्णानां हरिगदासंज्ञा स्यात्। गकारादित्वात् एतेषां हरिगदाः इति नामकरणम्। हरिगदाशब्देन कौमोदकी उच्यते।

**हरिघोषः** 'घ–झ–ढ–ध–भा हरिघोषाः' (ह.ना. 1.24) अर्थात् वर्गाणां चतुर्थवर्णाः हरिघोष–नाम्ना अभिधीयन्ते। घकारादित्वात् हरिघोषसंज्ञा। हरिघोषपदस्य व्याख्यायां टीकाकारेण उक्तम्– 'घोषो गोपपल्ली, 'घोष–आभीरपल्ली' स्यादित्यमरः। हरिसम्बन्धी घोषो हरिघोषः नन्दालयः प्रभृतिः। किंवा नादेन घोषेण गुहां प्रविष्टः इति श्रीभागवतोक्त-त्वात् हरेः प्रणवोच्चारणादिश्चेति हरिघोष – शब्दस्यार्थोऽतोऽस्य भगवन्नामता' (ह.ना. 1.24 टीका)।

**हरिवेणुः** 'ङ–ञ–ण–न–मा हरिवेणवः' (ह.ना. 1.25)। वर्गाणां पञ्चमवर्णाः अर्थात् नासिक्यवर्णाः हरिवेणुसंज्ञां लभन्ते। हरिवेणुशब्देन हरेः वंशी बोध्या। वंश्याः नासिक्यध्वनित्वात् नासिक्यवर्णानां हरिवेणुसंज्ञा कृता।

**विष्णुदासः** 'त एतद्वर्जिता विष्णुदासाः' (ह.ना. 1.26) इति सूत्रेण हरिवेणुव्यतीताः विष्णुवर्गनामानः वर्णाः विष्णुदाससंज्ञां लभन्ते। यथा– क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध प फ ब भ इति। विष्णुदासशब्देन सारङ्ग–पत्रि–प्रभृतयः उच्यन्ते।

**हरिमित्रम्** 'य–र–ल–वा हरिमित्राणि' (ह.ना. 1.27)। एते अन्तःस्थाः वर्णाः। हरेः मित्राणि हरेः अन्तःस्थले सदा स्थानं लभन्ते इति ज्ञापनाय अन्तःस्थवर्णानाम् इयं संज्ञा। हरिमित्रशब्देन नन्दादिरुच्यते। क्षितीशचन्द्र चट्टोपाध्यायमहोदयेन हरिमित्रसंज्ञा-प्रसङ्गे उच्यते– 'The fact is that the word Yadava begins with the semi–vowel 'y' and the Yadavas are the relations (Mitras) of Hari. Hence the semi–vowels are designated Harimitra.'

**हरिगोत्रम्** अत्र सूत्रम्– 'श–ष–स–हा हरिगोत्राणि' (ह.ना. 1.28)। हरिगोत्रशब्देन कन्दर्प–शाम्बादयः ज्ञाप्यन्ते। श्रीकृष्णरुक्मिण्योः पुत्रः प्रद्युम्नः कामदेवस्य अवतारः। श्रीकृष्ण–जाम्बवत्योः पुत्रः शाम्बः। शाम्बशब्दस्य आदिवर्णः शकारः, तस्मात् शकारादीनाम् ऊष्मवर्णानां हरिगोत्रसंज्ञा प्रदत्ता।

**शौरिः** 'श–ष–साः शौरयः' (ह.ना. 1.26)। पाणिनीये व्याकरणे एते वर्णाः शर्–प्रत्याहारेण ज्ञाप्यन्ते। उच्चारणसाम्यात् शौरिः इति संज्ञा। शौरि–शब्दस्य अर्थः शूरवंशीयः वसुदेवः। यथा भागवते– 'क्वचित् कुरुणां परमः सुहृन्नो भामः स आस्ते सुखमङ्गशौरिः'।[10] **वैष्णवः** 'विष्णुदास–हरिगोत्राणि वैष्णवाः' (ह.ना. 1.30) अर्थात् क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध प फ ब भ श ष स ह एते वर्णाः वैष्णव–संज्ञकाः भवन्ति। विष्णुः यस्य अधिदेवता स एव वैष्णवः। वैष्णव–शब्देन शुक–प्रह्लादादयः कन्दर्पादयश्च उच्यन्ते।

**गोपालः** 'हरिगदा–हरिघोष–हरिवेणु–हरिमित्राणि–हश्च गोपालाः' (ह.ना. 1.31) इति सूत्रेण ग घ ङ ज झ ञ ड ढ ण द ध न ब भ म य र ल व ह एते वर्णाः गोपाल–नामानः भवन्ति। वस्तुतः एते घोषवर्णाः। घोषपदवीधारिणः जनाः गोपालकाः गोरक्षकाश्च भवन्ति इति प्रतिपादनाय एते वर्णाः गोपाल–नाम्ना अभिधीयन्ते। अत्र लक्षणीयं यत् 'गोपाल'शब्दः घोषवर्णेन गकारेण प्रारभ्यते। यादवः 'यादवा अन्ये' (ह.ना. 1.32) अर्थात् गोपालभिन्नाः विष्णुजनाः यादव – नाम्ना ज्ञायन्ते। यथा– क ख च छ ट ठ त थ प फ श ष स इति। यदुकुलोद्भवाः जनाः एव यादवाः। गोपालकभिन्नाः जनाः यादवाः भवन्तीति कारणात् एते वर्णाः यादवसंज्ञकाः भवन्ति। यद्यपि यादवेषु केचित् गोपालकाः भवन्ति तथापि वृन्दावनस्थत्वेन गोपालाः, मथुरास्थत्वेन यादवाः इति भेदो विवक्षितः। क्षितीशचन्द्र चट्टोपाध्यायमहोदयस्य मतेन अघोषवर्णानां 'यादवः' इति नामकरणं न समुचितम्, यतः 'यादव' शब्दः घोषवर्णेन यकारेण प्रारम्यते। तेनोक्तम्– 'This is rather unfortunate since both Gopala and Yadava begin with ghosavat letters. The author of HN thought that the relations of Visnu were either Gopalas or Yadavas, consequently he divided the aghosa and ghosavat letters into Gopalas and Yadavas'.[11]

**सात्वतः** 'शौरि–वर्जितास्तु सात्वताः' (ह.ना. 1.33)। सूत्रस्य अर्थः– शौरि–वर्जिताः यादवाः अर्थात् क ख च छ ट ठ त थ प फ एते वर्णाः सात्वत–नामानः भवन्ति। सात्वत–शब्देन तद्वंशोत्पन्नाः जनाः उच्यन्ते। अथवा सत्–शब्दस्य अर्थः सत्त्वमूर्तिः भगवान् श्रीकृष्णः, स विद्यते येषाम् इति सत्वन्तः। ततः स्वार्थेऽण् सात्वताः वैष्णवाः इति।

**रामः** 'वर्णस्वरूपे रामः' (ह.ना. 1.37) अर्थात् वर्णस्य स्वरूपमात्रे रामशब्दः प्रदेयः। यथा अरामः, आरामः इति। कलापव्याकरणे कार–शब्दः प्रयुज्यते, यथा– अकारः आकारः इति। रामचन्द्रः श्रीकृष्णस्य सप्तमः अवतारः, श्रीभागवतानुसारेण अष्टादशः अवतारः। उक्तञ्च भागवते– 'नरदेवत्वमापन्नः सुरकार्यचिकीर्षया। समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्।। रघुनन्दनः श्रीरामचन्द्रः यथा एकामेव पत्नीं सीतादेवीं परिगृहीतवान्, तथा चायं रामशब्दः एकमेव वर्णं परिगृह्णाति।

**द्वयम्** 'तदादिद्वये द्वयम् (ह.ना. 1.38) अर्थात् वर्णद्वयवाच्ये द्वयसंज्ञा भवतीति। द्वयशब्दः लक्ष्मीनारायणवाचित्वात् तस्य भगवन्नामता। पद्मपुराणे द्वयमन्त्रस्य उल्लेखः अस्ति। मन्त्रोऽयं पञ्चविंशाक्षरसमन्वितः षड्भिः पदैः भूषितश्च। वाक्यद्वयपरः अयं मन्त्रः वैष्णवसम्प्रदाये अतीव महत्त्वपूर्णः। लक्ष्मीनारायणयोः कृपालाभाय अयं मन्त्रः जाप्यः।

अयं मन्त्रस्तु–'**श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः।**'

**विरिञ्चिः** 'आदेशो विरिञ्चिः' (ह.ना. 1.36)। आदेशस्य विरिञ्चिसंज्ञा भवति। विरिञ्चिः ब्रह्मा यथा एकं वस्तु गृहीत्वा अन्यदाकारं वस्त्वन्तरं करोति तथैव आदेशे एकं गृहीत्वा तत्स्थाने अन्यत् विधीयते।

**विष्णुः** 'आगमो विष्णुः' (ह.ना. 1.40)। आगमः मित्रवत् भवति। विष्णुः ब्रह्मरुद्रयोः सृष्टिसंहारयोः मध्ये आविर्भूय यथा पोषकः भवति, तथैव आगमः प्रकृतिप्रत्यययोः मध्ये आविर्भूय पोषकः भवतीति नामकरणं सिद्धम्।

**हरः** 'लोपो हरः' (ह.ना. 1.41) अर्थात् लोपस्य हरसंज्ञा भवति। हरः यथा संसारस्य नाशहेतुः भवति तथा लोपे वर्णस्य वर्णानां वा नाशः भवति।

**महाहरः** 'आत्यन्तिकलयहेतुः महाहरः' (ह.ना. 1.41 वृत्तिः) अर्थात् आत्यन्तिकलोपः महाहर–नाम्ना ज्ञायते। लोपस्य हरसंज्ञा कृता, तस्मात् आत्यन्तिकलोपस्य महाहरसंज्ञा युक्तिसंगता।

### सन्धिप्रकरणे व्यवहृताः संज्ञाः

**अतिदेशः** 'अन्यतुल्यत्वविधानमतिदेशः' (ह.ना.1.54 वृत्तिः)। अन्यतुल्यत्वस्य विधानम् अतिदेशसंज्ञं भवति।

**संसारः** 'अन्त्यसर्वेश्वरादिवर्णाः संसारसंज्ञाः' (ह.ना. 1.75) अर्थात् अन्त्यसर्वेश्वरः (अन्त्यस्वरः) आदिर्येषां ते अन्त्यसर्वेश्वरादयः। एते संसारनामानः भवन्ति। सम्यक् सारः संसारः श्रीकृष्णः इति संसारपदस्य भगवन्नामता। संसारसंज्ञाविषये क्षितीशचन्द्र चट्टोपाध्यायमहोदयेन उक्तम्– 'HN uses samsara for it probably because samsara is the end of our worldly existence and after the extinction of samsara there is salvation'.[13]

**सत्सङ्गः** अत्र सूत्रम्– 'मिथः संलग्नो विष्णुजनः सत्सङ्गसंज्ञः' (ह.ना. 1.82)। परस्परसंयुक्तः व्यञ्जनवर्णः सत्सङ्गसंज्ञां लभते। अष्टाध्याय्याम् अस्य संयोगसंज्ञा स्यात्। सज्जनैः हरिभक्तैः सह संयोगः सङ्गः वा सत्सङ्गः। सत्सङ्गः आत्यन्तिककल्याणकरः मोक्षस्य मार्गस्वरूपश्च।

### विष्णुपदप्रकरणे व्यवहृताः संज्ञाः

**नाम** 'अधातुविष्णुभक्तिकमर्थवन्नाम' (ह.ना. 2.1) अर्थात् धातून् स्वादि–तिबाद्याः विष्णुभक्तीश्च (विभक्तीश्च) वर्जयित्वा अर्थयुक्तः शब्दः नामसंज्ञां लभते। अविष्णुभक्तिकम्

इति अविष्णुभक्त्यन्तकम्। अष्टाध्याय्याम् अस्य प्रातिपदिकसंज्ञा भवति।

**विष्णुभक्तिः** 'स्वादि–तिबाद्या विष्णुभक्तयः' (ह.ना. 2.1 वृत्तिः) अर्थात् सुँ–औ–जस् तथा तिप्–तस्–अन्ति इत्यादीनां विष्णुभक्तिसंज्ञा भवति। कलापव्याकरणे एते विभक्तिनाम्ना अभिधीयन्ते। विष्णुभक्त्या मोक्षलाभो भवतीति भगवन्नामता। उच्चारणसाम्यात् विभक्तिस्थाने विष्णुभक्तिः।

**पुरुषोत्तमः** 'पुंलिङ्गः पुरुषोत्तमसंज्ञः' (ह.ना. 2.6 वृत्तिः)। पुरुषोत्तमशब्दः स्वयमेव पुंलिङ्गः। पुरुषोत्तमः नारायणः इति भगवन्नामता।

**लक्ष्मीः** 'स्त्रीलिङ्गो लक्ष्मीसंज्ञः' (ह.ना. 2.6 वृत्तिः)। स्त्रीलिङ्गत्वात् भगवद्वाचकत्वाच्च स्त्रीलिङ्गशब्दस्य लक्ष्मीसंज्ञा विहिता।

**ब्रह्म** 'नपुंसकलिङ्गो ब्रह्मसंज्ञः' (ह.ना. 2.6 वृत्तिः)। ब्रह्मशब्दस्य नपुंसकलिङ्गत्वात् इयमाख्या।

**अव्ययः** 'अलिङ्गः अव्ययसंज्ञः' (ह.ना. 2.6 वृत्तिः)। अलिङ्गशब्दस्य अव्ययसंज्ञा भवति। नास्ति व्ययः यस्य अव्ययः विष्णुः। उक्तं मार्कण्डेयपुराणे– 'नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे। पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च।।'

**विष्णुपदम्** 'विष्णुभक्तिसिद्धं विष्णुपदम्' (ह.ना. 27)। विष्णुभक्तिसिद्धम् अर्थात् विभक्तियुक्तं नाम धातुर्वा विष्णुपदसंज्ञां लभते। पाणिनेः पदसंज्ञायाः स्थाने विष्णुपदमिति संज्ञा कृता जीवगोस्वामिना। विष्णुभक्त्या यथा विष्णोः पदलाभः कृपालाभः वा भवति तद्वत् विष्णुभक्तियोगेन (विभक्तियोगेन) विष्णुपदसिद्धिः (पदसिद्धिः) भवतीति तात्पर्यम्।

**कृष्णः** 'अरामान्तः कृष्णसंज्ञः' (ह.ना. 2.11) अर्थात् अकारान्तः पुरुषोत्तमलिङ्गः शब्दः कृष्णसंज्ञां लभते। कृष्णशब्दः स्वयमेव कृष्णसंज्ञकः, तस्मात् इयमाख्या।

**बुद्धः** 'सम्बोधने सुर्बुद्धसंज्ञः' (ह.ना. 2.24) अर्थात् सम्बोधने बुद्धसंज्ञा स्यात्। पाणिनिना अत्र सम्बुद्धिसंज्ञा कृता। उच्चारणसाम्यात् सम्बुद्धेः बुद्धसंज्ञा। बुद्धः नारायणस्य नवमः अवतारः। श्रीमद्भागवते बुद्धः एकविंशः अवतारः– '**ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति।।**'[14]

**यदुः** 'शंसादयो यदु–संज्ञाः' (ह.ना. 2.27) अर्थात् नाम्नः उत्तरे प्रयुक्ताः शस्–टा–भ्याम्–भिस्–ङे–भ्याम्भ्यस्ङसिभ्याम्भ्यस्–ङस्–ओस्–आम्–ङि–ओस्–सुप्–इत्येते प्रत्ययाः यदु–संज्ञकाः भवन्ति। भगवान् श्रीकृष्णः यदुवंशे आविर्भूतः अभूत्। राजा यदुः अस्य वंशस्य प्रतिष्ठाता। तस्य पिता ययातिः, माता च देवयानी। **हरिः**

'इ–उ–रामान्तो हरि–संज्ञः' (ह.ना. 2.30) अर्थात् इकारान्ताः उकारान्ताश्च-पुरुषोत्तमलिङ्गाः अर्थात् पुंलिङ्गाः शब्दाः हरिसंज्ञकाः भवन्ति। अत्र लक्षणीयं यत् हरि–शब्दः स्वयमेव हरिसंज्ञकः।

**गोविन्दः** 'इद्वयस्य ए, उद्वयस्य ओ, ऋद्वयस्य अर्, लृद्वयस्य अल् गोविन्दसंज्ञः' (ह.ना. 2.32) अर्थात् ए–ओ–अर्–अल्–इत्येते गोविन्द–नामानः भवन्ति। अष्टाध्याय्याम् एते गुणसंज्ञां लभन्ते। गकारादित्वात् कृष्णनामत्वाच्च गुणस्थाने गोविन्दसंज्ञा।

**वृष्णिः** 'ङितो वृष्णिसंज्ञा' (ह.ना. 2.33)। ङ इत् यस्य स ङित्। ङित्–इत्यस्य वृष्णिसंज्ञा स्यात्। वृष्णिशब्दस्य अर्थः यादवः श्रीकृष्णः वा।

**वृष्णीन्द्रः** 'अद्वयस्य आ, इद्वयस्य ऐ, उद्वयस्य औ, ऋद्वयस्य आर्, लृद्वयस्य आल् वृष्णीन्द्र–संज्ञः, ए–ओ–स्थाने ऐ औ च' (ह.ना. 2.43) अर्थात् आ–ऐ–औ–आर्–आल्–इत्येते वृष्णीन्द्र–नाम्ना अभिधीयन्ते। अष्टाध्याय्याम् एते वृद्धिसंज्ञकाः भवन्ति। 'वृ' इति साम्यात् वृद्धिस्थाने वृष्णीन्द्रनामकरणम्। वृष्णीनां यादवानाम् इन्द्रः श्रेष्ठः वृष्णीन्द्रः श्रीकृष्णः।

**पाण्डवः** अत्र सूत्रम्– 'स्वादयः पञ्च पाण्डवाः' (ह.ना. 2.44)। सूत्रस्य अर्थः नाम्नः उत्तरे प्रयुक्ताः सुँ–औ–जस्–अम्–औट्–इत्येते प्रत्ययाः पाण्डव–नामानः भवन्ति। संख्यासाम्यात् स्वादिपञ्चप्रत्ययानां पाण्डवः इति नामकरणम्।

**राधा** 'तत्राबन्तलक्ष्मी राधासंज्ञा' (ह.ना. 2.63) अर्थात् आकारान्तः लक्ष्मीलिङ्गः (स्त्रीलिङ्गः) शब्दः राधासंज्ञकः भवति। राधाशब्दः स्वयमेव राधासंज्ञकः। श्रीराधा श्रीकृष्णस्य स्वकीया शक्तिः।

**गोपी** 'ई–ऊ–लक्ष्मीर्गोपीसंज्ञा' (ह.ना. 2.73) इति सूत्रेण ईकारान्तः ऊकारान्तश्च लक्ष्मीलिङ्गशब्दाः गोपीसंज्ञां लभन्ते। अष्टाध्याय्याम् एते शब्दाः नदीसंज्ञकाः भवन्ति। गोपीशब्दः स्वयमेव गोपीसंज्ञकः। श्रीकृष्णलीलायां गोपीनां महत्त्वपूर्णं स्थानमस्तीति गोपीसंज्ञया भगवन्नामता सिद्धा।

**उद्धवः** 'अन्त्यात् पूर्ववर्ण उद्धवसंज्ञः' (ह.ना. 2.80)। सूत्रस्य अर्थः अन्त्यवर्णात् पूर्ववर्णः उद्धवसंज्ञः स्यात्। पाणिनीये व्याकरणे अस्य नाम उपधा। उकारादित्वात् 'उपधा' इत्यस्य भगद्भक्तिसूचकः उद्धवः इति संज्ञा प्रदत्ता। उद्धवः आसीत् श्रीकृष्णस्य परमः सखा। उच्यते श्रीमद्भागवते– 'वृष्णीनां सम्मतो मन्त्री कृष्णस्य दयितः सखा। शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः।।'

**कृष्णस्थानम्** 'अब्रह्मपाण्डवाः शिश्च कृष्णस्थानसंज्ञा' (ह.ना. 2.81)। सूत्रस्य

अर्थः पुंलिङ्गात् स्त्रीलिङ्गाच्च परे स्वादयः पञ्च विभक्तयः (सुँ औ जस् अम् औ) शिश्च कृष्णस्थानसंज्ञकाः भवन्ति। पाणिनीये व्याकरणे अस्य सर्वनामस्थानमिति संज्ञा कृता। अत्र सर्वनामशब्दस्य स्थाने कृष्णशब्दः प्रयुक्तः।

**भगवान्** 'अकृष्णस्थान–सर्वेश्वरो भगवत्संज्ञः, तद्धिते यश्च' (ह.ना. 2.88) अर्थात् सर्वनामस्थानेभ्योऽन्यः स्वादिविभक्तिः सर्वेश्वरादितद्धितः यकारादितद्धितश्च भगवत्संज्ञः भवति। पाणिनिमतेन सर्वनामस्थानभिन्नस्वादौ यकारादौ अजादौ च प्रत्यये परतः पूर्वं भसंज्ञकं भवति। अत्र भ–इत्यस्य भगवत्संज्ञा, भकारादित्वात्। अत्र लक्षणीयं यत् सर्वनामस्थानभिन्नानां स्वादीनाम् अर्थात् शसादीनां पृथग्रूपेण यदुसंज्ञा कृता– 'शसादयो यदु–संज्ञाः'।

**कृष्णनाम** 'सर्वादीनि कृष्णनामानि' (ह.ना. 2.166) अर्थात् सर्व–विश्व–उभ–आदीनि सर्वनामानि अत्र कृष्णनामसंज्ञां लभन्ते। सर्वशब्दस्य स्थाने कृष्णशब्दस्य प्रयोगः भगवद्भक्तिवाचकः।

**निपातः** 'चादयो निपातसंज्ञाः' (ह.ना. 2.218)। सूत्रस्य अर्थः चादयः अव्ययशब्दाः निपात–नामानः भवन्ति।

### आख्यातप्रकरणे प्रयुक्ताः संज्ञाः

**धातुः** 'भूसन्नन्ताद्या धातवः' (ह.ना. 3.1) अर्थात् भू–सत्तायाम् इत्यादयः सनादिप्रत्ययान्ताश्च धातु–नामानः भवन्ति।

**वासुदेवः** 'स च सजातीयविजातीयानेकाधिकारस्य व्यापी वासुदेवसंज्ञः' (ह.ना. 3.2 वृत्तिः)। अधिकारः यदि सजातीये विजातीये च विषये प्रयुज्यते तर्हि तस्य वासुदेवसंज्ञा स्यात्। वासुदेवेन श्रीकृष्णेन सर्वं जगत् व्याप्तम्, तस्मात् सजातीय-विजातीयानेकाधिकारस्य वासुदेवसंज्ञा कृता।

**विभुः** 'तदवान्तरानेकाधिकारव्यापी विभुसंज्ञः' (ह.ना. 3.2 वृत्तिः) अर्थात् वासुदेवस्य अवान्तरानेकाधिकारव्यापी अधिकारः विभुसंज्ञः स्यात्। विभुशब्दस्य एकः अर्थः जीवात्मा। जीवात्मा यथा परमात्मनः अंशविशेषः, तथा वासुदेवस्य अवान्तरः अधिकारः विभुनाम्ना उच्यते।

**प्रभुः** 'केवलः प्रभुसंज्ञः' (ह.ना. 3.2 वृत्तिः) अर्थात् सूत्रविषये सामान्याधिकारः प्रभुनाम्ना उच्यते। प्रभुशब्देन भगवान् विष्णुः उच्यते इति भगवन्नामता।

**अच्युतः** 'तत्र प्रायो वर्तमानकाले तिबादयोऽष्टादश अच्युत–नामानः' (ह.ना. 3.3) (ह.ना. 3.3) अर्थात् वर्तमानकाले प्रयुक्तानां तिप्–तस्–अन्ति–सिप्–थस्–थ–

मिप्–वस्–मस्–ते–आते–अन्ते–से–आथे–ध्वे–ए –वहे–महे–एतेषां प्रत्ययानाम् अच्युतसंज्ञा भवति। सम्भवतः जीवगोस्वामिना दशलकाराणां स्थाने कृष्णस्य दशावताराणां नामानि प्रयोक्तव्यानि आसम्। परन्तु पूर्वमेव अकारादयः दश स्वराः दशावतारत्वेन संज्ञापिताः। अत्र वर्तमानकालस्य अच्युतसंज्ञा भवति। अच्युतः नारायणः इति भगवन्नामता। अच्युतशब्दस्य अर्थः नित्यः। क्षितीशचन्द्रचट्टोपाध्यायमहोदयेन व्याख्यातं यत्– 'For लट् it uses अच्युतः which means नित्य and as लट् is used of all times the name is very appropriate'.[15]

**विधिः** 'विधि–सम्भावनादौ यादादयो विधि–नामानः' (ह.ना. 3.4) अर्थात् विध्यर्थे सम्भावनार्थे च प्रयुक्ताः यात्–याताम्–युस्–यास्–यातम्–यात–याम्–याव–याम–ईत–ईयाताम्–ईरन्–ईथास्–ईयाथाम्–ईध्वम्–ईय–ईवहि–ईमहि–एते प्रत्ययाः विधिसंज्ञकाः भवन्ति। अत्र विधिलिङ् शब्दस्य स्थाने विधिशब्दस्य प्रयोगः। विदधाति विश्वमिति विधिः ब्रह्मा, अतः भगवन्नामता।

**विधाता** 'आशीः–प्रेरणादौ तुबादयो विधातृ–नामानः' (ह.ना. 3.5) अर्थात् आशीर्वादार्थे प्रेरणार्थे वा व्यवहृताः तुप्–ताम्–अन्तु–हि–तम्–त–आनिप्–आवप्–आमप्–ताम्–आताम्–अन्ताम्–स्व–आथाम्–ध्वम्–ऐप्–आवहैप्–आमहैप्–एते विधातृनाम्ना अभिधीयन्ते। विधाता परमेश्वरः भगवान् विष्णुः इति भगवन्नामता। विधाता अस्मभ्यम् आशीर्वादं प्रददाति स्वकार्ये च प्रेरयति इति एतेषां विधातृसंज्ञा।

**भूतेश्वरः** 'अनद्यतनभूते दिवादयो भूतेश्वर–नामानः' (ह.ना. 3.6)। सूत्रस्य अर्थः अनद्यतनभूतकाले प्रयुक्ताः दिप्–ताम्–अन्–सिप्–तम्–त–पम्–व–म–त–आताम्–अन्त–थास्–आथाम्–ध्वम्–इ–वहि–महि–एते प्रत्ययाः भूतेश्वर–नाम्ना ज्ञायन्ते। पूर्वापरनिशयोः द्वाभ्यां द्वाभ्यां यामाभ्यां सह दिवसोऽद्यतनः, तद्भिन्नः कालः अनद्यतनः। यामशब्दस्य अर्थः प्रहरः घटिकात्रयपरिमितः समयः। अनद्यतनभूते भूतेश्वरस्य महादेवस्य नामग्रहणं भगवद्भक्तिविधायकम्। भूतेश्वरः इति संज्ञायां भूतशब्दः विद्यते।

**भूतेशः** 'भूते दिवादयो भूतेश–नामानः' (ह.ना. 3.7)। अतीतकाले प्रयुक्तानां दिवादीनां भूतेशसंज्ञा स्यात्। भूतानां प्राणिनाम् ईशः भूतेशः महादेवः इति भगवन्नामता। भूतेशसंज्ञायामपि भूत–शब्दः दृश्यते।

**अधोक्षजः** 'परोक्षभूते णलादयोऽधोक्षज–नामानः' (ह.ना.3.8) इति सूत्रेण परोक्षे अतीते प्रयुक्ताः णल्-अतुस्-उस्–थल्–अथुस्–अ–णल्–व–म–ए–आते–इरे–से–आथे–ध्वे–ए–वहे–महे–एते प्रत्ययाः अधोक्षज–संज्ञकाः भवन्ति।

अधोक्षजः भगवतः विष्णोः अपरं नाम। अधःकृतम् अक्षजम् इन्द्रियज्ञानं येन स अधोक्षजः। भगवान् श्रीकृष्णः इन्द्रियज्ञानातीतः। अक्ष्णोः परं परोक्षम्। इन्द्रियातीतरूपार्थ–साम्यात् परोक्षे अतीते अधोक्षजनामकरणं तात्पर्यपूर्णम्। श्रीकृष्णस्य अधोक्षजरूपस्य वर्णनं श्रीमद्भागवते प्राप्यते– 'तं मुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोक्षजः। करेण कर्णमूलेऽन्यथा त्वाष्ट्रं मरुत्पतिः।।'[16] अर्थात् भगवान् अधोक्षजः हिरण्याक्षस्य कर्णमूले वज्रतुल्येन हस्तेन चपेटाघातमकरोत्।

**कामपालः** 'आशिषि यात्–यास्तामित्यादयः कामपाल–नामानः' (ह.ना. 3.6) इति सूत्रेण आशीर्वादार्थे प्रयुक्तानां यात्–यास्ताम्–यासुस्–यास्–यास्तम्–यास्त–यासम्–यास्व–यास्म–सीष्ट–सीयास्ताम्–सीरन्–सीष्ठास्–सीयास्थाम्–सीध्वम्–सीय सीवहि–सीमहि–एतेषां प्रत्ययानां कामपालसंज्ञा भवति। कामपालः बलदेवस्य नामान्तरमिति भगवन्नामता सिद्धा।

**बालकल्किः** 'अर्हार्थेऽनद्यतने भविष्यति च तादयो बालकल्कि–नामानः' (ह.ना. 3.10) अर्थात् योग्यार्थे सति अनद्यतनभविष्यति तादयः अष्टादश प्रत्ययाः बालकल्कि–नाम्ना अभिधीयन्ते। तादयः यथा– ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे इति।

**कल्किः** 'भविष्यत्काले स्यत्यादयः कल्कि–नामानः' (ह.ना. 3.11) इति सूत्रानुसारेण भविष्यति प्रयुक्ताः स्यति–स्यतस्–स्यन्ति–स्यसि–स्यथस्–स्यथ–स्यामि–स्यावस्–स्यामस्–स्यते–स्येते–स्यन्ते–स्यसे–स्येथे–स्यध्वे–स्ये–स्यावहे–स्यामहे एते प्रत्ययाः कल्कि–नाम्ना ज्ञायन्ते। विष्णोः दशमः अवतारः कल्किः कलियुगस्य अन्ते आविर्भूय अधर्मान् विनश्य धर्मस्थापनं करिष्यति। अतः भविष्यत्कालस्य कल्किनामकरणमतीव प्रासङ्गिकम्। अनद्यतनभविष्यतः बालकल्किः नाम अपि युक्तम्। कल्कि–अवतारस्य वर्णना प्राप्यते श्रीभागवते– 'अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः।।'[17]

**अजितः** 'साकाङ्क्षं यत्र क्रियातिक्रमो निर्दिश्यते, तत्र कार्यकारणयोः स्यदादिका अजित–नामानो भूते भविष्यति च' (ह.ना. 3.12) अर्थात् साकाङ्क्षं यथा स्यात् तथा यत्र क्रियायाः अनिष्पत्तिर्निर्दिश्यते तत्र कार्यकारणयोः गम्यमानयोः अतीते भविष्यति च काले स्यत्–आदयः अष्टादश प्रत्ययाः अजितनामानः भवन्ति। स्यदादयस्तु–स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि इति। अष्टाध्याय्याम् अयं लकारः लृङ्–नाम्ना

अभिहितः। न जितः न केनापि पराजितः ऐश्वर्येण इति अजितः श्रीकृष्णः। 'वेधाः शार्ङ्गीऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः' इति सहस्रनामपर्याये पठितः।

**पृथुः** 'पित् पृथुः' (ह.ना. 3.13)। परामः (पकारः) इत् यस्य स पित्। पित् पृथुसंज्ञः भवति। पवर्णसाम्यात् पित् इत्यस्य पृथु–संज्ञा भवति। भागवतानुसारेण पृथुः श्रीकृष्णस्य नवमः अवतारः– 'ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः'।[18]

**नृसिंहः** 'णित् नृसिंह' (ह.ना. 3.14)। नृसिंहः भगवतः विष्णोः दशावताराणां मध्ये चतुर्थः पूर्णावतारः। सः दैत्यपतिं हिरण्यकशिपुं हत्वा जगति धर्मं स्थापितवान्। भागवतानुसारेण नृसिंहः श्रीकृष्णस्य चतुर्दशः अवतारः। उक्तञ्च भागवते– 'चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम्। ददार करजैरूरावेरकां कटकृद्यथा।।[19]

**कपिलः** 'कित् कपिलः' (ह.ना. 3.15)। ककारः इत् यस्य स कपिलनामा भवति। ककारसाम्यात् 'कपिलः' इति नामकरणम्। कपिलः सिद्धः मुनिः। उच्यते गीतायाम्– 'गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः'[20] स तु विष्णोः अवतारविशेषः, सांख्ययोगप्रचाराय धरातले आविर्भूतः। उच्यते श्रीमद्भागवते– 'पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्।।'[21]

**निर्गुणः** 'ङिन्निर्गुणः' (ह.ना. 3.16)। ङित् निर्गुणसंज्ञः भवति। निर्गुणः सत्त्वरजस्तमोगुणातीतः परमेश्वरः।

**कंसारिः** 'किच्च ङिच्च कंसारिः' (ह.ना. 3.17)। कंसस्य अरिः कंसारिः श्रीकृष्णः। ककारम् अनुस्वारं च नीत्वा कंसारिः इति संज्ञा विहिता।

**शिवः** 'शित् शिवः' (ह.ना. 3.18)। शकारसाम्यात् शित् इत्यस्य शिव–संज्ञा भवति।

**परपदम्** 'तिबादिनवनवानां पूर्वपूर्वाणि परपदसंज्ञानि (ह.ना. 3.16) इति सूत्रेण तिबादिनवनवानां पूर्वपूर्वाणि नव नव परपदसंज्ञानि भवन्ति। परस्मैपदमित्यस्य अत्र परपदसंज्ञा भवति। परपदशब्देन वैकुण्ठादिकमुच्यते इति भगवन्नामता।

**आत्मपदम्** 'उत्तरोत्तराणि आत्मपदसंज्ञकानि' (ह.ना. 3.20) अर्थात् तिबादिनवनवानाम् उत्तरोत्तराणि नव नव आत्मपदसंज्ञकानि भवन्ति। आत्मनेपदमित्यस्य स्थाने आत्मपदसंज्ञा। आत्मपदं ब्रह्मपदमिति भगवन्नामता।

**कृष्णधातुकः** 'अच्युतादयः पञ्च शिवश्च कृष्णधातुकाः' (ह.ना. 3.22)। अर्थात् अच्युत–विधि–विधातृ–भूतेश्वर–भूतेश इत्येतेषु कालेषु प्रयुक्ताः प्रत्ययाः शित्–

प्रत्ययाश्च कृष्णधातुकसंज्ञकाः भवन्ति। पाणिनीये व्याकरणे एते सार्वधातुकनाम्ना ज्ञायन्ते। कृष्णः पूर्णावतारः इति सार्वधातुकस्य कृष्णधातुकसंज्ञा। कृष्णनामोच्चारणात् अत्र भगवन्नामता।

**रामधातुकः** 'अन्ये प्रत्यया रामधातुकाः' (ह.ना. 3.23)। कृष्णधातुकभिन्नाः अन्ये प्रत्ययाः रामधातुकसंज्ञकाः भवन्ति। पाणिनिव्याकरणे एते आर्धधातुकनाम्ना अभिधीयन्ते। रामः अंशावतारः इति आर्धधातुकस्य रामधातुकसंज्ञा। रामनामोच्चारणात् भगवन्नामता सिद्धा।

**उपेन्द्रः** 'प्रादय उपेन्द्रसंज्ञा धातुयोगे, ते च प्राक्' (ह.ना. 3.42) इति सूत्रेण प्र-परा–अप–सम्–अनु–अव–निर्–दुर्–अभि–वि–अधि–सु–उद्–अति–नि–प्रति–परि–अपि–उप–आङ्–एते धातुभिः योगे उपेन्द्रसंज्ञां लभन्ते। उपेन्द्राः धातोः पूर्वे प्रयुज्यन्ते। अष्टाध्याय्याम् एते उपसर्गनाम्ना कथिताः। उच्चारणसाम्यवशात् उपसर्गस्य उपेन्द्रनामकरणम्। उपेन्द्रः विष्णोः नामान्तरम्।

**दामोदरः** 'दाप्–दैप्–दीङो विना दा–धा दामोदरसंज्ञाः' (ह.ना. 3.54)। सूत्रस्य अर्थः दाप्–लवने, दैप्–शोधने, दीङ्–क्षये इत्येतान् विना दा–दाञ्–देङ्–दो–धा–धेट्–इत्यादयः धातवः दामोदरसंज्ञकाः भवन्ति। दामः रज्जुरुदरे यस्य दामोदरः श्रीकृष्णः। दामोदरशब्देन भगवतः बाल्यलीला उल्लिखिता इति भगवन्नामता। 'दा'कारादित्वात् दा–धा–इत्यनयोः दामोदरसंज्ञा।

**नरः** 'पूर्वो नरः' (ह.ना. 3.73) अर्थात् द्विरुक्तस्य पूर्वः अंशः नर–नाम्ना अभिधीयते। अष्टाध्याय्याम् अस्य नाम अभ्यासः।

**नारायणः** 'परो नारायणः' (ह.ना. 3.74)। सूत्रस्य अर्थः द्विरुक्तस्य परः अंशः नारायण–नाम्ना ज्ञायते। प्रसङ्गेऽस्मिन् क्षितीशचन्द्र चट्टोपाध्यायः आह– 'HN uses nara for abhyasa and Narayana for abhyasta. Probably because Narayana contains a larger number of syllables including na which is also the first syllable'.[22] परन्तु इयं व्याख्या न सङ्गता। भागवतानुसारेण भगवान् श्रीकृष्णः चतुर्थे अवतारे नर–नारायणौ नाम यमजौ ऋषी भूत्वा धर्मराजपत्न्याः गर्भे आविर्भूतः अभूत्। उच्यते श्रीमद्भागवते– 'तूर्ये धर्मकलासर्गे नरनारायणावृषी। भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः।।[23] द्विरुक्तौ वर्णस्य वर्णानां वा वारद्वयमुच्चारणं स्यात्। नरः पूर्वे जातः, तस्मात् द्विरुक्तस्य पूर्वः अंशः नर–नाम्ना अभिधीयते। नारायणस्य अनुजत्वात् द्विरुक्तस्य परः अंशः नारायणसंज्ञां लभते।

**सङ्कर्षणः** 'सपरसर्वेश्वर–य–व–राणामि–उ–रामादेशः सङ्कर्षणसंज्ञः' (ह.ना. 3.244) अर्थात् परसर्वेश्वरसहितानां य–व–र–काराणां स्थाने इ उ ऋ–कारादेशः सङ्कर्षणसंज्ञः भवति। भगवतः बलरामस्य अपरं नाम सङ्कर्षणः। देवकी–वसुदेवयोः षट् पुत्राः यदा अत्याचारिणा कंसेन निहताः तदा बलरामः देवकीमातुः गर्भं समागतः। योगमायया देवक्याः सप्तमः गर्भः नन्दगृहे वसन्त्याः वसुदेवस्य अपरस्याः पत्न्याः रोहिण्याः गर्भे स्थानान्तरितः आकर्षितः वा। तस्मात् बलरामः सङ्कर्षणः इति। पाणिनीये व्याकरणे अयं सम्प्रसारण–नाम्ना अभिहितः। 'सम्'आदित्वात् सम्प्रसारणस्य सङ्कर्षणसंज्ञा कृता। सम्प्रसारणेन सह सङ्कर्षणस्य उच्चारणगतं सादृश्यमपि दृश्यते।

**चक्रपाणिः** 'तदन्तश्चक्रपाणिसंज्ञः' (ह.ना. 3.468) अर्थात् यङ् महाहरान्तः चक्रपाणिसंज्ञः भवति। महाहरः इति आत्यन्तिकलोपः। अर्थात् यङ्लुगन्तधातुः चक्रपाणिसंज्ञां लभते। चक्रं पाणौ यस्य इति चक्रपाणिः श्रीकृष्णः।

## कारकप्रकरणे प्रयुक्ताः संज्ञाः

**विष्णुनिष्ठा** 'अतीतादौ क्तक्तवतू विष्णुनिष्ठासंज्ञौ...' (ह.ना. 4.44) अर्थात् अतीतादौ काले क्त–क्तवतु–एतौ प्रत्ययौ विष्णुनिष्ठासंज्ञौ भवतः। पाणिनिना एतौ निष्ठानाम्ना अभिहितौ। अत्र विष्णुनामयोजनेन भगवन्नामता सिद्धा। विष्णुं प्रति निष्ठा जनानां मोक्षदायिका भविष्यतीति तात्पर्यम्।

**अधोक्षजाभः** 'परोक्षातीते क्वसु–कि–काना अधोक्षजाभसंज्ञाः, अत्र क्वसु–कि परपदे, कान आत्मपदम्' (ह.ना. 4.45) अर्थात् परोक्षातीतकाले धातोः उत्तरे क्वसु–कि–कान–प्रत्ययाः भवन्ति। एते अधोक्षजाभ–नाम्ना ज्ञायन्ते। तत्र क्वसु–कि–प्रत्ययौ परपदे प्रयुज्येते, कान–प्रत्ययः आत्मपदे प्रयुज्यते। परोक्षातीतकालस्य अधोक्षजसंज्ञा कृता, अतस्तस्मिन् काले प्रयुक्तानां प्रत्ययानाम् अधोक्षजाभ–नामकरणम् अतीव तात्पर्यपूर्णम्।

**विष्णुकृत्यम्** 'विध्याद्यर्थे तव्यानीय–यत्–क्यप्–ण्यत्–केलिमा विष्णुकृत्यसंज्ञाः, ते च प्रायो भावकर्मणोः' (ह.ना. 4.60)। सूत्रस्य अर्थः विध्याद्यर्थे प्रयुक्ताः तव्यादयः प्रत्ययाः विष्णुकृत्य–नामानः भवन्ति। पाणिनीये व्याकरणे एते कृत्य–नाम्ना अभिहिताः। अत्र भगवद्भक्तिविधानाय विष्णुपदस्य संयोजनं कृतम्। भगवतः विष्णोः नामश्रवणं, चिन्तनं, तस्य गुणानुकीर्तनं, व्रतपालनम्– इत्यादीनि विष्णुकृत्यानि। उच्यते यत् ये जनाः विष्णुकृत्यानि आचरन्ति ते न नरकगामिनः भवन्ति।

**कृष्णप्रवचनीयः** 'कृष्णप्रवचनीयैर्योगे द्वितीया' (ह.ना. 4.107)। कर्मप्रवचनीयस्य अत्र इयं संज्ञा। कर्मशब्दस्य स्थाने कृष्णस्य नामविधानं वैष्णवसिद्धान्तसम्मतम्।

मुक्तिलाभाय अज्ञानतिमिराच्छादितैः मनुष्यैः सदा कृष्णस्य नाम प्रवचनीयमिति तात्पर्यम्।

### कृदन्तप्रकरणे प्रयुक्ता संज्ञा

अच्युताभः 'वर्तमानादौ शतृशानावच्युताभौ फलान्तरप्रयोगे परपदात्मपदयोः' (ह.ना. 5.2)। सूत्रस्य अर्थः वर्तमानादौ काले धातोरुत्तरे वाक्यसमापकत्वेन प्रयोगे सति कर्तरि वाच्ये शतृशानौ प्रत्ययौ भवतः। एतयोः अच्युताभसंज्ञा भवति। शतृप्रत्ययः परपदस्य (परस्मैपदस्य) विषये, शानप्रत्ययः आत्मपदस्य (आत्मनेपदस्य) विषये भवति। वर्तमानकालस्य अच्युतसंज्ञा कृता, तस्मात् वर्तमानकाले प्रयुक्तयोः प्रत्यययोः अच्युताभनामकरणं यौक्तिकम्।

### समासप्रकरणे प्रयुक्ताः संज्ञाः

**अव्ययीभावः** 'अव्ययीभावस्तु षष्ठः' (ह.ना. 6.2)। नास्ति व्ययीभावः यस्मात् इति अव्ययीभावः। अव्ययीभावशब्दस्य अर्थः भगवान् श्रीकृष्णः। अव्ययीभावशब्दः भगवद्वाची भवतीति संज्ञान्तरकल्पना न कृता।

**विग्रहः** 'समासवाक्यं विग्रहः' (ह.ना. 6.5) अर्थात् यस्मिन् वाक्ये समासस्य विश्लेषणं क्रियते तदेव विग्रहवाक्यम्। परमपुरुषस्य भगवतः श्रीकृष्णस्य विग्रहदर्शनं पापविनाशकं परममुक्तिप्रदायकमिति भगवन्नामता।

**कृष्णपुरुषः** 'पीताम्बरात् प्राक् समासाः कृष्णपुरुषसंज्ञाः' (ह.ना. 6.8) इति सूत्रेण पीताम्बरसमासात् पूर्ववर्तिनः समासाः कृष्णपुरुषसंज्ञकाः भवन्ति। अष्टाध्याय्याम् अयं समासः तत्पुरुषनाम्ना अभिधीयते। अत्र 'कृष्णपुरुषः' इति नाम भगवद्भक्तिविधायकम्। तथा व लक्षणीयं 'कृष्णपुरुषः' इति पदं स्वयमेव कृष्णपुरुषसमासनिष्पन्नम्। कृष्णस्य पुरुषः कृष्णपुरुषः।

**श्यामरामः** 'तेष्वयं श्यामरामसंज्ञः' (ह.ना. 6.6)। पाणिनेः कर्मधारयसमासः जीवगोस्वामिना श्यामराम–नाम्ना अभिहितः। इदं नाम भगवद्भक्तिजनकम्। श्यामश्चासौ रामश्चेति श्यामरामः। श्यामरामः इति पदं श्यामरामसमासनिष्पन्नम्।

**त्रिरामी** 'संख्यापूर्वोऽसौ त्रिरामीसंज्ञः' (ह.ना. 6.48)। आलोच्यसूत्रेण द्विगुसमासस्य त्रिरामीसंज्ञा भवति। त्रयाणां रामाणां समाहारः त्रिरामी। त्रिरामी इति पदं द्विगुसमासनिष्पन्नम्। त्रिरामी शब्दस्य अर्थः दशावतारेषु श्रीकृष्णस्य अवतारत्रयम्–परशुरामः रामचन्द्रः बलरामश्च। उच्यते– 'वनजौ वनजौ खर्वः त्रिरामी, सकृपोऽकृपः। अवतारा दशैवैते कृष्णस्तु भगवान् स्वयम्।।[24] वनजौ = मत्स्यः कूर्मः, वनजौ = वराहः नृसिंहः, खर्वः = वामनः, त्रिरामी = परशुरामः रामचन्द्रः बलरामः, सकृपः = बुद्धः,

अकृपः = कल्किः–एते श्रीकृष्णस्य दश अवताराः, श्रीकृष्णः स्वयमेव भगवान्।

**पीताम्बरः** 'अनेकमन्यपदार्थे पीताम्बरः' (ह.ना. 6.102)। सूत्रस्य अर्थः अनेकं नामपदं यदि अन्यपदार्थे अभिधेये सति परस्परं समस्यते तर्हि तस्य समासस्य पीताम्बरसंज्ञा भवति। अष्टाध्याय्याम् अयं समासः बहुव्रीहिरिति। पीतम् अम्बरं यस्य स पीताम्बरः हरिः। अत्रापि पीताम्बर–पदं पीताम्बरसमासनिष्पन्नम्।

**रामकृष्णः** 'इतरेतरयोग–समाहारयोः रामकृष्णः' (ह.ना. 6.117)। पाणिनि-निर्दिष्टस्य द्वन्द्वसमासस्य अत्र रामकृष्णसंज्ञा स्यात्। रामश्च कृष्णश्चेति रामकृष्णौ इति रामकृष्णसमासः।

**पूर्वपदम् उत्तरपदम्** 'समासे सर्वादिपदं पूर्वपदं, सर्वान्तपदमुत्तरपदम्' (ह.ना. 6.203)। सूत्रस्य अर्थः स्पष्टमेव।

### तद्धितप्रकरणे प्रयुक्ताः संज्ञाः

**केशवः** 'टित् केशवः ...' (ह.ना. 7.114)। ट् इत् यस्य स टित्। टित्प्रत्ययस्य केशवसंज्ञा भवति।

**माधवः** 'टणित् माधवः' (ह.ना. 7.246)। टणौ इतौ यस्य स टणित्। टणित्–प्रत्ययः माधवसंज्ञकः भवति।

**आदिवृष्णीन्द्रः** 'आ–ऐ–औ–रामा यस्यादिसर्वेश्वराः, स आदिवृष्णीन्द्रसंज्ञः, तद् यदादयश्च' (ह.ना. 7.263 वृत्तिः)। सूत्रस्य अर्थः यस्य शब्दस्य आदिसर्वेश्वराः (आदिस्वराः) आ ऐ औ इति त्रयः वर्णाः भवन्ति, स शब्दः आदिवृष्णीन्द्रसंज्ञः स्यात्। तद्–यद्–आदयः शब्दाः अपि इमां संज्ञां लभन्ते। आ–ऐ–औ–एतेषां वर्णानां वृष्णीन्द्रसंज्ञा कृता, एते वर्णाः यस्य आदौ प्रयुज्यन्ते तस्य आदिवृष्णीन्द्रसंज्ञा युक्तिसम्मता।

**समालोचना**

संज्ञाशब्दानां पर्यालोचनया ज्ञायते यत् जीवगोस्वामिना यदृच्छाक्रमेण भगवतः नामलीलामया संज्ञा न कृता, वरं संज्ञानिर्वाचने गभीरमननशीलतायाः परिचयः दीयते। विषयस्य व्याकरणगतेन वैशिष्ट्येन सह संज्ञावाचिनां देवदेवीनां चरित्रगतं क्रियागतं वा सादृश्यं यथासम्भवं रक्षितम्। संज्ञा–संज्ञिनोः अभेदकल्पना संज्ञानिर्वाचने मुख्यप्रेरणात्वेन गृहीता। व्याकरणमाध्यमेन शब्दचरित्रं तथा च देवचरित्रमननस्य परमलाभः– अस्य व्याकरणस्य प्रधानवैशिष्ट्यम्। हरिनामात्मकसंज्ञानिर्वाचने एते विषयाः ग्रन्थकारेण सूक्ष्मतया विवेचिताः–

**संज्ञिनां व्याकरणगतवैशिष्ट्येन सह संज्ञावाचिनां देवदेवीनां चरित्रगतं क्रियागतं वा सादृश्यम्–**

ग्रन्थकारेण संज्ञाविधानकाले संज्ञिनां वैशिष्ट्यम् अवलोक्य सामञ्जस्यपूर्णानां वैष्णवदेवदेवीनां नाम संज्ञारूपेण तथा गृहीतं, यथा चरित्रगतं क्रियारूपं वा साम्यं प्रतिपाद्येत। यथा– वर्णक्रमे आदौ चतुर्दश वर्णाः सर्वेश्वर–नामानः भवन्ति। यथा चराचरमिदं जगत् भगवतः श्रीकृष्णस्य अधीनम्, तथैव कादीनां व्यञ्जनवर्णानामुच्चारणम् एषामधीनम् इति सर्वेश्वराः। वर्णस्य स्वरूपमात्रे रामसंज्ञा भवति। रघुनन्दनः श्रीरामचन्द्रः यथा एकामेव पत्नीं सीतादेवीं परिगृहीतवान्, तथा चायं रामः एकमेव वर्णं परिगृह्णाति। आदेशस्य विरिञ्चिसंज्ञा भवति। विरिञ्चिः ब्रह्मा यथा एकं वस्तु गृहीत्वा अन्यदाकारं वस्त्वन्तरं करोति तथैव आदेशे एकं गृहीत्वा तत्स्थाने अन्यत् विधीयते। एवं पोषकत्वात् आगमस्य विष्णुसंज्ञा, विनाशकत्वात् लोपस्य हरसंज्ञा, आत्यन्तिकलोपस्य महाहरसंज्ञा, सर्वव्यापकत्वात् सजातीय–विजातीयानेकाधिकारस्य वासुदेवसंज्ञा, नित्यत्वात् लट्–लकारस्य अच्युतसंज्ञा, विधायकत्वात् विधिलिङ्लकारस्य विधिसंज्ञा, आशीर्जनकत्वात् प्रेरकत्वाच्च आशीर्लिङ्लकारस्य विधातृसंज्ञा, इन्द्रियातीतत्वात् परोक्षातीते अधोक्षजसंज्ञा, पूर्वजन्यत्वात् अभ्यासस्य नरसंज्ञा, अनुजत्वात् अभ्यस्तस्य नारायणसंज्ञा भवति। विष्णोः दशमः अवतारः कल्किः कलियुगस्य अन्ते आविर्भूय अधर्मान् विनश्य धर्मस्थापनं करिष्यति। अतः भविष्यत्कालस्य कल्किनामकरणमतीव प्रासङ्गिकम्। अनद्यतनभविष्यतः बालकल्किः नाम अपि युक्तम्।

**संज्ञिना सह संज्ञायाः वैशिष्ट्यगतसाम्यम्–**

संज्ञाविधानकाले गोस्वामिना विषयेण सह संज्ञायाः वैशिष्ट्यगतं साम्यं प्रतिपादितम्। यथा– कादीनां व्यञ्जनानां विष्णुजनसंज्ञा स्यात्। दार्शनिकदृष्ट्या यथा स्थावरजङ्गमादयः सर्वे जनाः सर्वव्यापकस्य भगवतः विष्णोः अधीनाः, तद्वत् ककारादयः वर्णाः उच्चारणविषये अकारादीनां सर्वेश्वरादीनाम् अधीनाः। अ आ इति द्वौ, इ ई इति द्वौ एकात्मकौ। एकः अद्वितीयः आत्मस्वरूपं यस्य सः एकात्मकः। एकात्मकपदेन जीवब्रह्मैक्यं प्रतिपादितम्। य–र–ल–वानाम् अन्तःस्थानां हरिमित्रसंज्ञा भवति। हरेः मित्राणि हरेः अन्तःस्थले सदा स्थानं लभन्ते इति ज्ञापनाय अन्तःस्थवर्णानाम् इयं संज्ञा। इत्थं वैशिष्ट्यसाम्यात् घोषवर्णानां गोपालसंज्ञा, अघोषवर्णानां यादवसंज्ञा, टेः संसारसंज्ञा, संयोगस्य सत्सङ्गसंज्ञा, अलिङ्गशब्दस्य अव्ययसंज्ञा, अवान्तराधिकारस्य विभुसंज्ञा, परोक्षातीतकाले प्रयुक्तानां प्रत्ययानाम् अधोक्षजाभसंज्ञा, शतृ–शानच्–प्रत्यययोः अच्युताभ-संज्ञा, आ–ऐ–औ–एते त्रयः स्वराः यस्य आदौ प्रयुज्यन्ते तस्य आदिवृष्णीन्द्रसंज्ञा भवति।

**पूर्वाचार्यकृतसंज्ञाभिः सह विष्णुवाचकशब्दयोगेन भगवन्नामतासाधनम्–**

प्रचलितसंज्ञाभिः सह विष्णोः नामयोजनं हरिनामात्मकतासाधनाय प्रयुक्तम्। यथा– कादयः पञ्च पञ्च वर्णाः विष्णुवर्गनाम्ना उच्यन्ते। अत्र वर्गशब्देन सह विष्णोः नामयोजनेन विष्णुवर्गः इति संज्ञा प्रदत्ता। एवं पदस्य विष्णुपदम्, निष्ठायाः विष्णुनिष्ठा, कृत्यस्य विष्णुकृत्यम् इत्यादयः।

पूर्वाचार्यकृतसंज्ञानां पूर्वभागस्य स्थाने विष्णुवाचकशब्दयोगेनापि संज्ञा कृता। यथा– विसर्गः इत्यस्य 'वि'स्थाने विष्णुशब्दप्रयोगेन विष्णुसर्गः इति संज्ञा विहिता। एवं विभक्तिः इत्यस्य विष्णुभक्तिः, सर्वनामस्थानम् इत्यस्य कृष्णस्थानम्, सर्वनाम्नः कृष्णनामसंज्ञा, अनद्यतनभूते भूतेश्वरसंज्ञा, भूतकाले भूतेशसंज्ञा, सार्वधातुकस्य कृष्णधातुकः आर्धधातुकस्य रामधातुकः, कर्मप्रवचनीयस्य कृष्णप्रवचनीयः, तत्पुरुषस्य कृष्णपुरुषः इत्यादयः। अत्र लक्षणीयं यत् गोस्वामिना सर्व–शब्दस्य स्थाने सर्वत्रैव कृष्णशब्दः गृहीतः।

**संज्ञामाध्यमेन तद्विषयकोदाहरणप्रदर्शनम्–**

ग्रन्थकारेण संज्ञाशब्देन तद्विषयकम् उदाहरणं प्रदत्तम्। यथा– पुंलिङ्गस्य पुरुषोतमलिङ्गः इति संज्ञा कृता, अत्र पुरुषोत्तमशब्दः स्वयमेव पुंलिङ्गस्य उदाहरणम्। अनेन प्रकारेण स्त्रीलिङ्गस्य लक्ष्मीसंज्ञा, नपुंसकलिङ्गस्य ब्रह्म, अकारान्त–पुंलिङ्गस्य कृष्णसंज्ञा, इकारान्त-पुंलिङ्गस्य हरिः इति, आकारान्तस्त्रीलिङ्गस्य राधा, नदीवाचकशब्दानां गोपी, तत्पुरुषस्य कृष्णपुरुषः, कर्मधारयस्य श्यामरामः, द्विगोः त्रिरामी, बहुव्रीहेः पीताम्बरः, द्वन्द्वसमासस्य रामकृष्णः इत्यादयः संज्ञाः।

**उच्चारणसाम्यम्–**

जीवगोस्वामी हरिनामात्मकसंज्ञां विधाय प्रायः प्रत्येकं स्थले कातन्त्र–पाणिनि–सम्मत–संज्ञाः अपि प्रदर्शितवान्। पूर्वाचार्यकृतसंज्ञाभिः सह उच्चारणसाम्यं विधाय गोस्वामिना हरिनाममयाः संज्ञाः कृताः। यथा– अण् इत्यस्य अनन्तः, विसर्गः इत्यस्य विष्णुसर्गः, व्यञ्जनस्य स्थाने विष्णुजनः, रल् इत्यस्य वलः, शर्–इत्यस्य स्थाने शौरिः, विभक्तेः विष्णुभक्तिः, सम्बुद्धिः इत्यस्य बुद्धः, परोक्षे अतीते अधोक्षजः, परस्मैपदस्य परपदम्, आत्मनेपदस्य आत्मपदम्, उपसर्गः इत्यस्य उपेन्द्रः, सम्प्रसारणस्य सङ्कर्षणः, तत्पुरुषस्य कृष्णपुरुषः इत्यादयः।

**आदिवर्णसाम्यम्–**

संज्ञिनः आदिवर्णेन सह साम्यं विधाय गोस्वामिना कतिपयाः संज्ञाः प्रदत्ताः।

यथा– इकारादयः स्वराः ईश्वरनाम्ना संज्ञापिताः। एवं क च ट त पाः हरिकमलानि, ख–छ–ठ–थ–फाः हरिखड्गाः, ग–ज–ड–द–वाः हरिगदाः, घ–झ–ढ–ध–भाः हरिघोषाः, श ष स हाः हरिगोत्राणि (हरिगोत्रशब्देन शाम्ब उच्यते, शाम्बः इत्यस्य शकारादित्वात् साम्यम्), पित् पृथुः, णित् नृसिंहः, कित् कपिलः, किच्च ङिच्च कंसारिः, शित् शिवः, दासंज्ञकाः धातवः दामोदरः इत्यादयः।

पूर्वाचार्यकृतसंज्ञानाम् आदिवर्णं गृहीत्वा ग्रन्थकारेण कतिपयसंज्ञाः कृताः। यथा– गुणः इत्यस्य गोविन्दः, वृद्धिः इत्यस्य वृष्णीन्द्रः, उपसर्गः इत्यस्य उद्धवः, भ–स्थाने भगवान्, सम्प्रसारणस्य सङ्कर्षणः इत्यादयः।

**संख्यागतसाम्यम्–**

संज्ञानिर्वाचने संज्ञिना सह संज्ञायाः संख्यागतं सादृश्यमपि विवेचितम्। यथा– अकारादयः दश स्वरवर्णाः दशावताराः, इ–ई–उ–ऊ एते चत्वारः वर्णाः चतुःसनाः, उ ऊ ऋ ॠ एते चत्वारः चतुर्भुजाः, ए–ऐ–ओ–औ एते चत्वारः चतुर्व्यूहाः, स्वादयः पञ्च विभक्तयः पाण्डवाः इत्यादयः।

**आकारगतसादृश्यम्–**

संज्ञिना सह संज्ञायाः आकारगतं सादृश्यमपि दृश्यते। यथा ह्रस्वस्वराणां वामनः इति, दीर्घस्वराणां त्रिविक्रमसंज्ञा, प्लुतस्वराणां महापुरुषः इति, अनुस्वारस्य विष्णुचक्रम्, चन्द्रविन्दोः विष्णुचापः इत्यादयः।

**ध्वनिसाम्यम्–**

ॐ अ–ण–न–माः एते वर्णाः हरिवेणवः। वर्गाणां पञ्चमवर्णाः अर्थात् नासिक्यवर्णाः हरिवेणुसंज्ञां लभन्ते। हरिवेणुशब्देन हरेः वंशी बोध्या। वंश्याः नासिक्यध्वनित्वात् नासिक्यवर्णानां हरिवेणुसंज्ञा कृता।

**प्रचलितसंज्ञायाः ग्रहणम्–**

ग्रन्थकारेण कुत्र कुत्रापि विशेषतः येषु स्थलेषु प्रचलितसंज्ञानां भगवन्मूलिका व्याख्या प्राप्यते तत्र पूर्वाचार्यकृताः संज्ञाः एव गृहीताः। यथा– नास्ति व्ययीभावः यस्मात् इति अव्ययीभावः। अव्ययीभावशब्दस्य अर्थः भगवान् श्रीकृष्णः। अव्ययीभावशब्दः भगवद्वाची भवतीति संज्ञान्तरकल्पना न कृता। एवं विग्रहः, पूर्वपदम्, उत्तरपदम्, निपातः, नाम, धातुः, अतिदेशः इत्यादयः।

हरिनामामृते तरप्–तमप्–इत्येतयोः प्रत्यययोः कापि संज्ञा न प्रदत्ता। इत्– अनुबन्धयोरपि संज्ञा न कृता परन्तु सूत्रे पदद्वयं व्यवहृतम्। यथा– 'पित् पृथुः' (ह.ना.

3.13), 'णित् नृसिंह' (ह.ना. 3.14), 'इरनुबन्धान् ङो वा भूतेश–परपदे' (ह.ना. 3.7) इत्यादीनि।

*

## सन्दर्भाः


1. हरिदास–शास्त्री, श्रीहरिनामामृतव्याकरणम्, तत्र ग्रन्थारम्भः कारिका 2।
2. चैतन्यभागवतम्, मध्यखण्डम्, प्रथमोऽध्यायः। उद्धृतोऽयं श्लोकः बङ्गभाषया विरचितः।
3. श्रीहरिनामामृतव्याकरणम् 1.2 वृत्तिः।
4. पद्मपुराणम्, उत्तर 257.40–41
5. श्रीमद्भागवतमहापुराणम् (प्रथमः खण्डः), गीताप्रेस्, गोरखपुरम्, 2014। तत्र 1.3.16
6. तत्रैव 3.15.12।
7. हरिनामामृते वर्णक्रमे 'क्ष'कारोऽपि गृहीतः।
8. श्रीमद्भागवतमहापुराणम् 1.3.23।
9. Kshitish Chandra Chatterji, Technical Terms and Technique of Sanskrit Grammar, Visvanath Chatterji, Kolkata, 1948, p–233.
10. श्रीमद्भागवतमहापुराणम् 3.1.26।
11. Technical Terms and Technique of Sanskrit Grammar, p–203.
12. श्रीमद्भागवतमहापुराणम् 1.3.22।
13. Technical Terms and Technique of Sanskrit Grammar, p –48.
14. श्रीमद्भागवतमहापुराणम् 1.3.24।
15. Technical Terms and Technique of Sanskrit Grammar, p–13.
16. श्रीमद्भागवतमहापुराणम् 3.16.25।
17. तत्रैव 1.3.25।
18. तत्रैव 1.3.14।
19. तत्रैव 1.3.18
20. श्रीमद्भगवद्गीता, गीताप्रेस्, गोरखपुरम्, 2006। तत्र 10.26।
21 श्रीमद्भागवतमहापुराणम् 1.3.10
22. Technical Terms and Technique of Sanskrit Grammar, p–75.
23. श्रीमद्भागवतमहापुराणम् 1.3.6।
24. दशावतारगणनाविषयकस्य अस्य श्लोकस्य मूलम् अज्ञातम्। बलदेव–उपाध्यायस्य 'पुराण–विमर्शः' (पृष्ठम् 175) इति पुस्तकात् उद्धृतः अयं श्लोकः।


*

# परमाणुवादखण्डनप्रसङ्गे वेदान्ते आत्मतत्त्वसिद्धिः

**डॉ. राजेश प्रामाणिकः**

**शोधसारांशिका**

जाग्रदवस्थायां विषयाननुभवितुं, स्वप्नावस्थायां वासनया कर्तारं संस्रष्टुं, सुषुप्तावस्थायां च स्वस्मिन्नेव स्वं लीनीकर्तुं यः समर्थः, पुनश्चैतासामवस्थानां द्रष्टृत्वेन नित्यतत्त्वस्वरूपः स एव आत्मेति शब्दवाच्यः। स्वस्वरूपत्वादेवात्मा नित्यत्वं प्राप्नोति। तेन च आत्मप्राप्तिर्नाम तद्विषयकज्ञानस्य प्रापणम्। ब्रह्मणः व्यक्तेः पृथक्करणे हेतुभूतस्याज्ञानस्य नाशनमेव तत्प्राप्तिः। सैव प्राप्तिरस्ति यत्प्राप्तव्यमेव। यस्य वस्तुनो लाभः क्षणिकत्वेन भवति, तन्न ऋणभिन्नं किञ्चिदन्यमिति विज्ञेयम्। अनित्यत्वेन कालान्तरे ग्रसितत्वेन चास्मिन् जगति सर्वेऽपि पदार्थाः, सर्वाण्यपि वस्तूनि क्षणमात्रस्थितानि। पदार्थप्राप्तिः ऋणमात्रस्वरूपैवास्ति। परन्त्वेतेभ्यः भिन्नः यः नित्यस्वरूपः, यस्य प्राप्तिश्चाचला तदात्मतत्त्वस्य प्राप्तिरेव मूलप्राप्तिः। तदात्मतत्त्वलाभेनैव सम्भवत्यखिलासम्पूर्णतायाः दूरीकरणम्। तथात्मप्राप्तिरेवाखिलकामनातीतो भवितुमर्हतीत्यतस्तस्यात्मज्ञस्य न पुनर्विद्यते किञ्चित्साधनाय। एषैव सर्वप्रकारप्राप्तिषु श्रेष्ठप्राप्तिः। एतदर्थमेवापस्तम्बादीनां धर्मसूत्रादिरचनायां प्रवृत्तिर्दृश्यतेऽसकृत्। अथवा मुनिः यः मननशीलपरमहंसः सः तदात्मतत्त्वलाभमेव श्रेष्ठतमं मत्वा तदवगमनाय तत्प्राप्त्यर्थं च सर्वं परित्यजति।

**कुञ्चिकाशब्दाः –** आत्मा, ब्रह्म, कारणम्, जगत्, परमाणुवादः, पदार्थः।

आत्मास्य जगतोऽभिन्नं निमित्तोपादानकारणमिति प्रसिद्धिर्वेदान्ते। कुत्रचिद्द्वैदिकसिद्धान्तं निराकृत्यात्मतत्त्वभिन्नतत्त्वं सत्यत्वेन जगत्कारणरूपेण चोपपादितम्। जगत्सत्यवादिनः परमाणुवादिनः कणादादिमहर्षयः द्वैतवादिन एवं मन्यन्ते यत्, परमसूक्ष्मनिरवयवद्रव्यविशेषाः एव परस्परसम्मेलनेन समस्तस्य सावयवकार्यरूपस्य जगतः पदार्थसमूहान् उत्पादयन्ति। एतन्मतमान्यताधुनिकभौतविज्ञानेऽप्यस्ति।[1] द्रव्यगुणकर्मसामान्यविशेषसमवायाः इति वैशेषिकदर्शने पदार्थाः स्वीकृताः।[2] एतेषु नित्यद्रव्याणि च (परमाणुः, आकाशादिः) नित्यगुणसामान्यविशेषसमवायाः कारणेन नोत्पद्यन्ते। अनित्यद्रव्याणि च परमाणुनोत्पद्यन्ते।

अनित्यगुणश्चानित्यद्रव्ये विद्यते इत्यत एवानित्यगुणः द्रव्ये कारणाधीनत्वेन तिष्ठति। क्रियायाश्चापि द्रव्यसत्तात्मकत्वेन तदधीनत्वं ज्ञायते। पदार्थस्य मौलिकोपादानभूतश्च परमाणुः। अस्यैव पारस्परिकविन्यासेन मौलादीनां सृष्टिः। परमाणूनां च परस्परसम्मेलनेनाणूनां सृष्टिः। येन च जलवायुखाद्यादिरूपेणासंख्यानां पदार्थानां सृष्टिः सम्भवति। एवंरूपेणाकृतित्वात्परिवर्तितत्वाच्च पदार्थेषु रसजविक्रियायां सत्यां जगतः प्रकृतेश्च सर्वेषां परिवर्तनं विघटते। पुनश्च एतेषां परमाणूनां सम्मेलनेनैव संसाररूपि कारणं संसृष्टं भवति। यच्च कारणं स्वयमेव कार्यात्मकत्वेन परिणमते तदेवोपादानकारणम्। तद्यथा मृदा निर्मीयते घट इत्यतः घटोपादानकारणं मृदेव। वैशेषिकनये परमाणुः जगदुपादान-कारणत्वेन स्वीकृतः। प्रत्येकं परमाणुः स्वस्मिन् स्वगुणं निर्वहति, तद्गुणेनैव जागतिकवस्तुसमूहे तद्गतगुणोद्रेको भवति। एतस्मादेव जगत्, तद्गतगुणाः जगदाकारश्च परमाणुत एव सृष्टः। स्वभावत एव परमाणुः स्थितिशीलोऽचलश्च।[3] जगतोऽस्य सर्वेऽपि भौतिकपदार्थाः सावयवाः उत्पत्तिविनाशशीलाः नित्यपरमाणुविभिन्नसंयोगसंसृष्टाः। तस्मादेव पदार्थोत्पत्तिर्नाम परमाणूनां संयोगः, विनाशो नाम परमाणुसंयोगविभाग एव।[4] सृष्टेश्च मूलतत्त्वस्वरूपः परमाणुः नित्यः। भौतिकपदार्थावयवाः विभाज्याः, पुनश्चैतेषां विभक्तावयवानामन्यावयवरूपेण विभागोऽपि सम्भवति।

इत्थञ्चानवस्थादोषपरिहारायान्तिमावयवं स्वयं निरवयवमविभाज्यमिति स्वीकर्तव्यम्। परमाणुरेवातीन्द्रियः निरवयवोऽविभाज्यो नित्यभौतिकद्रव्यस्वरूपः। परमाणोश्च चत्वारः विभागाः दृश्यन्ते पार्थिवजलीयतैजसवायवीयरूपेण। आधुनिकविज्ञाने एतैः परमाणुभिरेव विविधपदार्थानां सृष्टिरिति भण्यते। विभु नित्यं आकाशं परमाणोः संयोगविभागविषयेऽवकाशं प्रददाति।[5] प्रत्येकं नित्यपरमाणौ यत्स्वकीयत्वं वर्तते तदेव स्वकीयत्वं नित्यत्वेनान्य-पदार्थव्यावर्तकत्वेन च तस्मिन् विद्यते। एतदतिरिच्य परमाणौ गुणभेदः संख्यागतप्रभेदश्च विद्यते। वायुपरमाणुः सूक्ष्मतमः, यस्मिन्स्पर्शगुणो विद्यते। एवमेव तैजसपरमाणौ रूपस्पर्शौ विद्येते। जलपरमाणौ च रसरूपस्पर्शगुणाः विद्यन्ते। पार्थिवे च परमाणौ तेनैव रूपेण गन्धरसरूपस्पर्शाश्चत्वारः गुणाः विद्यन्ते। सावयवपदार्थे गुणाः तन्निर्णायकपरमाणुरूपेण गुणे तिष्ठन्ति। एते च स्वाभाविकतया निस्पन्दाः क्रियाशून्या भवन्ति।[6] जगत्सृष्टिः तदैव सम्भवति यदा तस्मिन्नचलपरमाणौ कस्यचिन्नाद्यस्पन्दनस्याद्यगतेश्च सञ्चारः सम्भवति। आद्यस्पन्दनञ्चेदमीश्वरप्रदत्तप्राथमिकगतिरूपेणापि कथितम्। एतच्चाद्यस्पन्दनं गतिर्वेश्वर-सञ्चालिताददृष्टादागच्छति, यस्माद्भौतिकसृष्टेः प्रारम्भो भवति। प्रत्येकं संसार्यात्मादृष्टो भवति, यच्च तस्मिन्संयुक्तो भवति, यस्मिन् तद्धर्माधर्मरूपकर्मसंस्कारः सञ्चितो भवति।

आत्मकर्मफलत एव सृष्टिर्भवति। कुत इति चेदात्मानं विहाय शरीरमिन्द्रियं मनसः भोगश्च न संसिद्ध्यति। प्रत्येकं संसारिणात्मना सह मनः संयुज्यते। परन्तु, भोगायतशरीरस्य भोगसाधनेन्द्रियस्योत्पादनार्थं भौतिकसृष्टेरावश्यकतास्ति। परमाणुसमूहे आद्यस्पन्दनादनन्तरमेव कश्चन परमाणुः अपरपरमाणुना सह संयुज्य द्व्यणुकमुत्पादयति। आदौ च सर्वेऽपि परमाणवः द्व्यणुके परिणमन्ति, ततस्तद्द्व्यणुकैः सृष्टिः प्रावर्तते।[7]

त्रिभिर्द्व्यणुकैस्त्र्यणुकश्चतुर्भिस्त्र्यणुकैश्च चतुरणुकस्योत्पत्तिर्भवति। इत्थञ्च क्रमोपक्रमैः स्थूलभूतादीनां संसृष्टिः। सततञ्चोपादानकारणं कार्ये एव तिष्ठति, तत्प्रतीतिरपि सुस्पष्टैव। तद्यथा– घटस्य मृत्तिका पटस्य वा सूत्रकणिका। संसारे पदार्थः शश्वदेवाचेतनसंयुक्तरूपेण प्रतीयते। फलस्वरूपेणोपादानकारणस्याचेतनतत्त्वेनैव भवितव्यं, न तु चेतनस्वरूपेश्वरत्वेन। तथा हि न कोऽपि पदार्थः ईश्वरे आत्मनि वा समन्वितो भवितुमर्हति। यच्चानेनानुमानेन बोधयितुं शक्यम्– जगत्पदार्थाः अचेतनोपादानकाः अचेतनान्विततया भासमानत्वात्, यः स्वसत्तायां यदन्वितो नियमेन भासते स तदुपमृदानको दृष्टः, यथा मृदन्विततयावभावसमानो घटो मृदुपादानकः तथा चेमे, तस्मात्तथेति।[8]

यो गुणः कारणपरमाणौ विद्यते, सः एव गुणः कार्ये समरूपमेव गुणमुत्पादयति तन्तुगतवर्णस्य पटगतवर्णस्य कारणवत्। परमाणुः निर्गुणत्वेन स्वीक्रियते चेत् कार्ये गुणोत्पत्त्यर्थं कालान्तरं स्वीकार्यम्। किन्तु, परमाणुः सगुणस्वरूपः। यद्यपि सगुणताव्यक्तरूपेणैव तिष्ठति तथापि। परमाणुसंयोगे सत्येषा सगुणता व्यक्तीभवति।

विशेषगुणाभिप्रायानुसारेणेदमुच्यते– सः समजातीयमेव गुणमुत्पादयति यतो हि तन्मतानुसारेणापि परमाण्वादौ स्थितसंख्यात एव द्व्यणुकादयः परिणामस्वरूपाः परत्वापरत्वयोः दिक्कालरूपपदार्थस्य संयोगकारणरूपेण स्वीकृताः। कणादमते तु, पटगतवर्णः तन्तुगतवर्णश्च परस्पराद्भिन्नः गुणः। तन्तुगतवर्णात्पटगतवर्णस्योद्भवः इत्यतस्तयोर्जन्यजनकभावसम्बन्धः प्रतिष्ठितः। जन्यजनकसम्बन्धो नाम येन सम्बन्धविशेषेण कारणात्कार्यमुत्पद्यते। अर्थात् यदा किमपि वस्तु कापि वा प्रक्रिया परस्योत्पत्तेः कारण-स्वरूपत्वेन विद्यते तदा तयोर्मध्ये जन्यजनकभावः विद्यत इति कथ्यते। तन्तुगतवर्णः यदा पटरूपाकारे समाहितो भवति तदा तत्तन्तुगतवर्णेन पटगतवर्णस्योत्पत्तिः सम्भवति। एवञ्च तन्तुगतवर्णः जनकः, पटगतवर्णश्च जन्यः। इत्यवस्थायां च भिन्नगुणरूपेणास्य प्रसिद्धिः। समानजातीयत्वकथने इदं तात्पर्यमस्ति यत्, नात्यन्तभिन्नस्य रूपरसादेर्हेतुर्भवति। परमाणुस्तद्गतगुणश्च निखिलजागतिकपदार्थानामुत्पादनेन सहैव तद्गतगुणान्नप्युत्सृजति। इत्थञ्चोपादानकरणं जगतः परमाणुः एव। प्रत्येकं च परमाणुः रूपरसगन्धस्पर्शरूपेण

विद्यमानान् गुणान् स्वस्मिन् धरति वहति च। परमाणुसम्मेलनेन दृश्यमानपदार्थानां घटपटादीनामुत्पत्तौ सत्यां तत्पदार्थगतगुणा अपि तदाधारभूतेभ्यः परमाणुगतगुणेभ्यः निसृताः भवन्ति। ईश्वरस्य जगत्कारणत्वेन स्वीकारे वैशेषिकनये इयं समस्या प्रादुर्भवति– उपादानकारणं नाम यस्मात्पदार्थसम्भवः तत्। किन्तु, जगतः पदार्थस्तु परमाणुत एवागच्छति, तद्गतगुणाः अपि तत्परमाणुत एवागच्छन्ति। येनेश्वरस्योपादानकारणं न सिध्यति। इदानीं कारणतायां लोकप्रसिद्धस्य वेदोक्तस्य वेश्वरस्य स्वीकारे का समीचीना युक्तिरिति प्रश्ने समादधति कणादानुयायिनः वैदिकत्वान्निमित्तकारणता परमेश्वरस्य। वेदान्तानुसारेण सांख्यदर्शनानुसारेण वा न स्वांशात्सः जगत्सृजति। परमाणूनां सञ्चालनेन संयोगेन विन्यासेन च तत्फलस्वरूपतया तस्येश्वरस्य जगत्सृष्टौ कारणत्वम्।

वैशेषिकन्यायनये कारणं त्रिविधम्।[९] तत्र वैशेषिकसम्मतं समवायिकारणं वेदान्तोक्तोपादानकारणम्। तत्र च वैशेषिकनये समवायिकारणं नाम परमाणुस्वरूपं तन्तुरूपमात्रमेव भौतकारणम्, यच्च कार्यमध्येऽपि तिष्ठति। वेदान्तिनस्तु समवायिकारणप्रसङ्गे उपादानकारणप्रसङ्गे वा ब्रह्मैवाकर्षन्ति, यच्च ब्रह्म स्वयमेव जगद्रूपेण प्रकाशितम्। तथा च मृदैव सर्वदा घटस्य निर्माणं दृश्यते, मृद्भिन्नत्वेन नैवास्ति घटस्य पृथक्सत्ता। यदि घटात् मृत्तिकापसार्यते तर्हि तन्न घटः। पुनश्च यत्र समवायिकारणं नास्ति तत्रासमवायि-कारणमस्तीत्यर्थप्रत्यये निमित्तकारणस्यार्थता सिद्ध्यति। तत्र च निमित्तकारणं दण्डचक्रादि-कार्यरूपश्च घटः पृथक्त्वेनैव तिष्ठति। कार्योत्पत्त्यर्थमावश्यकं निमित्तकारणं किन्तु कार्यस्थितौ नास्ति तस्यावश्यकता–

**यत्र समन्वेति कारणं समवायि तत्।**
**चक्राद्यं साधनं यत्तु घटस्यासमवायि तत्॥**[१०]

वस्त्रे समवायिकारणं तन्तौ तन्तुसंयोगेन तिष्ठति, तेन तत्तन्तुसंयोगोऽसमवायिकारणम्। अपरत्र तन्तौ समवायिकारणं तन्तुसमूहे तिष्ठति। तन्तुसमूहस्य वर्णो वस्त्रसमूहवर्णस्यासमवायि-कारणम्। यतो हि तन्तुगतवर्णः वस्त्रगतवर्णमुत्पादयति, तच्च तन्तौ तिष्ठति यच्च वस्त्रस्य समवायिकारणम्। वस्त्रं च वस्त्रवर्णस्य समवायिकारणं वस्त्रस्य वर्णः सर्वदा वस्त्रे एव तिष्ठतीत्यतः। 'तन्तुत्वमादि अन्यथासिद्धकारणम्' इति असमवायिकारणरूपेण न स्वीकृतं, किन्तु, कार्यार्थमावश्यकम्। तेनानन्यथासिद्धमप्यसमवायिकारणं भवितुमर्हति–

**समवायिनि तिष्ठेद्यत् समवाय्याश्रये तथा।**
**कार्येऽवधृतसामर्थ्यङ्कल्प्यतेऽसमवायि तत्॥**[११]

इत्थञ्च कारणभेदत्रयेणेश्वरस्य कारणतोक्तैवंप्रकारेण– अन्यनिमित्तकारणसत्त्वेऽपि

कार्यमात्रे ईश्वरस्य निमित्तकारणता। अस्य च कारणं चेतनेन विनाचेतने प्रवृत्तिसम्भावाभावात्। ईश्वरस्य निमित्तकारणत्वेन स्वीकारे लोकसङ्गतत्वं वेदप्रसिद्धसङ्गतत्वमपि भवितुं योग्यम्। वेदान्तिनां केवलेश्वरस्य सर्वकारणवादः सर्वानुभवविरुद्धत्वाच्च त्याज्यः इत्यपि गोचरीभूतो भवति। वैदिकसिद्धान्तवादे चैतन्निमित्तकारणवादस्य संसारे सर्वत्राङ्गीकारो दृश्यते। ईश्वरसिद्धिप्रसङ्गेऽप्येतदनुरूपमेवास्ति। यत्कार्यमुपादानकारणेनोत्पन्नं भवति तत्कार्यमुपादानकारणे सर्वदा विद्यते। तद्यथा मृत्तिकया घटस्तन्तुना वस्त्रं हेम्ना चाङ्गुरीयकं निर्मीयते, इत्येवंक्रमं वैशेषिकाः नैयायिकाश्च स्वीकुर्वन्ति किन्तु न प्रतिपादयन्ति।[11]

वैशेषिकमतनिराकरणप्रसङ्गे वेदान्तिनो वदन्ति–

**यत्कार्यञ्जायते यस्मात्तस्मिन् तत्प्रतितिष्ठति॥**
**मृत्तिकायाङ्घटस्तन्तौ पटस्स्वर्णेऽङ्गुलीयकम्।**
**इति वैशेषिकाः प्राहुस्तथा नैयायिका अपि॥**[12]

अङ्कुरादिफलपर्यन्तेषु सर्वेषु कार्येषु सत्ता स्वीक्रियते चेत्, वटबीजे तत्परमाणुः कुतः सम्बन्धितः स्यात्? यतो हि कार्येऽन्वितरूपेण यत्सम्मिलति तदुपादानकारणमिति सर्वजनसम्मतमस्ति। सर्वेषु कार्येषु सत्तान्वितत्वात् सद्रूपब्रह्मैवोपादानकारणमिति स्वीकरणीयम्। परमाणवः न क्वापि समन्वितत्वेनोपलभ्यन्त इत्यतस्ते केनोपायेन कारणत्वेन स्वीकर्तुं योग्याः? द्व्यणुकान्प्रति तेषां कारणत्वं स्यात्, किन्तु कार्यं प्रति न तस्य कारणत्वम्।

परमाणवः सन्त्यतीन्द्रियाः इत्येतस्मात् कार्येष्वप्यतीन्द्रियत्वं स्यात्, न त्विन्द्रियगम्यतेत्येतदेव साक्षात् विरुद्धम्। वेदान्ते तु ब्रह्मणोऽतीन्द्रियस्य सत्ता पारमार्थिकत्वेनोक्ता, तस्मिन् कल्पितजगत्सत्ता तु व्यवहारिकीत्यतो नास्ति दोषलेशमात्रमपि।

यदि कार्येऽभीष्टप्रमुखरूपेण यस्य ग्रहणं क्रियते तदुपादानकारणत्वेनापि स्वीक्रियते तथापि फलाकाङ्क्षी बीजमेव गृह्णाति, न तु परमाणुम्। पुनश्च यदि परम्परानुसारेण परमाणुसमूहग्रहणमिति वदेत्तर्हि ब्रह्मविवर्तबीजग्रहणेन साकं ब्रह्मणोऽपि ग्रहणं स्यात्। सद्रूपं ब्रह्म त्वनुभवसिद्धं, न तु परमाणुसिद्धम्। अत एवैवं वक्तुं योग्यं यत्, परमाणुकारणवादः प्रबलप्रमाणसमूहसापेक्षः न इति। परमाणुरुपादानकारणत्वेन स्वीक्रियते चेत् पूर्वकार्यस्य उत्तरकार्यं प्रति कुतो नोपादानत्वमित्याकाङ्क्षा जायते। ब्रह्मणोऽन्तिमोपादानकारणत्वेन स्वीकारे सति सर्वकार्यं प्रत्युपादानभावस्याभावो न भवति येनोच्यते उपादानकारणगतगुणाः समानजातीयगुणान् कार्येषूत्पादयन्ति। यथा रक्तवर्णयुतात् पशमसूत्रात् रक्तवर्णस्य एव शीतवस्त्रस्य निर्माणं दृश्यते। तथैव पुष्पफलादिषु पुष्पफलयोर्गुणोऽतीव भिन्नः भवति। दुग्धं तरलं सुमिष्टं च, परन्तु दधि अम्लं सान्द्रञ्च इत्येतत्सत्त्वेऽपि कथमेतेषामुपादान-

कारणत्वम्? आत्मन आकाशः संभूतः, आकाशाद्वायुः[14] इत्यादौ श्रुतौ च केवलं क्रमविवक्षा परिलक्ष्यते, न तूपादानकारणस्य प्रतिपादनम्। निश्चप्रचेन कार्ये पूर्वभावः विद्यते परन्तूपादानकारणत्वं तु ब्रह्मणः एव। पुनश्च ब्रह्म वास्तविकतयोपादानकारणमिति वेदान्तिभिः नाङ्गीक्रियते, मायिकोपादानमेव तत्र स्वीकृतम्। अत एवामूर्तत्वादिदोषभियोच्यते– कारणं बीजम्, कार्यं चाङ्कुरः, अंशस्तन्तुः, अंशि वस्त्रम्, गोत्वादि जातिः, गवादि व्यक्तिः, गुणः श्वेतः, गुणि च कमलम्, क्रिया गतिः, तद्वान् च क्रियावान्– इतीत्थम्प्रकारेण विशेषादिज्ञानं कल्प्यते, रूपान्तरं क्रियते, व्यवह्रियते च। विशेषविशेषी, समवायसमवायी, सदृशसदृशीत्यत्र बोद्धव्यम्। तदखण्डप्रकाशस्य सर्वेऽप्येते काल्पनिकरूपमात्रमेव। यथा चैकेनैव मेघेनाश्वहस्तिराक्षसादीनां कल्पना क्रियते। आरम्भवादः, तथा च कार्योत्पत्तिपूर्विका सती तथा च कार्योत्पत्तेः पूर्वं कार्यं कारणे न विद्यते इति मते कार्यं नूतनतयोत्पद्यते। नूतनतयैव तत्सत्तायाः प्रारम्भो भवति। अनेनैव हेतुना सत्कार्यवादः आरम्भवादः इति नाम्नाप्यभिधीयते। परिणामवादे च कार्यकारणभावो वास्तविकतया न सिद्ध्यति। अस्माद्भिन्नः कोऽपि प्रधानवाद्यपि नास्तीत्यतः विवर्तवादः स्वतः सिद्धः। एतं च शिष्टं न्यायं भगवान् गौडपादाचार्यः स्वीचकार।[15]

एतद्विहायापि '**स एषोऽणिमैतदात्म्यमिदं सर्वं**'[16] '**तम आसीत्तमसा गूढमग्रे**'[17] च श्रुतिषु परमाणुः प्रधानञ्च जगत्कारणरूपेणोक्तम्। अतोऽनुमानसिद्धप्रकाशरूपतायाः जगत्कारणत्वेन स्वीकारे वादिनं यदि वेदाश्रिततत्वेन स्वीकारे आशङ्क्यते तर्हीदं ज्ञातव्यं यत्, वैशेषिकसांख्याभ्यां परमाणुप्रधानयोर्जडत्वेनैव स्वीकारो दृश्यते। वैशेषिकमतानुसारेण त्वात्मा जडस्वरूपः, ज्ञानगुणः आत्ममनःसंयोगेनोत्पद्यते।

सांख्ये चेतनः पुरुषः, प्रकृतिस्तु सर्वथा भिन्ना जडस्वरूपा च प्रतिपन्ना। वेदप्रमाणेन तु चैतन्यसिद्धिः बहूदूरेऽस्ति, जगत्कारणतापि तेन न सिद्ध्यति। यच्च ब्रह्मसूत्रे ईक्षत्यधिकरणे प्रतिपादितमस्ति। सामवेदे छान्दोग्योपनिषदि च '**तदैक्षत बहु स्यां प्रजायेय**'[18] स्पष्टतयेदं प्रदर्शितं यत्, आत्मरूपिणः जगत्कारणत्वे विचारः बहुभवनञ्चोभावुक्तौ। तस्माच्चानात्मपदार्थः कारणत्वेन श्रुत्या न प्रतिपादितः।

एतेनैव पुनर्निमित्तकारणवादस्यावैदिकत्वमपि सिद्ध्यति। ज्ञानं क्रिया चेति द्वयमचेतनद्रव्यमतिरिच्य चेतनसम्बन्धेन द्रष्टव्यं भवति। वेदान्तशास्त्रे कूटस्थत्वेनेश्वरस्य स्वीकारोऽस्ति। तेन तस्मिन् कर्तृत्वज्ञातृत्वादीनामतितुच्छत्वेनैव प्रतिभानं स्यात्। यद्यपीश्वरः स्वरूपतोऽव्ययोऽपरिणाम्यक्रियः सर्वासम्बद्धश्च सन् स्वमायाशक्त्येक्षणसर्जनादिमत्त्वात् सर्वज्ञः सर्वक्रियमाणः इत्येवंरूपेणापि तस्य स्वीकारो दृश्यते।

तस्यामेव मायाशक्तौ सर्वं कार्यकारणात्मकं जगदव्यक्तरूपेण वर्तमानमस्ति। श्रुतिषु चैनं सर्वशक्तिमन्तमीश्वरं विश्वस्याभिन्ननिमित्तोपादानकारणमित्युक्तमस्ति। यथा च कार्यकारण-भूतोपाध्यावेशेन कुम्भकारजीवे ज्ञानक्रिया दृश्यते, तथैव कार्यकारणतत्संस्काररूपमायोपाध्यावेशेन परमेश्वरे ज्ञानक्रियारूपशक्तिः स्वीकर्तव्या। इत्थञ्च परमेश्वरस्य जगदुपादानकारणत्वं न केवलं वेदान्तप्रसिद्धमपि त्वनुभवसिद्धमपि। पुनश्च प्रामाणिकत्वेनैतदथर्ववेद[19] कृष्णयजुर्वेदे[20] ष्वप्युक्तमस्ति, अपरत्र वेदान्तसूत्रेऽपि[21] सम्यक्तया साध्यत एतन्मुनिना।

**उपसंहारः**

वैशेषिकदर्शने परमाणोः जगत्कारणत्वेन स्वीकारः दृश्यते, परमाणुः नित्यो-ऽचलोऽविभाज्यो निरवयवस्वरूपश्च मौलिकपदार्थः; तत्संयोगविभागाभ्यामेव अणुः द्व्यणुकः त्र्यणुकः इत्यादीनां निर्माणं सम्भवति, जडस्य जगतः उत्पत्तिविनाशौ सिध्यतश्च। तस्मादेव वैशेषिकमतानुसारेणेश्वरस्योपादानकारणत्वं न स्वीक्रियते, अपि तु केवलमाद्य-स्पन्दनप्रदानेन निमित्तकारणत्वेन स्वीकारः परिलक्ष्यते।

किन्तु वेदान्तिनस्त्वभिप्रायो भिन्न एवास्ति। तन्मते तु ईश्वर एव जगतः अभिन्नकारणम्। परमाणुरूपेण प्रधानरूपेण वा नास्ति कस्यचित् पृथगस्तित्वम्। सर्वव्यापि ब्रह्मैव जगतः एकमात्रत्वेनाभिन्नत्वेन चोपादानकारणम्।

वेदान्तोक्तः ईश्वरः स्वस्वरूपेऽपरिणाम्यक्रियोऽपि सन् स्वमायाशक्त्येक्षणसर्जन-स्थितिपालनलयरूपं कार्यं करोति। सर्वशक्तिमान् सर्वज्ञः सर्वव्यापी च कारणरूपेण प्रतिष्ठापयति। वेदा उपनिषत्साक्षिभिः प्रतिपादयन्ति यत् आत्मैव ब्रह्मस्वरूपं जगतः अभिन्नं निमित्तोपादानकारणमिति। यथा मृदविच्छिन्नेन घटः तन्त्ववच्छिन्नेन वस्त्रं तद्वत्समग्रजगदेव ब्रह्मणि सत्तारूपेण निहितमस्ति।

एवञ्च वैशेषिकमते जगतः कारणं परमाणवः (जडाः, नित्याश्च), ईश्वरस्तु निमित्तकारणमात्रम्। वैशेषिकमते, परमाणुः द्रव्यं वा समवायिकारणत्वेन स्वीकृतम्। वेदान्तमते तु, ईश्वर एव जगतोभिन्नकारणमस्ति सममेवेश्वरो निमित्तोपादानोभय-कारणात्मकः। तत्समवायिकारणमेवोपादानकारणम्, पुनश्च, तदेव ब्रह्मस्वरूपः परमात्मेति। वेदान्तप्रस्थाने ईश्वरः सर्वशक्तिमान् सर्वज्ञः सर्वव्यापीत्येवंक्रमेण कारणरूपेण प्रतितिष्ठति, वेदोपनिषत्साक्ष्यप्रमाणेन च प्रतिपादयति यत् आत्मा वा ब्रह्म वास्य जगतोऽभिन्नं निमित्तोपादानकारणमिति शिवम्।

*

## सन्दर्भाः


1. उपादानं प्रपञ्चस्य संयुक्ताः परमाणवः। मानसोल्लासमाधुरी, 2.1
2. वैशेषिकदर्शनम्, 1.1.4
3. वैशेषिकदर्शनम्– 1.1.5
4. वैशेषिकदर्शनम्– 1.1.20
5. तर्कसंग्रहः (सटीक–अध्यापनासहितम्), पृ. 265
6. भारतीयदर्शनम् (आलोचनम् अनुशीलनञ्च), पृ. 169
7. व्योमवती
8. मानसोल्लासमाधुरी, आत्मा मूलकारणम्, पृ. 45
9. तर्कभाषा, पृ. 25
10. मानसोल्लासमाधुरी, 2.3
11. मानसोल्लासमाधुरी, 2.4
12. मानसोल्लासमाधुरी, 2.5
13. मानसोल्लासमाधुरी, 2.5-6
14. तैत्तिरीयोपनिषद्, 2.1.1
15. माण्डुक्यकारिका खण्डनखण्डखाद्यञ्च
16. छान्दोग्योपनिषद्, 6.7
17. ऋग्वेदः, 10
18. छान्दोग्योपनिषद्, 6.2
19. मुण्डकोपनिषद्, 1.1.7
20. श्वेताश्वतरोपनिषद्, 1.3
21. ब्रह्मसूत्रम्, 2.3.10


*

# प्रणवोपनिषदः तात्त्विकानुशीलनम्

**डॉ. प्रमोदकुमारसिंहः**
**डॉ. अवनीन्द्रकुमारपाण्डेयः**

**शोधसारः**

अस्मिन् शोधपत्रे प्रणवोपनिषद् इत्यस्यामुपनिषदि निरूपितस्य ओंकारतत्त्वस्य दार्शनिकदृष्टया समालोचनात्मकं अनुशीलनम् उपस्थाप्यते। अत्र ओंकारः केवलं ध्वनिसंज्ञकं वर्णमात्रं न, अपि तु सृष्टेः आदिसूत्रम्, ब्रह्मविद्यायाः मूलं रहस्यं, साधकचेतनायाः अन्तरङ्गमार्गश्च इति त्रिविधरूपेण विवेचितः। '**ओमित्येकाक्षरं ब्रह्म**'[1] इत्येतं मन्त्रम् आधाररूपेण स्वीकृत्य, अयं शोधः अकार–उकार–मकार–रूप–अक्षरत्रयस्य प्रतीकत्वम्, अर्धमात्रायाः सूक्ष्मत्वं, नाड्यात्मकसंरचनाम्, अथ च नादयोगस्य अमृतत्वं विवेचयति।

शोधपत्रेऽस्मिन् विशदतया प्रतिपाद्यते यत् प्रणवः न केवलं तात्त्विकविचारः, अपि तु साधकस्य आत्मान्वेषणमार्गे एकः अन्तःपथः अपि अस्ति। त्रैविध्य–एकत्वयोः द्वन्द्वः कथं अद्वैतबोधपर्यन्तं साधकं नयति तथा च नादयोगस्य साधनया साधकः कथं शब्दमात्रम् अतीत्य ब्रह्मणि विलीय अमृतत्वं प्राप्नोति–

**यस्मिन् स लीयते शब्दस्तत्परं ब्रह्म गीयते।**[2]

अन्ते, इदं **शोधपत्रम्** निष्कर्षरूपेण प्रतिपादयति यत्– ओंकारस्य एषा रहस्यनिष्ठा मीमांसा ध्वनिविज्ञानस्य, योगदर्शनस्य, अध्यात्मसाधनायाः च क्षेत्रे नवविचारोन्मेषस्य अभिनवद्वाराणि उद्घाटयितुं समर्था भवति।

**कूटशब्दाः–** प्रणवोपनिषद्, ओंकारतत्त्वमीमांसा, त्रैविध्यप्रतीकवादः, नादयोगः, ब्रह्मविद्यारहस्यम्।

## 1. प्रस्तावना

भारतीयवाङ्मये प्रणवः इत्याख्यः 'ॐ' शब्दः शब्दातीतस्य ब्रह्मणः मूर्तिमत्-प्रतीकरूपेण उपास्यते, यः समस्तसृष्टेः आदिस्रोतः, आधारः लयबिन्दुश्च विद्यते।

एष एव प्रणवः सृष्टेः उत्पत्तिस्थितिलयकारणरूपेण ब्रह्मविद्यायाः केन्द्रीयतत्त्वं विद्यते। प्रणवोपनिषद् इति ग्रन्थोऽयं यद्यपि अथर्ववेदीय–उपनिषत्परम्परायाम् अल्पज्ञातः, तथापि तत्त्वतः अतीव महत्त्वपूर्णोऽस्ति, यस्मिन् प्रणवतत्त्वस्य रहस्यात्मकं स्वरूपम् उद्घाट्यते। उपनिषदः प्रारम्भे एव ऋषिः उद्घोषयति –

**पुरस्तद्ब्राह्मणस्तस्य विष्णोरद्भुतकर्मणः।**

**रहस्यं ब्रह्मविद्याया धृताग्निं सम्प्रचक्षते।।**[3]

इत्यनेन ब्रह्मस्वरूपिणः विष्णोः अद्भुतकर्माणि, अग्निरूपायाः ब्रह्मविद्यायाः रहस्यमयं स्वरूपं च प्रतिपाद्यते। तत्रैव ओंकारः –

**ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः।**

**शरीरं तस्य वक्ष्यामि स्थानकालत्रयं तथा।।**[4]

इत्यनेन एकाक्षरब्रह्मरूपेण प्रतिष्ठाप्यते, यं ब्रह्मवेत्तारः अविनाशि ब्रह्म इत्यवधारयन्ति। एष एव भावः माण्डूक्योपनिषदि अपि स्पष्टतया प्रतिध्वनितः, यत्र उक्तं –'**ओमित्येत-दक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव**'[5] इति। छान्दोग्योपनिषदि तु अयमेव ओंकारः–

'**ओमिति एतदक्षरमुद्गीथमुपासीत**'[6] इति वाक्येन उपास्यत्वेन उद्गीथरूपेण दर्शितः तथा कठोपनिषदि अपि अयम् ओंकारः मोक्षप्राप्तेः परमं श्रेष्ठं च आलम्बनमिति निदर्शितः–

**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**

**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।**[7] इति।

प्रणवोपनिषद् ओंकारं केवलं ध्वनिरूपेण एकाक्षरब्रह्मरूपेण वा न स्वीकरोति, अपितु तं त्रैविध्यात्मकप्रतीकवादेन विस्तृतरूपेण प्रतिपादयति, यत्र सः त्रिदेव–त्रिलोक–त्रिवेदत्र्यग्निरूपेण विवेचितः–

**तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः।**

**तिस्रो मात्रार्धमात्रा च प्रत्यक्षस्य शिवस्य तत्।।**[8] इति।

अत्र अकारः ब्रह्मणः, उकारः विष्णोः, मकारः महेशस्य च प्रतीकरूपेण संस्थाप्यते–

**ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च।**

**अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः।।**[9]

**यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च।**
**विष्णुश्च भगवान् देव उकारः परिकीर्तितः॥**[10]

इत्यादिमन्त्रैः। अस्याः उपनिषदः एका महती विशिष्टता अपि दृश्यते, यत् अत्र अर्धमात्रा–शिखा नाडी–नादयोग–सम्बन्धिनी रहस्यमयी मीमांसा सम्पादिता। या मीमांसा–

**शिखा च दीपसङ्काशा यस्मिन्नु परिवर्तते।**
**अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता॥**[11]
**द्विसप्ततिसहस्राणि नाडिभिस्त्वा तु मूर्धनि।**
**वरदं सर्वभूतानां सर्वं व्याप्यैव तिष्ठति॥**[12]

इत्यादिमत्रेषु स्पष्टं दृश्यते। एवमेवात्र रहस्यं प्रतिपादितं यत् कथं प्रणवसाधनया साधकः नादबिन्दुमाध्यमेन ब्रह्मणि प्रलीय अमृतत्वमाप्नोति।

अधुनातने काले यदा ध्वनिविज्ञानं नादयोगः चेतनाऽनुशीलनं च इत्यादयः नवविमर्शाः वैज्ञानिक–साधना–क्षेत्रे उदीयन्ते, तदा प्रणवोपनिषदः तात्त्विकं समालोचनात्मकम् अध्ययनं न केवलं दर्शन–विज्ञान–परिप्रेक्ष्ये एव उपयुक्तं, अपितु साधकस्य आत्मिकसाधनायाः कृतेऽपि आवश्यकम्।

**2. प्रणवब्रह्मणः स्वरूपम्**

प्रणवोपनिषदि ओंकारः केवलं ध्वनिरूपेण न निर्दिष्टः, अपि तु सः सृष्टेः वेदानां देवत्वस्य च अनवच्छिन्ना अखण्डा च शृङ्खलारूपेण प्रतिष्ठापितः। एषः ग्रन्थः प्रतिपादयति यत् प्रणव एव ब्रह्मणः परमं रहस्यं, यः कर्ममायामलावृतं जीवम् उद्धृत्य मोक्षद्वारम् उद्घाटयति। अयं भावः मुण्डकोपनिषदि अपि प्रतिपाद्यते –

**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**
**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥**[13]

इत्यत्र प्रणवः धनुः, आत्मा बाणः, ब्रह्म लक्ष्यं च इति निरूपितं, तल्लक्ष्यं साधकेन सावधानतया वेद्धव्यम्, येन सः ब्रह्मणि तन्मयो भवेत्। एवं '**यस्य ज्ञानमयं तपः**'[14] – इत्यत्र ज्ञानमयतपसा ब्रह्मविद्यायाः सिद्धिरपि प्रतिपाद्यते। अतो हि प्रणवब्रह्मस्वरूपम् त्रिषु स्तरेषु प्रकाशते – (1) ब्रह्मविद्या–रहस्यतत्त्वरूपेण, (2) ओंकारस्य एकत्वदृष्टिरूपेण, (3) त्रिविधदेव–लोक–वेदसम्बद्धप्रतीकवादरूपेण।

**2.1 ब्रह्मविद्यायाः रहस्यतत्त्वम्**

प्रणवोपनिषदि निरूपितं ब्रह्मविद्यायाः रहस्यतत्त्वं केवलं वैदिकज्ञानपरम्परायाः एकम्

अंशमात्रं न, अपि तु निखिलकर्मबन्धविनाशस्य अन्तर्विज्ञानरूपम्। एषा विद्या तपः-जप–ध्यान–साधन–समन्वयेन प्रकाशते, यथा उक्तम् –

**पुरस्ताद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः।**
**रहस्यं ब्रह्मविद्याया धृताग्निं सम्प्रचक्षते॥**[15]

अत्र 'धृताग्निः' इत्युक्तिः सूचयति यत् एषा विद्या अग्निशक्तिवत् पापसमूहं भस्मीकुर्वती मुक्तिं जनयति। कठोपनिषदि अपि अयमेवार्थः प्रतिपाद्यते– **यं ज्ञात्वा मुच्यते जन्तुः।**[16] इति रहस्यतत्त्वमिदं केवलं तत्त्वदृष्ट्या महत्त्वपूर्णं न, अपि तु साधकस्य चित्तशुद्धये, कर्मभोगसंसारबन्धविमोचनाय च आवश्यकम्। प्रणवोपनिषत् सूचयति यत् यः साधकः अन्तःकरणेन ओंकारस्य रहस्यं जानाति, स एव भूत–वर्तमान–भविष्य-कालत्रयम् आत्मबोधेन आच्छादयति–

**ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः।**
**शरीरं तस्य वक्ष्यामि स्थानकालत्रयं तथा॥**[17]

अतो हीयं ब्रह्मविद्या न केवलं वेदमन्त्रेषु, अपि तु साधकचित्ते विद्यमानाग्निकुण्डे जागर्ति। अन्यथा ओंकारस्य जपः ध्यानं च केवलं बाह्यकर्मप्रायं स्यात्–आन्तरिक-प्रकाशविहीनम्। एष एव विशिष्टः आत्मावलोकनात्मकः संकेतः अस्योपनिषदः यत् ज्ञान–कर्म–ध्यान–समन्वयेनैव ब्रह्मविद्यायाः रहस्यं स्फुटतया प्रत्यक्षीभवतीति।

### 2.2 ओंकारस्य एकत्वदृष्टिः

प्रणवोपनिषदः यः महत्त्वपूर्णः अंशः, स तु एषः – यत् अयं ग्रन्थः ओंकारस्य त्रैविध्यमात्रेण सीमां न विधत्ते, किन्तु तस्य अन्तर्गतं अद्वैतस्वरूपम् अपि प्रकाशयति। अत्र त्रिदेव–त्रिलोक–त्रिवेदाः 'अ', 'उ', 'म्' इत्येतेषु आरोपिताः, परं तेषां विभाजनानां परमं प्रयोजनं साधकस्य तस्मिन् 'एकस्मिन्' प्रतिष्ठापनमेव।

तदर्थं माण्डूक्योपनिषद् अपि उद्घोषयति– **ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव।**[18] अत्र 'सर्वम् ओंकार एव' इति वचनं स्पष्टं प्रतिपादयति यत् समग्रं सृष्टिचकम् ओंकारे एव लीनम्। एषा दृष्टिः नामरूपव्यवहारात् परतरा सती साधकं परमैक्ये प्रतिष्ठापयति, यत्र जाग्रत्–स्वप्न-सुषुप्त्यवस्थाः अपि ओंकारस्य परिसरे एव व्यवस्थिताः।

प्रणवोपनिषद् तदवधारणां सूक्ष्मतया वदति (उद्धरणं 8)–

**तत्र देवास्त्रयः प्रोक्ता ... ...**

अत्र प्रत्यक्षशिवरूपेण यः ओंकारः, स एव सम्पूर्णविभूतीनां एकस्वरूपत्वमिति सूचितम्। एषा एकता केवलं तात्त्विकन्यायेन न, अपि तु नादयोगस्य अन्तिमलक्षणं– यदा साधकः अर्धमात्रायां प्रविश्य अनेकताविचारं परित्यज्य, शिखायामिव एकत्वे लीयते। अयम् ओंकारस्य दार्शनिकोच्चावचः–'**अनेकेषु एकः, एका चानेकेषु**' इति रहस्यात्मकः वेदान्तभावः।

### 2.3 त्रिविधदेव–लोक–वेदस्य प्रतीकवादः

प्रणवोपनिषद् अस्मिन् अंशे त्रिविधप्रतीकवादस्य माध्यमेन प्रतिपादयति यथा– सृष्टेः समग्रस्वरूपम् ओंकारे निहितमपि तस्माद् अभिन्नं भवति। 'अ', 'उ', 'म्' इत्येते वर्णाः केवलं वाच्यवर्णा न, अपि तु सर्जनपालनसंहारचक्रस्य प्रतीकाः।

एषः प्रतीकवादः दर्शनं, विज्ञानं, साधनां च एकसूत्रेण बध्नाति। अतो हि ओंकारः न केवलं वर्णमालायाः एकः संघातः, किन्तु सम्पूर्णब्रह्माण्डीयचेतनायाः प्रतीकात्मकं चिह्नमस्ति, येन साधकः स्वात्मनो लघुत्वात् ब्रह्मत्वं प्रति यात्रां करोति।

### 3. अकार–उकार–मकाराणां तात्त्विकविवेचनम्

प्रणवोपनिषदि निरूपितम् अकार–उकार–मकाराख्यम् ओंकारस्य त्रैविध्यात्मकं स्वरूपं केवलं ध्वनिसंज्ञकं न, अपितु स ब्रह्माण्डस्य रहस्यमय्याः संरचनायाः प्रत्यक्षचिह्नरूपेण संस्थापितम्। अत्र तिस्रः एताः मात्राः सम्पूर्णसृष्टेः त्रिविधगतयः– सृष्टिः, स्थितिः, लयः– इत्येतासु संव्याप्ताः सन्ति। यथोक्तम् (उद्धरणं 8)–

**तत्र देवास्त्रयः प्रोक्ताः ... ...**

– इत्यनेन मन्त्रेण एषा यथा प्रमाणीकृता तथैव प्रतिपाद्यते यत् एषा त्रैविध्यदृष्टिः साधकं द्वैतात् अद्वैतं प्रति प्रेरयति, शिवस्य प्रत्यक्षत्वेन वर्णनं तु तात्त्विकतया तस्य अद्वैतरूपस्य अनुभूत्याधारितत्वात्।

### 3.1 अकारस्य स्वरूपम्

अकारः प्रणवस्य आदि–बीजस्वरूपेण उपनिषदि प्रतिष्ठितः–

**ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च।**
**अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः॥**[19]

अत्र ऋग्वेदस्य मन्त्रशक्तिः, पृथिव्याः स्थूलत्वम्, गार्हपत्याग्नेः यज्ञीयतेजः, ब्रह्मणः सृष्टिशक्तिः च अकारे संगृहीते। ध्वनिविज्ञानमते अपि अकारः आद्यः नादः – स्वयमेव मुखात् निष्पन्नः प्रथमः ध्वनिः – यः अन्येषां वर्णानां मूलं भवति। अयम् 'अ' नादः

केवलं वाचिकव्यवहारस्य आधारभूतः न, अपि तु विचारमूलकसृष्टेः अपि प्रथमः प्रकाशः। अकारः तस्मात् आदिशक्तिरूपेण दृश्यते।

### 3.2 उकारस्य स्वरूपम्

उकारः प्रणवस्य मध्यबिन्दुः, यः सृष्टेः लयस्य च मध्ये स्थितः पालनात्मकगत्याः प्रतीकः।

**यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च।**
**विष्णुश्च भगवान् देव उकारः परिकीर्तितः॥**[20]

अत्र यजुर्वेदः यज्ञसंस्कारः, अन्तरिक्षं जीवनगतिः, दक्षिणाग्निः यज्ञरक्षणशक्तिः, विष्णुः च परिपालनकर्तारः इत्येते सर्वे उकारे आरोपिताः। उकारः दार्शनिकदृष्ट्या कर्म–ज्ञानयोर्युग्मबिन्दुः–सञ्ज्ञानशक्तेः सन्तुलनम्। यः उकारं जपति, स मध्यस्थं भावं चिन्तयन् ब्रह्माण्डगतप्रवाहस्य सम्यगवबोधनं कुर्यात्।

### 3.3 मकारस्य स्वरूपम्

मकारः प्रणवस्य चरमबिन्दुः, यः लयनिर्वाणयोः प्रत्यक्षद्वारम् –

**सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च।**
**ईश्वरः परमो देवो मकारः परिकीर्तितः॥**[21]

अत्र सामवेदस्य स्वरात्मकता, द्युलोकस्य आत्मदर्शित्वम्, आहवनीयाग्नेः कर्मान्तत्वम्, ईश्वरस्य संहारशक्तिः च मकारे प्रतिफलितानि। सामवेदः चेतनां शून्ये लयं गमयति, द्यौः आत्मनः उत्कर्षं दर्शयति, आहवनीयाग्निः यज्ञानां परं समाप्तिबिन्दुं सूचयति। महेश्वरः न केवलं संहारकर्ता, अपि तु नवनिर्माणस्य आधारः। मकारस्योच्चारणेन वाणी निःशब्दा भूत्वा साधकं मौनात्मकशिवत्वे स्थापयति – अयम् आत्मलयाद्याम् प्रवेशद्वारं भवति।

### 3.4 त्रिविधं तेजः – सूर्यः, चन्द्रः, अग्निः

एतासां तिसृणां मात्राणां सम्बन्धः केवलं देव–लोक–वेदैः न, अपि तु त्रिविधतेजसा सह अपि दर्श्यते–

**सूर्यमण्डलमाभाति ह्यकारश्चन्द्रमध्यगः।**
**उकारश्चन्द्रसङ्काशस्तस्य मध्ये व्यवस्थितः॥**
**मकारश्चाग्निसङ्काशो विधूमो विद्युतोपमः।**
**तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्नितेजसः॥**[22]

अकारः सूर्यस्वरूपः, आत्मज्ञानदीप्तिदायकः; उकारः चन्द्रस्वरूपः, शीतलता–शमन–शुद्ध्यात्मकः; मकारः अग्निस्वरूपः, विद्युन्मयीशक्तियुक्तः। एतत् त्रिविधतेजः साधकस्य अन्तःकरणं ज्ञान–शान्ति–ऊर्जायाः संगमे आलोकयति।

एवम् अकार–उकार–मकाररूपाः एते वर्णाः केवलम् उच्चारणीयनादाः न, किन्तु सृष्टेः त्रिकालचक्रे प्रतिष्ठितं ब्रह्मतत्त्वं दर्शयन्ति। एष एव प्रणवोपनिषदः दार्शनिकविमर्शस्य परमबिन्दुः – यत्र नादे आत्मा, वर्णे ब्रह्म, जपे मोक्षः च प्रतीयते।

## 4. अर्धमात्रा–नाडी–नादयोगानां समालोचनात्मकं दर्शनम्

प्रणवोपनिषदि वर्णितम् ओंकारस्य रहस्यमयं स्वरूपं केवलं त्रिमात्रात्मकं न स्यात्, अपि तु तस्याः शीर्षे स्थितायाम् अर्धमात्रायां निहितं दृश्यते। इदं गूढतत्त्वं शिखारूपेण, प्राणमयीषु नाडीषु नादयोगस्य परमपथे च संबध्यते। उपनिषत् सूचयति–

**शिखा च दीपसङ्काशा यस्मिन्नु परिवर्तते।**
**अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता॥**[23]

अत्र दीपज्योतिःसमप्रभायाः शिखारूपेण अर्धमात्रा दृष्टा, या साधकस्य अन्तःकरणे ऊर्ध्वगामिनं चेतनास्रोतः प्रवर्तयति।

### 4.1 अर्धमात्रा शिखारूपा चेतना च

प्रणवस्य अर्धमात्रा केवलं व्याकरणस्य अनुस्वारः नास्ति, अपितु तुरीयावस्थायाः प्रवेशद्वाररूपेण साधकस्य साधनायाम् उपयुज्यते। '**शिखा च दीपसङ्काशा...**' इत्यत्र शिखाया जाज्वल्यमाना मूर्तिः प्रकाश्यते या साधकं जाग्रत्–स्वप्न–सुषुप्तीनां सीमातीतं चतुर्थं ब्रह्मरूपं नयति। '**पद्मसूत्रनिभा सूक्ष्मा शिखाभा दृश्यते परा। नासादिसूर्यसङ्काशा सूर्यं हित्वा तथापरम्॥**' (प्रणवोपनिषद् 10) इत्यत्र अर्धमात्रा कमलसूत्रसदृशसूक्ष्मरूपेण वर्ण्यते या नासारन्ध्रद्वारा प्रविश्य चित्तं नाड्यन्तरङ्गं कृत्वा सूक्ष्मसूर्यमण्डलस्य भेदनं करोति। इयमर्धमात्रा नादबिन्दुतत्त्वेन साधकं ब्रह्मशिखरे प्रतिष्ठापयति यत्र शब्दः प्रलीय ब्रह्मणि परिणमति।

### 4.2 नाड्यात्मकसंरचना

प्रणवोपनिषत् शरीरे व्यापृतं नाडीजालं ब्रह्मविद्यायाः मूर्तस्वरूपेण अवलोकयति–

**द्विसप्ततिसहस्राणि नाडिभिस्त्वा तु मूर्धनि।**
**वरदं सर्वभूतानां सर्वं व्याप्यैव तिष्ठति॥**[24]

– इत्यनेन मन्त्रे निर्दिष्टं यत् 72,000 नाड्यः मानवदेहे व्याप्ताः, यासां माध्यमेन

अर्धमात्रारूपेण प्राणशक्तिः शरीरे सञ्चरति। योगशास्त्रे अपि एतस्य एव प्रतिपादनं दृश्यते– यत् नाडिशुद्ध्यनन्तरं कुण्डलिनीशक्तिः सहस्रारे स्थितं ब्रह्मसदृशं तेजः स्पृशति। अयम् अन्तःकरणे स्थितो यज्ञोऽग्निरूपेण तेजस्विनि प्राणे दीप्यते, यत्र बाह्यानुष्ठानम् अन्तःकरणप्राणाग्नौ परिणमति।

### 4.3 नादयोगे अमृतत्वप्राप्तिः

नाड्यः अर्धमात्रा च यत्र लीयन्ते तत्र नादयोगः उद्भवति। अत्र साधकः ध्वनिस्वरूपे ब्रह्मणि लीयते। उपनिषद् वदति–

**कांस्यघण्टानिनादः स्याद्यदा लिप्यति शान्तये।**
**ओङ्कारस्तु तथा योज्यः श्रुतये सर्वमिच्छति॥**[25]

अत्र कांस्यनिनादसदृशं अन्तर्नादं श्रुत्वा साधकस्य चित्तवृत्तयः शमं यान्ति। अयं नादयोगः यत्र बाह्यशब्दविलयेन केवलमन्तर्नाद एव शेषो भवति। अन्ते उपनिषदपि निष्कर्षरूपेण प्रतिपादयति–

**यस्मिन् स लीयते शब्दस्तत्परं ब्रह्म गीयते।**
**सोऽमृतत्वाय कल्पते सोऽमृतत्वाय कल्पते॥**[26]

अत्र शब्दस्य लयः ब्रह्मस्वरूपे, अमृतस्वरूपे च लयं दर्शयति। एतद् अमृतत्वं केवलं शरीरेण न, अपि तु आत्मनः मायातीतस्थितेः प्रतिफलनम्।

एवं दृश्यते यत् अर्धमात्रा नाड्यः नादयोगः च एते न केवलं तात्त्विकचिन्तनस्य विषयाः, अपि तु साधकस्य साक्षात्साधनायाः मूलानि भवन्ति। इयं प्रणवोपनिषद् एवम् एकम् अमूल्यं योगदानं यच्छति यत् ओंकारः न केवलं वर्णः, अपि तु नादरूपेण ब्रह्माविष्करणस्य सेतुरेव।

## 5. प्रणवतत्त्वस्य दार्शनिकसन्दर्भानां तुलनात्मकसमालोचना

भारतीयदर्शनपरम्परायां 'ॐ' केवलं ध्वनिरूपं न, अपि तु ब्रह्मणः प्रत्यक्षालम्बन-रूपेण प्रतिष्ठितम्। श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः स्पष्टं वदति यत् यः साधकः 'ॐ' इत्येकाक्षरं जपति मां च अनुस्मरन् शरीरं त्यजति, स परमां गतिम् आप्नोति –

**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**
**यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥**[27]

एष एव भावः गीतायाः पद्ये '**अक्षरं ब्रह्म परमम्**'[28] इत्युक्त्या प्रतिपादितः यत् ब्रह्मणः परमं स्वरूपम् अक्षरं, जीवस्य स्वभावः चैव अध्यात्मम्। एवं च एकस्मिन्

श्लोके यत् यज्ञदानतपःक्रियाणामारम्भे 'ॐ' इत्यस्य प्रयोगः ब्रह्मवादिभिः विहितः–

**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।**

**प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्।।**[29]

– अनेन दर्श्यते यत् प्रणवः केवलं मोक्षमात्रस्य साधनं न, किन्तु सर्वधर्मकर्मणां मूलाधारः इति।

एषा एव भावना माण्डूक्योपनिषदि विस्तरेण प्रतिपाद्यते– '**ॐ इत्येतदक्षरमिदं सर्वम्**'[30] इत्यनेन त्रिकालातीतं ब्रह्मस्वरूपम् ओंकार एव इति साक्षात्कारः कृतः। प्रश्नोपनिषदि (5.2) सत्यकामपिप्पलादसंवादे स्पष्टं प्रतिपन्नं यत् यः पुरुषः जीवनपर्यन्तं 'ॐ' इत्यस्य ध्यानं करोति, स ब्रह्मलोकं प्राप्नोति– '**एतद्वै सत्यकाम परं चापरं च परं चापरं च ब्रह्म यदोङ्कारः तस्माद्विद्वानेतेनैवायतनेनक्तर्मन्वेति।**' कठोपनिषदि ओंकारः श्रेष्ठं परमं च आलम्बनम् इत्यभिधाय साधकस्य ब्रह्मलाभसाधनरूपेण निर्दिष्टः–

**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**

**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।**[31]

श्वेताश्वतरोपनिषदि ध्यानप्रक्रियायां प्रणवः 'उत्तरारणिः' इति निर्दिश्य '**स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्**'[32] इत्युक्तम्। साधकः आत्मतपसा अग्निमन्थनं कृत्वा ब्रह्मसाक्षात्कारं करोति। छान्दोग्योपनिषदि '**ओमित्येतदक्षरमुद्गीथमुपासीत**'[33] इत्युपदेशेन उद्गीथोपासना ओंकारोपासना एव करणीयेति निर्दिष्टम्। मुण्डकोपनिषद् ओंकारं धनुः, आत्मानं शरः, ब्रह्म तल्लक्ष्यमिति उपमां निरूप्य साधकं ब्रह्मलाभाय प्रेरयति – '**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**'[34] तत्रैव[35] ब्रह्मविद्यायाः फलं ब्रह्मैव भवति इति घोषितं – इदं ज्ञानम् ओंकारस्य आलम्बनेनैव सिद्ध्यति।

योगदर्शने पतञ्जलिमुनिना स्पष्टं निगदितं – '**तस्य वाचकः प्रणवः। तज्जपस्तदर्थभावनम्।**'[36] ईश्वरस्य वाचकः प्रणव एव, तस्य जपः अर्थभावनया सह साधकम् ईश्वरैक्यं प्रति नयति। मनुस्मृतौ '**एकाक्षरं परं ब्रह्म**'[37] इत्युक्त्या एव प्रणवः परब्रह्मरूपेण प्रतिष्ठापितः। ब्रह्मसूत्रे शाङ्करभाष्ये आचार्यशङ्करः प्रतिपादयति – वेदानां वाक्येषु प्रणव एव ब्रह्मणः प्रधानवाचकः सूचकश्च – '**अक्षरं प्रणवः किंवा ब्रह्मलोकेऽक्षराभिधा**'[38] इति।

श्वेताश्वतरोपनिषदि '**महतो महीयानिति**'[39] इत्यादिना प्रणवस्य परब्रह्मवाचकत्वं प्रतिपादितम्। शिवषडक्षरस्तोत्रेऽपि '**ॐ कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।**

**कामदं मोक्षदं चैव ओंकाराय नमो नमः॥**[40] इत्युक्त्या योगिनां ध्यानविषयः प्रणवः, यः कामं च मोक्षं च ददाति।

एवं दृश्यते यत् उपनिषदः श्रीमद्भगवद्गीता योगसूत्राणि स्मृतयः स्तोत्रसङ्ग्रहाश्च सर्वे प्रणवस्य ब्रह्मस्वरूपत्वमेव प्रतिपादयन्ति। स एव अखण्डब्रह्मणः प्रतीकः, साधकस्य मोक्षमार्गस्य साक्षात्सहायकश्च।

एषा तुलनात्मकसमालोचना प्रदर्शयति यत् प्रणवोपनिषद् एतेषां सर्वेषां विचाराणां मध्ये सूक्ष्मतरं क्रियात्मकं च विमर्शं स्थापयति। यत्र अन्ये ग्रन्थाः प्रतीकरूपेण त्रैविध्यम् अर्धमात्रां नाडीं नादयोगं च वर्णयन्ति तत्र प्रणवोपनिषद् एतान् विषयान् साधक-केन्द्रितसाधनाचक्रमध्ये व्यवस्थितरूपेण स्थापयति।

**उपसंहृतिः**

प्रणवोपनिषदः समग्रविचारणेन ओङ्कारः न केवलं शब्दब्रह्मस्वरूपेण प्रतिष्ठितः, अपि तु स एवं सृष्टेः नादमूलकचेतनायाः रहस्यमयस्वरूपेण प्रकाशते। अकार–उकार-मकार–अर्धमात्रा–नाड्यः–नादयोगः–इत्यादिकं तस्य दार्शनिकविस्तारस्य क्रमबद्धप्रस्तुतिरेव ब्रह्मविद्यायाः वस्तुस्थितिं बोधयति। अत्र त्रैविध्यमात्रात्मकं सृष्टिपालनलयात्मकं प्रत्येकं तत्त्वम् अर्धमात्रा आत्मलयस्य दीपशिखा सूक्ष्मनाड्यः प्राणप्रवाहस्य मार्गाः नादयोगः मौनस्य ब्रह्मत्वे परिणमनं च – इत्येतत् प्रणवोपासनासु सर्वं रहस्यमयं विज्ञानं समावहति।

एष एव प्रणवः सृष्टिपालनलयानामविच्छिन्नक्रमं बोधयन् साधकं बाह्यान्तर्गततत्त्वस्य सन्धानाय प्रेरयन् अन्तर्गूढब्रह्मणि लीनं करोति। यत्र शब्दस्य लयः नादे, नादस्य मौने, मौनस्य ब्रह्मणि समाप्यते। एवं ओंकारसाक्षात्कारः केवलं वैदिकध्वनिः न अपि तु चेतनायाः परमसङ्गीतम् इति अनुभवगम्यं भवति। प्रणवोपनिषदि निर्दिष्टं – **पुरस्ता-द्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः। रहस्यं ब्रह्मविद्याया धृताग्निं सम्प्रचक्षते॥** – इत्यनेन ओंकारस्य धृताग्निसदृशी कर्मभस्मकशक्तिः सम्यक् निरूपिता। यथोक्तं –

**यस्मिन् स लीयते शब्दस्तत्परं ब्रह्म गीयते। सोऽमृतत्वाय कल्पते॥**[41]

– इत्यनेन नादे लीनः साधकः शब्दातीतं ब्रह्मविषये प्रतिष्ठां लभते, अमृतस्वरूपं च गच्छति। अत्रैव भाव्यते यत् प्रणवस्य एषा नादाधारितसाधना केवलम् आत्मोपलब्धेः साधनं न, अपि तु आधुनिकविज्ञानस्य ध्यानविज्ञानं, नादचिकित्सा, न्यूरो–संवेदनतन्त्रं च – इत्येतेषु अपि संवादमूलकमधिकं योगदानं कर्तुं शक्नुयात्।

प्रसङ्गेऽस्मिन् एष श्लोकः समस्तप्रतिपादितं साररूपेण संक्षिप्य दर्शयति –

**शब्दब्रह्मस्वरूपेण प्रणवः परमो गुरुः।**
**साधकस्यान्तरं नेतुं नादबिन्दोः प्रकाशकः॥**

*

## सन्दर्भाः


1. प्रणवोपनिषद्, 2
2. तदेव, 13
3. तदेव, 1
4. तदेव, 2
5. माण्डूक्योपनिषद्, 1.1
6. छान्दोग्योपनिषद्, 1.1.1
7. कठोपनिषद्, 1.2.17
8. प्रणवोपनिषद्, 3
9. तदेव, 4
10. तदेव, 5
11. तदेव, 9
12. तदेव, 11
13. मुण्डकोपनिषद्, 2.2.4
14. तदेव, 1.1.9
15. प्रणवोपनिषद्, 1
16. कठोपनिषद्, 2.3.8
17. प्रणवोपनिषद्, 2
18. माण्डूक्योपनिषद्, 1.1
19. प्रणवोपनिषद्, 3
20. तदेव, 4
21. तदेव, 5
22. तदेव, 6
23. तदेव, 7–8
24. तदेव, 9
25. तदेव, 11
26. तदेव, 12
27. तदेव, 13
28. गीता, 8.13
29. तदेव, 8.3
30. तदेव, 17.24
31. माण्डूक्योपनिषद्, 1.1
32. कठोपनिषद्, 1.2.17
33. श्वेताश्वतरोपनिषद्, 1.14
34. छान्दोग्योपनिषद्, 1.1.1
35. मुण्डकोपनिषद्, 2.2.4
36. स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति। मुण्डकोपनिषद्, 3.2.9
37. योगसूत्रम्, 1.27–28
38. मनुस्मृतिः, 2.83
39. ब्रह्मसूत्र– शाङ्करभाष्यम्, 1.3.5
40. श्वेताश्वतरोपनिषद्, 3.20
41. शिवषडक्षरस्तोत्रम्, 1
42. प्रणवोपनिषद्, 13


*

**युद्धे कृतबुद्धी स्थिरामर्षौ रामरावणौ अदर्शयताम्–**

जेतव्यमिति काकुत्स्थः (रामः), मर्तव्यमिति रावणः युद्धे स्ववीर्यसर्वस्वम् (अदर्शयताम्)।

**रामरावणयोर्युद्धं कीदृशम्?**

* सुक्रूरम्, सुमहत्, वैरथम्, सर्वलोकभयावहम्

**तस्मिन् युद्धे शस्त्रवर्षं कीदृशम्?**

* सहस्रशः, तुमुलम्, त्रासजननम्, भीमम्, भीमप्रतिस्वनम्, रोमहर्षणम्।

**रामस्य बाणः अभवत्–**

* न अनिमित्तः, न अनिर्भेत्ता, न निष्फलः।

**युद्धे रामरावणौ–**

* सव्यदक्षिणम् अविच्छिन्नं बाणान् अस्यन्तौ
  घोरैः शरैः निरुच्छ्वासम् इव अम्बरं चक्रतुः।
* अन्योन्यं कृतानुकृतकारिणौ, सुसंक्रुद्धौ, परस्परम् अभिक्रुद्धौ, परस्परम् अभिद्रुतौ, परस्परवधे युक्तौ, घोररूपौ।
* सासारौ जलदौ इव संयुगमहीं चेरतुः।

**रामरावणयोः तुमुलेन युद्धेन–**

* सप्त सागराः क्षुभिताः, क्षुब्धानां सागराणां च पातालतलवासिनः दानवाः, सर्वे पन्नगाश्च व्यथिताः जाताः।

  सशैलवनकानना कृत्स्ना मेदिनी चकम्पे, भास्करः निष्प्रभः आसीत्, मारुतः चापि न ववौ, सगन्धर्वाः देवाः सिद्धाः महर्षयश्च सकिन्नरमहोरगाः चिन्ताम् आपेदिरे- गोब्राह्मणेभ्यः स्वस्ति अस्तु, शाश्वताः लोकाः तिष्ठन्तु। संख्ये राक्षसेश्वरं रावणं राघवः जयताम् –

  एवं सर्षिगणाः देवाः तदा जपन्तः अपश्यन्–

**रामरवणयोर्युद्धं  रामरावणयोरिव॥**
**नैव रात्रिं न दिवसं न मुहूर्त्तं न च क्षणम्।**
**रामरावणयोर्युद्धं  विराममुपगच्छति॥**

युद्धकाण्डम्, 107 सर्गः

# सांख्यसप्तत्याः जयमङ्गलाटीकायाः रचयितुः शङ्करस्य प्रसङ्गे पण्डितानां मतानैक्यम् – एकं समीक्षणम्

**डॉ. सूरज रायः**

वर्तमानोपलब्धसांख्यदर्शनस्य प्रामाणिको ग्रन्थो वर्तते श्रीमदीश्वरकृष्णविरचिता सांख्यकारिका। सप्ततिसंख्यककारिकाविशिष्टोऽयं ग्रन्थः सांख्यदर्शनस्य अत्यन्तमहत्त्वपूर्णग्रन्थरूपेण विद्वन्मण्डले प्रसिद्धोऽस्ति। अस्य ग्रन्थस्योपरि माठराचार्यकृता माठरवृत्तिः प्राचीनतमा। ततः क्रमाद् गौडपादकृतं गौडपादभाष्यम्, युक्तिदीपिकाटीका, जयमङ्गलाटीका, तत्त्वकौमुदीटीका अपि च तस्य बहवः उपटीकाग्रन्थाः विरचिताः। तेषु जयमङ्गलाटीकायाः रचयितुः प्रसङ्गे पण्डितेषु मतानैक्यं परिलक्ष्यते। जयमङ्गलाटीकायाः प्रथमे संस्करणे पण्डितहरदत्तशर्मणा ग्रन्थस्यास्य रचयितुः प्रसङ्गे शङ्कराचार्यविरचिता जयमङ्गला इत्युक्तम्। पुनः तस्यैव ग्रन्थस्य भूमिकायां पण्डितगोपीनाथकविराजेन चन्द्रधरशर्मागुलेरीमहोदयस्य मतं स्वीकृत्य शङ्करार्य इति प्रोक्तम्।

**प्रस्तावना–** श्रीमदीश्वरकृष्णविरचितस्य सांख्यकारिकायाः अत्यन्तोपादेयटीकासु शङ्करस्य जयमङ्गलाटीका अन्यतमा वर्तते। टीकेयं द्विसप्ततिसंख्यककारिकाणामुपर्युपलभ्यते। महामहोपाध्यायस्य पण्डितगोपिनाथकविराजस्य वैदुष्यपूर्णभूमिकया सह महामहोपाध्यायेन पण्डितहरदत्तशर्मणा अस्याः टीकायाः सम्पादना कृताऽस्ति। ग्रन्थोऽयं ओरियन्टलसीरीज, कलिकातातः श्रीनरेन्द्रनाथमहोदयेन प्रकाशितः। ख्रीष्टाब्दषड्विंशत्यधिकेकोनविंशतिशततमवर्षस्य (1926) प्रथमसंस्करणं वर्तेतेऽस्य ग्रन्थस्य। श्रीयुतहरदत्तशर्ममहोदयस्य प्रस्तावनागतलेखानुसारं ग्रन्थोऽयं द्वयोः हस्तलिखितप्रतिलिप्योः आधारानुसारं सम्पादितो विद्यते। यद्यपि पाठानां संशोधनमपूर्णमेव स्यात्, तथापि दुष्प्राप्यस्यास्य ग्रन्थस्य सम्पादनां कृत्वा श्रीहरदत्तशर्ममहोदयेन अक्षयपुण्यं लब्धमेव।

टीकायाः **जयमङ्गला** इति नामकरणविषये कोऽपि सन्देहो नास्ति। यतो हि टीकायाः मङ्गलाचरणश्लोके एव नाम्नोऽस्योपलब्धिर्भवति। तद्यथा –

**अधिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य मुनिम्।**
**क्रियते सप्ततिकायाष्टीका जयमङ्गला नाम॥**[1]

टीकाया अस्याः नामविषयेऽसन्देहत्वादपि, टीकाकारस्य नामप्रसङ्गे विविधेषु पण्डितेषु मतानैक्यं परिलक्ष्यते। टीकाया अन्ते पुष्पिकायामवलोक्यते– 'श्रीमत्परमहंस–परिब्राजकाचार्य श्रीगोविन्दभगवत्पूज्यपादशिष्येण श्रीशङ्करभगवता सांख्यसप्ततिटीका'[2] इति। आलोच्यायां पुष्पिकायां श्रीशङ्करेण सह प्रयुक्तः भगवत् इति पदन्तु तस्य नामांशो न वर्तते, अपि तु शङ्करस्य प्रतिष्ठानुसारं भगवदिति पदस्य प्रयोगोऽभवदिति वक्तुं शक्यते। अतो हि टीकाकारस्य नाम शङ्करमात्रं वक्तुं शक्यते। महामहोपाध्यायेन हरदत्तशर्मणा ग्रन्थस्यास्यावरणपृष्ठे **श्रीशङ्कराचार्यविरचिता जयमङ्गला नाम सांख्यसप्ततिटीका** इत्युल्लेखनं क्रियते। अत्रापि शङ्करेण सह आचार्य इति पदसंयोगाय सन्देह आपतति यत् किं शङ्करोऽयं कदाचित् प्रस्थानत्रय्याः भाष्यकार आदिशङ्कराचार्यो वा? इति। सन्देहोऽयं पुनः दृढः भवति, यदा व्याख्याकारस्यास्य गुरोः नाम गोविन्द इत्यवलोक्यते। प्रस्थानत्रय्याः भाष्यकारस्य शङ्करस्य तथा जयमङ्गलायाः व्याख्याकारस्य शङ्करस्य गुरोः नाम गोविन्द इत्युल्लेख्यते। उभयत्रैव गोविन्द इत्यनेन सह परमहंसपरिव्राजकाचार्य इति युज्यते। वस्तुतस्तु इयमेका आकस्मिकघटना वर्तते यत्, उभयोः शङ्करयोः गुरोः नाम परमहंसपरिव्राजकाचार्य-श्रीगोविन्दभगवत्पूज्यपाद इति। गुरोः नामसाम्यस्य विद्यमानत्वादपि उभयोः शङ्करयोः लेखनशैलीभेदादेकत्वप्रतिष्ठा भवितुं नार्हति। अपरैतिहासिकतथ्यानामाधारानुसारमपि उभयोः शङ्करयोरेकव्यक्तित्वस्य सम्भावना नैव भवति।

सांख्यसप्तत्या अन्तिमपुष्पिकाया आधारानुसारं पण्डितहरदत्तशर्मणा सम्पादितस्य ग्रन्थस्य जयमङ्गलायाः भूमिकायां महामहोपाध्यायेन गोपिनाथकविराजेन परमहंसपरिवाजकाचार्य इति पदेन सह शङ्करस्य सम्बन्धोऽस्तीत्युक्तम्। तद्यथा- 'The present Commentary is attributed to **शंकराचार्य** in the colophon where he is, as elsewhere in his work, described as परमहंसपरिव्राजकाचार्य and disciple of **गोविन्द-भगवत्पाद**'[3] इति। कविराजस्य मतमिदं भ्रमपूर्णं स्यादिति आचार्येण उदयवीरशास्त्रिणोक्तम्। यतो हि परमहंसपरिव्राजकाचार्य इति पदन्तु केवलं गोविन्द इति पदेन सह सम्बद्ध्यते। '**श्रीमत्परमहंसपरिब्राजकाचार्य-श्रीगोविन्दभगवत्पूज्यपादशिष्येण**' इति समस्तपदन्तु पृथक् स्यात्। पूर्वपदस्य '**परमहंसपरिब्राजकाचार्य**' इत्यंशस्य शङ्करेण सह सम्बन्धकथनन्तु सर्वथा असङ्गतमेव। किन्तु तथापि महामहोपाध्यायेन हरदत्तशर्मणा आलोच्य–शङ्करेति नाम्ना सह आचार्य इति पदं युज्यते तस्य ग्रन्थस्यावरणपृष्ठे '**शङ्कराचार्यविरचिता**

**जयमङ्गला**' इति। शर्ममहोदयस्य एतादृशलेखेन पाठकानां भ्रमः भवितुमर्हतीति उदयवीर-शास्त्रिणोल्लिखितम्। यथायोग्यम् अनेनैवाधारेण कविराजेन गोपिनाथेन पुष्पिकेयं प्रक्षिप्तमित्युक्तम्– 'But I am inclined to suspect that the colophon is an interpolation and that the work is not by शङ्कराचार्य'[4] इति। किन्तु कविराजस्य कथनमिदमसङ्गतं मन्यते उदयवीरशास्त्रिणा। यतो ह्यालोच्यपुष्पिकां तावदेव प्रक्षिप्तां वक्तुं शक्यते, यावत्तु प्रबलप्रमाणबलात् सिद्धिर्भवति यत् प्रस्थानत्रय्याः भाष्यकारः शङ्कर एव जयमङ्गलायाः रचयितेति। किन्तु तस्य सिद्धिर्न भवति। नामसाम्यमात्रे व्यक्तिष्वभिन्नता न प्रमाणीकर्तुं शक्यते। अतो हि प्रस्थानत्रय्याः भाष्यकारः शङ्करस्तु जयमङ्गलाटीकाकारात् शङ्करात्सर्वदा भिन्नैव वर्तते। पुष्पिकायाः स्वरूपन्तु उभयोः शङ्करयोर्मध्येऽभिन्नतायाः निश्चायको न वर्तते। तस्माद्धि तां पुष्पिकां प्रक्षिप्तामपि वक्तुं नैव शक्यते।

**नीतिसार–कामसूत्रयोः जयमङ्गलाटीकायाः रचयिता 'शङ्करः' इति प्रसङ्गे चन्द्रधरशर्मागुलेरीमहोदयस्य मतम्–** श्रीचन्द्रधरशर्मागुलेरीमहोदयानुसारं कामन्दकीयनीतिसारस्य जयमङ्गलाव्याख्यायाः तथा च कामसूत्रस्य जयमङ्गलाव्याख्यायाः रचनाकारस्त्वेक एव न भिन्नव्यक्तिरिति। चन्द्रधरमहोदयस्य कथनं वर्तते यत्, कामन्दकीय-नीतिसारस्य जयमङ्गलायाः च रचयित्रा शङ्करेणैव वात्स्यायनकामसूत्रस्य व्याख्या जयमङ्गला लिखिता। स्वकथनं प्रमाणयितुं गुलेरीमहोदयेन निम्नलिखितहेतव उपस्थाप्यन्ते। तद्यथा–

**प्रथमन्तु–** उभयोः टीकयोः प्रारम्भिकनमस्कारश्लोकयोः समानता। कामन्दकीय-नीतिसारस्य टीकायाः नमस्कारश्लोकस्तु –

**कामन्दकीये किल नीतिशास्त्रे प्रायेण नास्मिन् सुगमाः पदार्थाः।**
**तस्माद् विधास्ये जयमङ्गलाख्यां तत्पञ्जिका सर्वविदं प्रणम्य।।**[5]

अन्यस्मिन् वात्स्यायनकामसूत्रस्य टीकायाः नमस्कारश्लोकस्तु–

**वात्स्यायनीयं किल कामसूत्रं प्रस्तावितं कैश्चिदिहान्यथैव।**
**तस्माद् विधास्ये जयमङ्गलाख्यां टीकामहं सर्वविदं प्रणम्य।।**[6]

**द्वितीयन्तु –** वात्स्यायनीयकामसूत्रस्य– 'यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश'[7] इत्यस्योपरि जयमङ्गलाटीका वर्तते– 'दाण्डक्य इति संज्ञा। भोज इति भोजवंशजः, अभिमन्यमानोऽभिगच्छन्। स हि मृगयां गतो भार्गवकन्यामाश्रमपदे दृष्ट्वा जातरागो रथमारोप्य जहार। ततो भार्गवः समित्कुशानादाया-गत्य तामपश्यन्नभिध्याय च यथावृत्तं राजानमभिशशाप। ततोऽसौ सबन्धुराष्ट्रः पांसुवर्षेणावष्टब्धो ननाश। तत्स्थानमद्यापि दण्डकारण्यमिति गीयते'' इति। अपरस्मिन्

कामन्दकीयनीतिसारस्य प्रथमसर्गस्य –

**दाण्डक्यो नृपतिः कामात् क्रोधाच्च जनमेजयः।**
**लोभादैलस्तु राजर्षिर्वातापिर्हर्षतोसुरः॥**[9]

इति श्लोकस्यास्य प्रथमचरणस्य जयमङ्गलानामकव्याख्यायां व्याख्याकारेण लिखितम्–

'तत्र दण्डको नाम भोजवंशमुख्यः। तन्निमित्तप्रसिद्धनामा दाण्डक्यो नाम। स च मृगयां गतस्तृषितो भृग्वाश्रमं प्रविश्य तत्कन्यां रूपयौवनवतीमेकाकिनीं दृष्ट्वा जातरागस्तां स्यन्दने आरोप्य स्वपुरमाजगाम। भृगुरपि समित्कुशादीनादाय वनादागत्य तामपश्यन्नभिध्याय च यथावृत्तं ज्ञात्वा जातक्रोधस्तं शशाप सप्तभिरहोभिः पांशुवृष्ट्या सबन्धुराष्ट्रो विपद्यतामिति। स तयाक्रान्तस्तथैव ननाश'[10] इत्यादीनां लेखानां समानातायाः परिणामस्वरूपन्तु उभयोः ग्रन्थयोः टीकयोः रचतिया तु शङ्कराचार्य एव, तेनैव उभयस्थले जयमङ्गला इति संज्ञा प्रदीयते। नामसमतेयमपि रचयितुरभिन्नतायाः कारणं भवति। यथा हि कालिदासस्य ग्रन्थेषु मल्लिनाथस्य '**सञ्जिवनी**' इति टीका।

**'शङ्कर' प्रसङ्गे गोपिनाथकविराजस्य मतम्**– महामहोपाध्यायेन पण्डितगोपिनाथ-कविराजेन चन्द्रधरशर्मागुलेरीमहोदयस्य लेखस्याधारेण कामन्दकीयनीतिसार–वात्स्यायन-कामसूत्रयोः जयमङ्गलाव्याख्यायाश्च रचयिता शङ्करार्य इति स्वीकृत्य सांख्याकारिकायाः जयमङ्गलाटीकायाः रचयिताऽपि शङ्करार्य एवेति मन्यते। गोपिनाथकविराजस्य विचारानुसारन्तु त्रयाणामेव ग्रन्थानां जयमङ्गला इति संज्ञाभिभूतटीकानां रचयिता त्वेक एव, सः शङ्करार्य इति। कविराजस्य मतानुसारं तिसुषु टीकासु नमस्कारश्लोकेषु भगवनान् बुद्ध एव नमस्क्रियते, तथा त्रयाणामेव रचनाक्रमस्तु समान एव। तच्च – 'From a Comparison of the three commentaries it would follow that all the three bore one and the same name, contained obeisance to one and the same deity, that is, the Buddha, are written in the same style, and that while two are known to have been written by शङ्करार्य, the remaining one is ascribed to शङ्कराचार्य, The presumption however is that the third commentary also was by शङ्करार्य. Attribution to शङ्कराचार्य, has been only due to a confusion of the two names, on which the colophon is based. On any other hypothesis obeisance to the Buddha becomes quite inexplicable'[11] इति। अनेन्नेवाधारेण कविराजगोपिनाथेन शङ्करार्यन्तु बौद्ध इति कथितम्। तस्य युक्तिस्तु यत्– '**लोकोत्तरवादी**' तथा '**मुनि**' इति शब्दद्वयं केवलं भगवते बुद्धाय प्रयुज्यते। अतस्तु भगवन्तं बुद्धं नमस्कारार्थं शङ्करार्यस्तु बौद्ध इति नासम्भवोऽयम्।

यथोक्तं कविराजेन– 'The benedictory verse, where there is a salutation of लोकोत्तरवादी, मुनि, makes it plain that the author of जयमङ्गला was a Buddhist. The term लोकोत्तरवाद is a Buddhist expression and the referred to in the verse into other than the Buddha himself'[12] इति।

**उभयोः मतयोः असामञ्जस्यम्–** आचार्येण उदयवीरशीस्त्रिणा तस्य 'सांख्यदर्शन का इतिहास' इति ग्रन्थे क्रमश उभयोः मतस्थापनादनन्तरं तेषां मतानां खण्डनमपि कृतम्।

**चन्द्रधरशर्ममहोदयस्य मतस्यासामञ्जस्यम्–** शास्त्रिमहोदयेन आदौ चन्द्रधर-शर्मागुलेरीमहोदयस्य मतं खण्डनं कृत्वा उक्तम्– नीतिसार–कामसूत्रयोः मङ्गलाचरणश्लोकयोः उभयोः व्याख्ययोः या समता गुलेरीमहोदयेन प्रदर्शिता, तद्रूपा समता तु उत्तरवर्तिलेखकेन पूर्ववर्तिलेखकस्यानुकरणेनापि शक्या भवितुमर्हति। मङ्गलाचरणयोः तथा च व्याख्यानां समता तु लेखकानामेकत्वस्य असन्दिग्धहेतुः भवितुं नार्हति। यतो ह्येतादृशसाम्यं तु भिन्न–भिन्नकर्तृकग्रन्थेषु प्रायशो दरीदृश्यते। एतस्य कारणन्तु परवर्तिलेखकैः पूर्ववर्तिलेखकानामनुकरणमिति वक्तुं शक्यते। उदाहरणतया उदयवीरशास्त्रिणा वात्स्यायनकामसूत्रस्य 'यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश'[13] इति सूत्रस्यास्यावतारणा क्रियते। सूत्रमिदमक्षरशः कौटीलीयार्थ-शास्त्रेऽपि वर्णितम्। किं तर्हि वक्तुं शक्यते यदुभयोः रचयिता त्वेक एवेति? प्रमाणान्तरेण यद्येतस्य एकत्वस्य पुष्टिर्भवति, तर्हि न काऽपि समस्या तत्र भवितुमर्हति। किन्तु प्रमाणान्तराभावे केवलं सूत्राणां सन्दर्भानां वा साम्यं प्रदश्र्य ग्रन्थानां लेखकस्य एकत्वकथनन्तु निर्बाधप्रमाणं भवितुं नार्हति। एतदतिरिक्तं दाण्डक्यभोजस्य घटना एकैतिहासिकघटना अस्तीत्यतः तस्य वर्णनायां समानरूपता भवितुमर्हत्येव यत् घटनाया एकरूपत्वात् तस्याः वर्णनायाः शब्देषु कदाचित् साम्यं स्वाभाविकरूपेण सम्भाव्यते। कौटीलीयार्थशास्त्रात्पुनरेकमुदाहरणं प्रस्तूयते 'लोभादैलश्चतुर्वर्ण्यमत्याहारयमाणः'[14] इति। अत्र हैलय लोभस्य स्वरूपन्तु मूलसूत्रे निर्दिश्यते। त.गणपतिशास्त्रिणा सूत्रस्यास्य व्याख्याप्रसङ्गे कथयामास 'लोभादैलः पुरुरवा नाम राजा चातुर्वर्ण्यमतिमात्रधनापहरणेन प्रियंश्चातुर्वर्ण्यकोपान्नष्टः'[15] इति। मूलसूत्रस्यायमर्थः प्रकाशनानन्तरं टीकाकारेणास्मिन् विषये पुनरेकस्यैतिह्यस्योल्लेखः क्रियते। यद्यपि अर्थशास्त्रस्य मूलसूत्रे ऐतिह्यस्यास्य कोऽपि सङ्केतो नास्ति। तत्रैतिह्यस्योल्लेखस्तु– 'लोभादैलो नैमिषीयब्राह्मणयज्ञशालां प्रविश्य ततोऽपरिमितं धनं हर्तुमुद्युक्तो ब्राह्मणशापान्नष्ट इत्यैतिह्यं कैश्चिद्वर्ण्यते'[16] इत्येवंविधेन रूपेण क्रियते।

पुनः कामन्दकीयनीतिसारे ऐलस्य लोभस्योल्लेखं पश्यामः– 'लोभादैलो राजर्षिः...'[17] इति। अत्रस्थलोभस्य स्वरूपन्तु कौटीलीयार्थशास्त्रवन्नास्ति। नीतिसारस्य व्याख्यायाः जयमङ्गलायाः व्याख्याकारेण शङ्करार्येण पद्यांशस्यास्य व्याख्यां कृत्वा उपर्युक्तैतिह्यस्य निर्देशो दीयते 'लोभादैलस्तु इति। ऐलः पुरुरवाः। स किल नैमिषारण्यवासिभिर्यज्ञ-संरक्षणार्थमुपनिमन्त्रितः सर्वानेव सौवर्णान् भाजनविशेषान् दृष्ट्वा लोभादाहर्तुमारब्धः। ततस्तैरस्य यज्ञक्रियाविरोधोद्विग्नैर्वज्रगर्भैः कुशैरभिहतो ननाश'[18] इत्येवम्भूतम्। टीकाकार-योर्भिन्नत्वादपि उभयोः स्थलयोरैतिह्ययोः समानवर्णना प्रेक्ष्यते। लेखकानां भिन्नत्ववशादपि एतादृशघटनानां रचनाक्रमाणां समानता तु एकेनापरस्यानुकरणादेव सम्भाव्यते। अनुकरणाभावेऽपि एकस्याः घटनायाः विभिन्नकर्तृकवर्णनासु भाषासमतायाः सम्भावना भवत्येव। अतस्तु चन्द्रधरशर्मागुलेरीमहोदयस्य कथनस्य सार्थकता भवितुं नार्हति। तदतिरिक्तं वात्स्यायनकामसूत्रस्य व्याख्यायाः जयमङ्गलायाः कस्मिंश्चिदपि प्राचीनहस्तलिखितग्रन्थेऽपि ग्रन्थकारस्य नाम '**शङ्करार्य**' इति नोपलभ्यते। चौखम्बासंस्कृतसीरीजवाराणसीतः जयमङ्गलायाः प्रकाशनद्वयमभवत्। तयोरेकस्मिन् ग्रन्थे ग्रन्थकर्तुः नाम '**जयमङ्गलः**', अपरस्मिन् ग्रन्थे तु '**यशोधर**' इति मुद्रितः। प्रकाशकेनाथवा सम्पादकेन भेदस्यास्य किमपि कारणं नोद्दिष्टम्। जयमङ्गलायाः प्रथमे संस्करणे जयमङ्गलस्य तथा द्वितीये संस्करणे यशोधरस्य नाम स्यात्। पण्डितप्रवरेण दुर्गाप्रसादेन सम्पादिते बम्बईसंस्करणेऽपि यशोधरस्यैव नाम वर्तते। इत्यस्मादनुमीयते यत् चौखम्बासंस्कृतसीरीजवाराणसीतः प्रकाशितं जयमङ्गलायाः प्रथमसंस्करणन्तु येन हस्तलिखिताधारेण मुद्रितम्, तत्र ग्रन्थकर्तुः नाम जयमङ्गल इत्युल्लिखितमासीदथवा तस्मिन् हस्तलेखे ग्रन्थकर्तुः नाम्नोऽविद्यमानत्वात् सम्पादकेनाथवा प्रकाशकेन जयमङ्गला इति नाम्ना एव रचयितुः जयमङ्गल इति नाम कल्पितमभवदिति। अनन्तरं हि बम्बईसंस्करणाधारेण चौखम्बायाः द्वितीयसंस्करणे जयमङ्गलायाः रचयितुः नाम जयमङ्गलस्य स्थाने यशोधरः इति मुद्रितम्। पञ्चनदसार्वजनिक-पुस्तकालये (Punjab Pulic Library) लाहौरनगरे कामसूत्रस्य व्याख्यायाः जयमङ्गलायाः यो हस्तलिखितो ग्रन्थः सुरक्षितोऽस्ति, तत्रापि यशोधरस्य नामास्ति। जयमङ्गलायाः रचयितुः प्रसङ्गे शङ्करार्यस्य नाम तु कस्मिंश्चिदपि प्राचीनहस्तलिखितग्रन्थे नोपलभ्यते।

**गोपिनाथकविराजस्य मतस्यासामञ्जस्यम्–** महामहोपाध्यायेन गोपीनाथकविराजेन चन्द्रधरशर्मागुलेरीमहोदयस्य मतं स्वीकृत्य सांख्यसप्तत्याः टीकायाः जयमङ्गलायाः अपि रचयितृरूपेण शङ्करार्यः स्वीकृत इति प्रागेव तदुल्लिखितम्। सम्प्रति कविराजमहोदयस्य मतस्य कथं खण्डनं क्रियते तदुत्तरोत्तरेण वर्ण्यते। तद्यथा–

**प्रथमतः—** सांख्यसप्तत्याः व्याख्यायाः जयमङ्गलायाः अन्तिमायां पुष्पिकायां ग्रन्थकारस्य नाम केवलं **शङ्करः** इति निर्दिश्यते, न तु शङ्करार्येति।

**द्वितीयतः—** कामन्दकीयनीतिसारस्य व्याख्यायाः जयमङ्गलायाः सर्वासु पुष्पिकासु ग्रन्थकारस्य नाम **शङ्करार्यः** इत्युल्लिखितम्। कुत्रापि **शङ्करः** इति उल्लेखनं नस्ति।

**तृतीयतः—** वात्स्यायनकामसूत्रस्य जयमङ्गलाव्याख्यायां ग्रन्थकारस्य नाम न तु **शङ्करः** नापि **शङ्करार्यः** इति प्राप्यते। अपि तु तत्र ग्रन्थकर्तुः नाम **यशोधरः** इति परिलक्ष्यते।

**चतुर्थतः—** सांख्यसप्तत्याः जयमङ्गलाया अन्तिमायां पुष्पिकायां ग्रन्थकर्तुः शङ्करस्य गुरोः नाम **परमहंसपरिव्राजकाचार्यः श्रीगोविन्दभगवत्पूज्यपाद** इत्युल्लेख्यते। किन्तु कामन्दकीयनीतिसारस्य जयमङ्गलायाः कस्यांश्चिदपि पुष्पिकायां ग्रन्थकर्तुः शङ्करार्यस्य गुरोः नामोल्लिखितं नास्ति।

**पञ्चमतः—** कामन्दकीयनीतिसारस्य व्यख्यायाः तथा सांख्यसप्तत्याः व्याख्यायाः मङ्गलाचरणश्लोकौ यदि पश्यामः, तर्हि उभयोरसमानतैव दृष्टिगोचरं सर्वदायाति। न तयोरार्थिकसमानता विद्यते, नापि रचनाक्रमस्यैव साम्यं स्यात्। उभयोः मङ्गलाचरणश्लोकयोः तुलना क्रियते अधोल्लिखितेन रूपेण। तद्यथा–

**कामन्दकीये किल नीतिशास्त्रे प्रायेण नास्मिन् सुगमाः पदार्थाः।**
**तस्माद्विधास्ये जयमङ्गलाख्यां तत्पञ्जिकां सर्वविदां प्रणम्य॥**[19]

अपि च,

**अधिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य मुनिम्।**
**क्रियते सप्ततिकायाष्टीका जयमङ्गला नाम॥**[20]

उभयोः मङ्गलाचरणयोः पूर्वार्धयोर्न शाब्दिकी न चार्थिकी समानता प्रेक्ष्यते। उत्तरार्धयोः केवलं **जयमङ्गला** इति पदस्यास्य समानता परिलक्ष्यते, यत्तु अवश्यवर्णितविषयस्य ग्रन्थस्य नाम वर्तते। प्रथमे मङ्गलाचरणे **इन्द्रवज्रा** इति वृत्तं स्यात्, अपरस्मिन् **आर्या** इति वृत्तमभवत्। प्रथमे मङ्गलाचरणे सर्ववित् इति शब्देन परमेश्वरः स्मर्यते। अपरस्मिन् अधिगततत्त्वालोकः, लोकोत्तरवादी, मुनिः इत्यादिशब्दैः व्यक्तिविशेषः स्मर्यते। सर्वविदिति पदन्तु कथमीश्वरस्य प्रतीकं वर्तते तस्य निदर्शनन्तु बहुत्र विद्यते। यथा –

**यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः।**
**तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते॥**[21]

'स विश्वकृद्विश्वविदात्मयोनिज्ञः कालकारो गुणी सर्वविद् यः,'[22] 'स हि सर्ववित् सर्वकर्ता'[23] इत्यादयः। वक्तुं शक्यते यत्, ग्रन्थयोः नामसमतामात्रेण ग्रन्थकारयोः ऐक्यं साम्यं वा न प्रमाणीक्रियेत।

**षष्ठतः–** कविराजगोपीनाथेन जयमङ्गलायाः रचयितुः बौद्धत्वप्रसङ्गे **लोकोत्तरवादी, मुनिः** इति पदयोरुल्लेखनं क्रियते। लोकोत्तरवादी इति पदस्यास्य विचारप्रसङ्गे महाभारतस्य शान्तिपर्वणः श्लोकत्रयं द्रष्टव्यम् –

**मोक्षे हि त्रिविधा निष्ठा दृष्टान्यैर्मोक्षवित्तमैः।**
**ज्ञानं लोकोत्तरं यच्च सर्वत्यागश्च कर्मणाम्॥**
**ज्ञाननिष्ठां वदन्त्येके मोक्षशास्त्रविदो जनाः।**
**कर्मनिष्ठां तथैवान्ये यतयः सूक्ष्मदर्शिनः॥**
**प्रहायोभयमप्येव ज्ञानं कर्म च केवलम्।**
**तृतीयेयं समाख्याता निष्ठा तेन महात्मना॥**[24]

सुलभा–जनकसंवादे उक्तिरियं जनकस्य स्यात्। स्वगुरोः पञ्चशिखात् प्राप्तज्ञानस्य विषये जनकेन सम्भाषणमिदं क्रियते। पञ्चशिखस्य परमरगुरुः महर्षिकपिलो वर्तते। यस्तु सांख्यज्ञानस्य प्रवर्तको वर्तते। अतः लोकोत्तरस्य ज्ञानस्य सम्बन्धस्तु महर्षेः कपिलादेव प्रकटीभवति। यया निष्ठया सर्वकर्मणां त्यागः लोकोत्तरज्ञानस्य च सम्पादनं भवति, सा निष्ठा तेन महात्मना महर्षिणा कपिलेन प्रतिपादिता। अतएव तस्य लोकोत्तरज्ञानस्य वक्तारं महर्षिकपिलम् अवश्यमेव **लोकोत्तरवादी** इति वक्तुं शक्यते। एतस्मादेकः साधारणो विपरिणामो निःसरति यत्– **लोकोत्तरवादी** इति पदन्तु प्रत्येकं परलोकवादि-साक्षात्कृतधर्मणः अथवा आचार्यस्य कृते प्रयुज्यते। न हि केवलं बौद्धत्वप्रसङ्गे पदमिदं प्रयुज्यते इति। उदयवीरशास्त्रिणा तत्त्वसमासस्य क्रमदीपिकाव्याख्यायाः नमस्कारश्लोकमुद्धृत्य प्रदर्श्यते यत्, पञ्चविंशतितत्त्वानां रहस्यं तु सर्वाग्रे महर्षिणा कपिलेन प्रकाशितम्। अतः **अधिगततत्त्वालोकम्** इति विशेषणमिदं महर्षेः कपिलस्य कृते एव प्रयुज्यते इति वक्तुं शक्यते। श्लोकन्तु –

**पञ्चविंशतितत्त्वेषु जन्मना ज्ञानमाप्तवान्।**
**आदिसृष्टौ नमस्तस्मै कपिलाय महर्षये॥**

**उपसंहारः–** एवमेव हि जयमङ्गलायाः नमस्कारश्लोकस्य प्रथमचरणान्निर्धारणं क्रियते यत्– तत्र महर्षिकपिलस्यैव नमस्कारः कृतः नान्यस्येति। तस्मिन् श्लोके

बुद्धानुसन्धानस्य प्रयत्नः व्यर्थ एव। तस्माच्च जयमङ्गलाकारं शङ्करं बौद्धमपि वक्तुं नैव शक्यते। सर्वोपरि सांख्यसप्तत्याः जयमङ्गलाटीकायाः रचयिता न तु प्रसिद्धाद्वैतवेदान्तस्य प्रतिष्ठाता शङ्कराचार्यः नापि कामन्दकीयनीतिसार–वात्स्यायनकामसूत्रयोः जयमङ्गलाव्याख्ययोः रचयिता शङ्करार्य अपि तु शङ्करो नामधेयो भिन्नो जन इति नात्र कोऽपि संशयः। तत्र आचार्य इति शब्दस्य योगः सम्मानार्हः।

*

## सन्दर्भाः


1. जयमङ्गला, सांख्यकारिका, 1
2. जयमङ्गला, सांख्यकारिका, 72
3. जयमङ्गलायाः भूमिका, हरदत्तशर्मा, पत्रसंख्या–8
4. तदेव
5. जयमङ्गला, कामन्दकीयनीतिसारः, 1
6. जयमङ्गला, कामसूत्रम्, 1.1
7. कामसूत्रम्, 2.35
8. तदेव, जयमङ्गला
9. कामन्दकीयनीतिसारः, 1.58
10. तदेव, जयमङ्गला
11. जयमङ्गलायाः भूमिका, हरदत्तशर्मा, पत्रसंख्या, 9
12. जयमङ्गलायाः भूमिका, हरदत्तशर्मा, पत्रसंख्या, 8
13. कामसूत्रम्, 2.35
14. कौटिलीयम् अर्थशास्त्रम्, 1.6.2
15. द्रष्टव्यम्, सांख्यदर्शन का इतिहास, उदयवीरशास्त्री, पत्रसंख्या, 447
16. तदेव
17. कामन्दकीयनीतिसारः, 1.58
18. जयमङ्गला, कामन्दकीयनीतिसारः, 1.58
19. जयमङ्गला, कामन्दकीयनीतिसारः, 1
20. जयमङ्गला, सांख्यकारिका, 1
21. मुण्डकोपनिषत्, 1.1.9
22. श्वेताश्वतरोपनिषत्, 6.16
23. सांख्यसूत्रम्, 3.56
24. महाभारतम्, 12.325.38–40


*

**राघवस्य 'ब्रह्मास्त्रम्' –** (ब्रह्मणा इन्द्राय, इन्द्रेण अगस्त्यद्वारा रामाय दत्तम्)।

**ब्रह्मास्त्रस्य** वाजेषु पवनः, फले पावकभास्करौ, शरीरम् आकाशमयम्।

**ब्रह्मास्त्रं** गौरवे मेरुमन्दरौ, वपुषा जाज्वल्यमानम्, सुपुङ्खम्, हेमभूषितम्, तेजसा सर्वभूतानां भास्करवर्चसं कृतम्,

दीप्तः सधूमः कालाग्निः इव, आशीविषोपमम्, नरनागाश्ववृन्दानां क्षिप्रकारि भेदनम्,

द्वाराणां परिघाणां गिरीणां च भेदनम्, नानारुधिरदिग्धाङ्गम्, मेदोदिग्धम्, सुदारुणम्,

वज्रसारम्, महानादम्, नानासमितिदारुणम्,

सर्ववित्रासनम्, भीमम्, पन्नगः इव श्वसत्,

कङ्कगृध्रवकानां गोमायुगणरक्षसां च युद्धे नित्यभक्षप्रदम्,

यमरूपम्, भयावहम्, वानरेन्द्राणां नन्दनम्,

रक्षसाम् अवसादनम्, गरुत्मतः विविधैः चारुचित्रवाजैः वाजितम्,

इक्ष्वाकुभयनाशनम्, द्विषतां कीर्तिहरणम्, आत्मनः प्रकर्षकरम्, महेषुः।

**रामेण निहतः रावणः, ततः परम्–**

हतशेषाः निशाचराः हतनाथाः भयत्रस्ताः सर्वतः संप्रदुद्रुवुः,

वानरैः अर्दिताः भ्रष्टाः हताश्रयत्वात्

करुणैः बाष्पप्रस्रवणैः मुखैः लङ्काम् अभ्यपतन्।

संहृष्टाः वानराः जितकाशिनः राघवजयं वदन्तः रावणवधं च वदन्तः विनेदुः।

अन्तरिक्षे त्रिदशदुन्दुभिः सौम्यः व्यनदत्। दिव्यगन्धवहः सुसुखः मारुतः ववौ।

अन्तरिक्षात् भुवि दुरावापा मनोहरा पुष्पवृष्टिः राघवरथं किरन्ती निपपात।

'साधु, साधु' इति राघवस्तवसंयुक्ता देवतानां वागग्र्या विशुश्रुवे।

देवानां चारणैः सह महान् हर्षः आविवेश।

मरुद्गणाः प्रशमं प्रजग्मुः, दिशः प्रसेदुः, विमलं नभः अभवत्, न मही चकम्पे, न मारुतः ववौ, दिवाकरः स्थिरप्रभः अभवत्। निहतरिपुः स्थिरप्रतिज्ञः रणे स्वजनबलाभिवृतः रघुकुलनन्दनः महौजाः त्रिदशगणैः अभिसंवृतः महेन्द्र इव बभूव।

– युद्धकाण्डम्, 108 सर्गः

# सिद्धसिद्धान्तपद्धतौ परमपदम्

**पुलक दासः**

**शोधसारः**

गुरुगोरक्षनाथकृता सिद्धसिद्धान्तपद्धतिः नाथयोगपरम्परायाः प्रमुखः तात्त्विकग्रन्थोऽस्ति। ग्रन्थेऽस्मिन् देहविज्ञानं, शक्तिप्रक्रिया, ब्रह्माण्डरचना, चक्रन्यासः, प्राणायामः, मनःसंयमः, तथा चान्ते परमपदप्राप्तिः इत्यादीनां गूढतत्त्वानां निरूपणं दृश्यते। अत्र शोधे ग्रन्थस्यास्य सन्दर्भे 'परमपदम्' इति पदस्य तात्त्विकं विवेचनं क्रियते। 'परमपद' शब्दस्य सामान्यतया मोक्षः, कैवल्यम्, निर्वाणम्, चिदानन्दरूपं ब्रह्म, अथवा शिवपदम् इत्यादिरूपेण प्रयोगः दृश्यते। किन्तु सिद्धसिद्धान्तपद्धतौ इदं पदं केवलं मुक्त्यवस्थां न निरूपयति, अपि तु योगिनः साधनपरिपाकरूपेण प्राप्यं ब्रह्मरन्ध्रस्थितं दिव्यावस्थारूपं परमप्रकाशस्वरूपं च ज्ञायते। अत्र परमपदं न केवलं अवस्थानां चरमं लक्ष्यं, किन्तु पूर्णं तत्त्वात्मकम् अनुभवरूपं परमार्थं च प्रतिपादयति। परमपदं न केवलं मोक्षरूपेण परिभाष्यते, किन्तु तन्मध्ये चिदानन्दघनशिवस्य स्वरूपं, जीवब्रह्मैक्यस्य स्थितिः, तथा च नाथयोगदृष्ट्या लीनावस्था अपि प्रतिपाद्यते। अतः अस्मिन् शोधे 'सिद्धसिद्धान्तपद्धतिः' इति ग्रन्थे प्रतिपादितं परमपदं केन प्रकारेण परमार्थतत्त्वस्य स्वरूपं बोधयति इत्यस्य गूढविवेचनं क्रियते।

**कूटशब्दाः–** नाथयोगपरम्परा, सिद्धसिद्धान्तपद्धतिः, परमपदप्राप्तिः, जीवब्रह्मैक्यम्, मोक्षः, दिव्यावस्थारूपम्, शिवस्वरूपम्।

## भूमिका

मानवजीवनस्य परमलक्ष्यं मोक्षः, निर्वाणं कैवल्यं वा परमपदमिति विभिन्नदर्शनानां निष्कर्षरूपेण स्वीकृतमस्ति। एषः आध्यात्मिकः मार्गः केवलं तात्त्विकविचारमात्रे न समाप्तः, अपि तु योगाभ्यासेन, अनुभवेन च साक्षात्कर्तव्यः इत्यपि महर्षयः मन्यन्ते। नाथसम्प्रदायः, विशेषतः गोरक्षनाथः, एतस्मिन्नेव साक्षात्कारमार्गे स्वकीयं वैशिष्ट्यं दर्शितवान्। गोरक्षनाथः नाथसम्प्रदायस्य प्रधानाचार्यः हठयोगाचार्यः च आसीत्। गोरक्षनाथकृतः सिद्धसिद्धान्तपद्धतिः-

नामको ग्रन्थो न केवलं योगाभ्यासस्य मार्गदर्शकोऽस्ति, अपितु तस्य माध्यमेन परं तत्त्वं, परमपदं च लभ्यते इति स्पष्टं प्रतिपादयति। अत्र परमपदं न केवलं मोक्षशब्देन व्यपदिश्यते, अपि तु ब्रह्मरन्ध्रस्थितं, चिदानन्दरूपं, साक्षात्कारगम्यं च तत्त्वमिति निर्दिश्यते। तस्य दर्शनं तु योगः, तन्त्रं, अद्वैतवेदान्तः चेति समुचितसामञ्जस्यरूपेण व्यवस्थितम्। सः आत्मस्वरूपस्य अनुभवं परमपुरुषार्थरूपेण स्वीकुर्वन्, गुरूपदेशं, पिण्डब्रह्माण्डयोः समरसीकरणं च मोक्षोपायरूपेण निर्दिशति। अद्यतनपरिप्रेक्ष्ये यदा योगः केवलं शरीरचेष्टारूपेण प्रचारं लभते, तदा गोरक्षयोगदृष्ट्या परमपदस्य दार्शनिकं, तात्त्विकं च स्वरूपं मननयोग्यं भवति। एतस्मिन्नध्ययने मुख्यः प्रश्नो भवति— परमपदस्य किं स्वरूपं गोरक्षनाथस्य सिद्धसिद्धान्तपद्धत्यां निर्दिष्टम्? के उपायाः तस्य प्राप्तये निर्दिष्टाः? किं नाथदृष्ट्या स आत्मानुभवरूपं ब्रह्म एव वा? इति। एतेषां प्रश्नानाम् उत्तराय अयं शोधः प्रयोजनं वहतीति।

**परमपदस्य तात्त्विकस्वरूपम्–**

पद्यते ज्ञानिभिः प्राप्यते इति 'पदम्'। अत्र 'परम' इत्यस्यार्थः उत्कृष्टतमं, श्रेयः, तथा च 'पदम्' इत्यस्यार्थः 'पदम्' इत्यस्यार्थः स्थितिः, स्थानं, लक्ष्यञ्च। परमं च पदं च = 'परपदम्' इत्यस्य सामान्यार्थः भवति 'सर्वोत्कृष्टा स्थितिः', 'जीवस्य चरमलक्ष्यम्', तथा नित्यमुक्तस्वरूपमिति। भारतीयदर्शनपरम्परायां परमपदं मोक्षः, कैवल्यं, निर्वाणं, ब्रह्मसाक्षात्कारः, शिवैक्यं, आत्मबोधः इत्यादिभिः नामभिः निरूप्यते। गोरक्षनाथस्य दृष्ट्या परमपदं तत्तत्त्वं यत्र आत्मा परमात्मना सह ऐक्यं प्राप्नोति, यत्र योगिनः परपिण्डे स्वपिण्डस्य अनुभूतिर्भवति, यत्र द्वैत–अद्वैतातीतं निर्विशेषं सहजज्ञानं स्फुरति तदेव परमपदम्। तत्र परमपदं स्वसंवेद्यं, निर्विकल्पं, निरुपाधिकं, द्वैताद्वैतविवर्जितमिति विशेषणैः निर्दिष्टम्। एषः विचारः गुरुप्रसादेन, योगसाधनस्य फलरूपेण, योगिनः स्वानुभवेन ग्राह्यमिति प्रतिपादितम्। गोरक्षनाथः एवमाह–

**'परमपदमिति स्वसंवेद्यमत्यन्ताभावाभासकमयम्।'**[2] इति।

अत्र 'स्वसंवेद्यम्' इत्यनेन शब्देन परमपदस्य अत्यन्त सूक्ष्मं, गूढं, प्रत्यग्गम्यं स्वरूपं सूच्यते। तस्यानुसारं परमपदं न केवलं वाच्यं नापि चिन्तनीयम्, किन्तु साक्षात् अनुभवगम्यम्। न तद् बुद्धिगोचरं, न मनसा गम्यं, अपि तु सः केवलं योगिनः आत्मनः आत्मना अनुभवगम्यम्। यः आत्मा तमेव आत्मना अनुभवति, सः एव तं पश्यति। एषा धारणा बृहदारण्यकोपनिषदा प्रत्यवभासते–

**यत्र त्वस्यमात्मा आत्मैव भवति, तद्विज्ञातं नाम भवति।**[3] इति।

अतः गोरक्षनाथः परमपदं 'स्वयंप्रकाशरूपम्', न च भिन्नवृत्तिसंवेद्यमिति प्रतिपादयति। एषा तत्त्वबुद्धिः योगिनां आत्मानुभवसिद्धा।

**सिद्धसिद्धान्तपद्धत्यां परमपदप्राप्तेः साधनविचारः–**

नाथमतानुसारम् अलखनिरञ्जनः इति निर्दिष्टः यो निराकारः, निर्गुणः, अव्यक्तः च महादेवः अस्ति, स एव परं ब्रह्म, मोक्षप्रदायकः च। तस्य अलखनिरञ्जनस्य साक्षात्कारः एव मुक्तेः परमकारणं इति नाथानां दृढं विश्वासः। एषः साक्षात्कारः केवलं ग्रन्थाध्ययनस्य वा पठनमात्रस्य फलरूपेण न सम्भवति, किन्तु तत्त्वदर्शिनः अवधूतगुरोः कृपया, तेन प्रदर्शितेन योगमार्गेण च साध्यते। गुरुः एव मुक्तिपथप्रदर्शकः, शक्तिसञ्चारकर्ता, आत्मबोधस्य दीपः च। अलखनिरञ्जनमहादेवस्य साक्षात्कारेणैव मोक्षः सिध्यति। स च साक्षात्कारः केवलं अवधूतगुरोः अनुग्रहेण सम्भवति इति नाथपरम्परायाः मुख्यसिद्धान्तः।

अतः एतत् परमपदं निरुपाधिकम्। प्रमाणादिमाध्यमेन नानुभूयते। केवलं गुरुकृपामात्रेण, तत्रापि निरुपाधिकेन, न तु रागादिसम्भूतेन तत्पदं निर्णेतुं शक्यते। स्वसंवेद्यमेव परमपदमिति सिद्धानां मते प्रसिद्धमिति। सर्वदा निर्विकल्पसमाधिना एव स्वकीयानुभवेन स्वयं प्रकाशरूपम् अनुभूयते। तदेव स्वसंवेद्यम्। तथात्र गुरुभक्तिलभ्यं स्वसंवेद्यं परमपदमिति। केवलं गुरोः सन्मार्गदर्शनम् अस्यावाप्तौ एकमात्र उपायः। अत्र सन्मार्गः नाम योगमार्गः। योगमार्गस्य भिन्नः पाखण्डमार्गोऽपि अस्ति। तदुक्तं योगमार्गेषु तन्त्रद्वारा दीक्षितमार्गान् ये दूषयन्ति ते हि पाखण्डिनः। येन आश्रयेण परमपदस्य प्राप्तिः न भवति, ते सर्वे बाधकाः भवन्ति, साधकाः न। सिद्धयोगिगुरुणा यस्मिन् योगमार्गे योगमार्गोपदेशे वा स्वसंवेद्यस्य परमपदस्य साक्षात्कारः क्रियते, तस्मात् अलखनिरञ्जनः परमात्मा अनुभूयते। अनयोः स्वपिण्ड-परपिण्डयोः यदा अभेदानुभवः, तदैव परपिण्डे आत्माभिव्यक्तिः इत्युक्ते निजावेशः भवति। अस्मात् निजावेशतः परिमाणस्वरूपस्य निरुत्तानस्य समरसतायाः उदयो भवति। समरसतया योगिना परपिण्डे स्वपिण्डम् अनुभूयते। ततः परमानन्दः जायते, तस्मात् अद्भुताकार-प्रकाशबोधः जायते। तादृशात् प्रबोधानुभवविशेषात् परपिण्डस्वपिण्डयोः मध्ये भेदस्य समाप्तिः भवति। तदा अखण्डं परमात्मरूपपरमपदं प्रत्यक्षत्वेन प्रस्फुटितं भवति। तदेव असन्दिग्धं सत्यम्। अतएव महासिद्धयोगिनः सर्वादौ सद्गुरोः शरणापन्ना भूत्वा, गुरुप्रसादञ्च लब्ध्वा, चित्तवृत्तिनिरोधेन ध्यानमग्नाः भवन्ति। तदा स्वपिण्डपरपिण्डयोः ऐक्यमनुभवन्तः ते योगिनः द्वैताद्वैतविवर्जितं परमपदमनुभवन्ति। इदानीं प्रश्नः जायते परमपदस्य आवाङ्मनसगोचरत्वात्, स्वपिण्डस्य परमपदावाप्तिः केन प्रकारेण सम्भवति? तदुत्तरे उच्यते सद्गुरोः प्रदर्शितेन मार्गेणैव योगिनः अभ्यासेन निमेषोन्मेषं प्रत्याहित्य समरसकरणेन

स्वस्मिन् पिण्डे महाराशिपुञ्जं स्वेनैव प्रकारेण धारयन्तः पिण्डसिद्ध्यर्थं तिष्ठन्ति। ततः पिण्डसिद्धिमिच्छतां योगिनां किदृग्वेषः विधातव्यः इत्यस्मिन् विषये गुरुणा गोरक्षनाथेन यदुच्यते तत्तु अधः आलोच्यते।

जलपानार्थं शब्दार्थं आभूषणार्थं वा शङ्खः धारणीयः, कर्णाभरणरूपेण मुद्रा नाम कुण्डलः स्वीकरणीयः, अमरीपानं कर्तव्यम्, निर्मलेन स्थातव्यम्, योगासनादिखेदजनितघर्मादिः शरीरे एव मर्दनम्, निर्जनेन वास्तव्यता, गुरूपदेशः स्मर्तव्यः, गुरूपदिष्टायाः क्रियायाः अनुष्ठानं कर्तव्यम्, अमायया जपः कर्तव्यः, यथाविधि अनेकोपायागोचरस्वरूपस्य नाथस्य शङ्खशृङ्गनादाभ्यां पूजनं विधेयम्, कौपीनं धर्तव्यम्, काष्ठनिर्मितपादत्राणे स्वीकरणीये, अङ्गवस्त्रं बहिर्वस्त्रं कम्बलञ्चापि धर्तव्यम्, आतपत्रम् अद्भूतं वेत्रदण्डं कमण्डलुः नाम जलपात्रञ्च नेतव्यम्, दग्धगोमयेन तिर्यक्तया निर्मितं तिलकं कर्तव्यम्। एतेषां सर्वेषां करणे धारणे च सर्वदा प्रयत्नेन गुरुवन्दनं विधेयम्।

पूर्वोक्तप्रकारेण विचारवताम् एतद्वेषवतां च पिण्डसिद्धौ सत्यां सर्वा अणिमादिसिद्धयः चक्रवर्तिनः राज्ञः नटा इव आज्ञाकरा सन्निहिताश्च भवन्ति। उक्तञ्च—

**यस्मिन् जाते जगत्सर्वं सिद्धं भवति लीलया।**
**सिद्धयः स्वयमायान्ति तस्माज्ज्ञेयं परं पदम्।।**[5] इति।

आदौ उक्तं परमपदलाभार्थं योगिभिः केचिद् वेषभूषाः स्वीकर्तव्याः, परन्तु अनन्तरम् आचार्यैः तन्मतं निराकृतमासीत्। परमार्थतः विचारे क्रियमाणे सति एवं ज्ञायते यत् परमपदं वेषेण नैव प्राप्यते, वेषस्य देहमूलकत्वात् लोकप्रत्ययहेतुत्वात् च। तत्तु योगमार्गेणैव प्राप्यते, तस्य योगमार्गस्य नैके भेदाः सन्ति। तेषु योगमार्गः विशेषतः स्वधर्मः। अस्माकम् अयमेव योगमार्गः परमपदस्य प्राप्तिकरः भवति। तदुक्तम्—

**योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ।**
**शास्त्रेष्वन्येषु सर्वेषु शिवेन कथितः पुरा।।**[6] इति।

योगसाधनेन पिण्डसिद्धेः अनन्तरम् अखण्डज्ञानप्राप्तये अखण्डशिवतत्त्वं ज्ञातव्यम्, यतो हि तदेव परमपदम्। एतत्प्राप्त्यनन्तरम् **अहमेव शिवः** इति शिवेन सह मम पूर्णतादात्म्यं प्रतिष्ठापितं भवति। एतदेव सहज–संयम–सोपाय–अद्वैतक्रमेण परिलक्षितं भवति। तत् परमपदं सदगुरोर्वक्त्रात् अनुभवनीयम्। अन्यथा शास्त्रकोटिभिरपि नानुभूयते। तस्यानुभवे गुरुरेव कारणमित्यर्थः।[7]

एवंप्रकारेण गुरुगोरक्षनाथेन स्वोपदेशग्रन्थे योगसाधकानां कृते नवचक्राणां, षोडशाधाराणां, लक्ष्यत्रयाणां, व्योमपञ्चकानां च निरूपणं कृतमस्ति। एषु सर्वेषु विवरणेषु

योगमार्गस्य सारभूतं शरीरस्य तत्त्वज्ञानं प्रमुखं विधानम् इति स्पष्टं दृश्यते।

गोरक्षनाथेन प्रोक्तं यत्–

**नवचक्रं कलाधारं त्रिलक्ष्यं व्योमपञ्चकम्।**
**सम्यगेतन्न जानाति स योगी नामधारकः॥**[8] इति।

नवचक्राणि, षोडशाधाराः, त्रिलक्ष्यं, पञ्चव्योमादिनां प्रमुखविषयाः आलोचिताः। एतेषां विषयाणां समुचितज्ञानं योगसाधकस्य अवश्यमेव भवेत्। यः योगी एतेषां विषये सम्यग्रूपेण न जानाति सः योगसिद्धिं न प्राप्नोति। यः मुमुक्षुः (मोक्षेच्छुकः) भवति, तेन एतेषां चक्राणां, आधाराणां, लक्ष्याणां, व्योमानां च सम्यग् ज्ञानं करणीयम्। शरीरविज्ञानमेव मोक्षमार्गस्य मूलं भवति। एषां च निरन्तरं साधनं कृत्वा एव स मोक्षपदं परमानन्दात्मकं परमपदं च प्राप्नोतीति।

अतः गोरक्षनाथादिभिर्योगाचार्यैः शरीरस्य सर्वप्रथमम् आत्यन्तिकज्ञानं यथावत् चिन्त्यते। तत्र योगसाधनायां कुण्डलिनीशक्तेः जागरणाय षट्चक्राणां ध्यानं, स्थितिः च अत्यन्तं महत्त्वपूर्णास्ति। गोरक्षनाथमतेन पिण्डे (शरीरे) नवचक्राणि यथा–

**1. मूलाधारचक्रम् –**

पिण्डेऽस्मिन् स्थूलशरीरे नव चक्राणि सन्ति। यद्यप्यन्यत्र[9] षडेव चक्राणि निरूप्यन्ते परन्तु अत्र नवेति विशेषः। इदं मूलाधारचक्रं ब्रह्मचक्रमपि कथ्यते। परंब्रह्मण आविर्भावस्थानं मूलाधारचक्रम् अतः अस्य नाम एवमस्ति। यस्य स्थानं भवति अपानस्थाने गुदास्थाने वा। एतत् स्थानं कामपीठं शक्तेराविर्भावस्थानम् इति। सर्वेषां ऐहिकपारलौकिकानां कामानां प्रदायकं भवति। साधकः मूलाधारे वह्निवर्णां शक्तिं सदा ध्यायेत्।

**2. स्वाधिष्ठानचक्रम् –**

लिङ्गसमीपदेशे सुषुम्नानाड्यां द्वितीयचक्रं स्वाधिष्ठानचक्रं विद्यते। स्वाधिष्ठानचक्रे इषद्रक्तवर्णं पश्चिमाभिमुखं शिवलिङ्गं भवति। अत्र उपासनेन जगदाकर्षणशक्तिः सिद्ध्यति, अर्थात् हठयोगस्य प्राप्तिः अनेन स्वाधिष्ठाननाम्ना चक्रेण भवति।[10]

**3. नाभिचक्रम्–**

तृतीयं नाभिचक्रं मणिपुरचक्रमपि कथ्यते। अस्मिन् चक्रे सर्वविधाः सिद्धयः भवन्तीति एतत् मध्यमाशक्तिः इति ज्ञायते। अणिमादिसर्वसिद्धिभिः एतत् पूर्णमस्ति। तस्य ध्यानस्य परिणामः सर्वदेवप्राप्तिः भवतीति।

**4. हृदयाधारचक्रम्–**

हृदयावृत्त्याकाश आधारो भवति हृदयाधारचक्रम्। हृदयाधारचक्रम् अनाहतचक्रमपि

कथ्यते। ततो निःसृताऽष्टदलकमलं हृद्देशेऽधोमुखम् अस्ति, तदन्तः कर्णिकायां ऊर्ध्वदण्डसदृशं लिङ्गाकारं ज्योतिरूपं ध्यायेत्। इयं हंसकलानाम्ना श्रीशक्तिः इति ज्ञायते। अत्रोपासनेन सर्वेन्द्रियाणि वश्यानि भवन्तीति।

**5. कण्ठचक्रम् –**

कण्ठदेशे पञ्चमचक्रं कण्ठचक्रं विशुद्धिचक्रमिति प्रसिद्धम्। चतुरङ्गुलपरिमितम् इदं चक्रम्। तत्र वामभागे इडानाम्नी चन्द्रनाडी दक्षिणे च पिङ्गलानाम्नी सूर्यनाडी मध्ये सुषुम्णा तां ध्यायेत्। तत्र भेदेन स्पष्टतया प्रकाशते। इयमनाहतकला अत्रोपासनेन क्वापि जले स्थले पाषाणे वा प्रतिघातो न भवति तथा च सङ्कल्पशक्तिः सिध्यति।

**6. तालुचक्रम् –**

षष्ठचक्रं तालुचक्रं भवति। तत्रामृतस्य सहस्रारतः प्रवाहः भवति। तत्र शून्यस्य ध्यानेन चित्तं लीनं भवति।

**7. भ्रूचक्रम् –**

सप्तमं भ्रूचक्रम्, इदं चक्रं आज्ञाचक्रमपि कथ्यते। चक्रमिदं भ्रुवोर्मध्ये वर्तते इति बोधनाय मध्यमचक्रमिति कथ्यते। तत्र दीपशिखाकारं मध्यमाङ्गुष्ठमात्रम् अङ्गुष्ठपरिमितं ज्ञानचक्षुः अस्ति। अस्य ध्यानेन वाक्सिद्धिर्भवति इति। शिवसंहितानुसारमते भ्रुवोर्मध्ये स्थितचक्रे त्रीणि पीठानि उपविष्टानि सन्ति यानि नादः, बिन्दुः, शक्तिः च इति कथ्यन्ते। साधकेन अस्य ध्यानेन मोक्षः लभ्यते इति मन्यते।[11]

**8. निर्वाणचक्रम् –**

अष्टमं ब्रह्मरन्ध्रस्थाने निर्वाणनामकं चक्रं भवति। सूचिकाया अग्रभागस्य या रेखा, तत्सदृशं भवति। अत्र ध्यानेन ब्रह्म प्रकाश्यतेऽतो ब्रह्मरन्ध्रमिति द्वितीयं नाम मोक्षश्च भवति। इदं जालन्धरबन्धेनोद्घाट्यतेऽतो जालन्धरपीठं साङ्केतिकं वा नाम धूमसदृशं तेजो ध्यायेत्। तत्फलं मोक्षः भवति।

**9. आकाशचक्रम् –**

नवममाकाशनामकं चक्रं सर्वोपरिस्थितं चक्रम्। तत्र आकाशचक्रे निर्वाणनामकं पीठं भवति। अस्य ध्यानेन संसारभयनिवृत्तिर्भवति। सर्वो वशीभूतः भवतीति। सर्वेष्टसिद्धिदायकं भवतीति। एवंप्रकारेण शरीरेऽस्मिन् सारभूतनवचक्राणां विचारो विद्यते।

नवचक्रनिरूपणानन्तरं गुरुगोरक्षनाथेन षोडशाधाराः कथ्यन्ते। शरीरस्थशक्ती-नामाविर्भावार्थं योगोपयोगिशरीरनिर्माणञ्च षोडशाधारं ज्ञातव्यम् इति गुरुगोरक्षनाथेन उक्तम्। तथा च–

**1. पादाङ्गुष्ठाधारः–** तस्य अग्रभागे स्थितस्य तेजोरूपस्य अग्नेः ध्यानेन दृष्टिः स्थिरा भवति।

**2. मूलाधारः –** मूलाधारे वामपार्ष्णिना मर्दनेऽग्निः प्रदीप्तो भवति।

**3. गुदाधारः –** तृतीयं स्थानं गुदामूलम्। गुदामूलस्य विकासेन संकोचनेन च अपानवायोः स्थिरता भवति।

**4. लिङ्गाधारः–** लिङ्गसङ्कोचनेन वीर्यगमनमवरुध्यते। ऊर्ध्वमुखे वीर्यस्तम्भनं भवति। फलतः वज्रदेहः कामदेवसदृशं रूपं च प्राप्यते। अस्य साङ्केतिकं नाम वज्रोलीति।

**5. उड्डीयानाधारः –** अस्य बन्धनेन मलमूत्रसङ्कोचनं भवति।

**6. नाभ्याधारः–** षष्ठं नाभिमूलं तत्रैकाग्रमनसा प्रणवध्यानेन नादलयः भवति।

**7. हृदयाधारः–** हृदयमूले प्राणवायोः निरोधेन तत्रस्थम् अष्टदलकमलं विकसितं भवति।

**8. कण्ठाधारः–** कण्ठं सङ्कोच्य जालन्धरबन्धनं क्रियते चेत् इडा–पिङ्गला-नाडिषु प्राणवायुः स्थिरः भवति।

**9. घण्टिकाधारः–** जिह्वाग्रधारणे सहस्त्रारतः सुधायाः प्रक्षरणं जायते।

**10. ताल्वाधारः–** जिह्वां चालयितुं ततः विपरीतदिशि मुखं प्रवेशयेत्। तेन योगी काष्ठवत् शान्तः भवति।

**11. जिह्वाधारः –** जिह्वामूलम्, तत्र जिह्वाग्रधारणे सर्वरोगाद्विमुक्तिः भवति।

**12. भ्रूमध्याधारः–** आज्ञाचक्रवर्ती भ्रूमध्ये चन्द्रमण्डलध्यानेन शीतलता लभ्यते। त्रिविधतापोपशमो भवतीत्यर्थः।

**13. नासाधारः–** नासाग्रलक्षणेन मनसश्चाञ्चल्यं नश्यति।

**14. कपाटाधारः–** नासिकामूले दृष्टिधारणे षण्मासैः ज्योतिःपुञ्जदर्शनं भवति।

**15. ललाटाधारः–** ललाटमूलं तत्र ज्योतिःपुञ्जध्यानेन तेजस्वि भवति।

**16. ब्रह्मरन्ध्राधारः–** अवशिष्टे षोडशे ब्रह्मरन्ध्रे आकाशचक्रं भवति। सच्चिदानन्दं शक्तिसहितादिनाथं गुरुचरणकमलयुगलं सदा ध्यायेत्। साधकः आकाशवत् परिपूर्णरूपः मुक्तः भवतीति।

षोडशाधारानन्तरं गुरुगोरक्षनाथः सिद्धसिद्धान्तपद्धत्यां चित्तस्य एकाग्रतायाः स्थिरतायाः च ध्यानार्थं लक्ष्यत्रयाणां विषये अवोचत्। लक्ष्यत्रयं वर्तते– अन्तर्लक्ष्यं, मध्यलक्ष्यं, बहिर्लक्ष्यं च इति।

**अन्तर्लक्ष्यम्–** देहान्तर्वर्तिनां पदार्थानामन्तरेव लक्षणं दर्शनं अन्तर्लक्ष्यमिति। ललाटे कपालमध्यस्थितभागे नीलज्योतीरूपं पुत्तालाकारं ध्यायेत्।

**बहिर्लक्ष्यम्–** तदनन्तरं बहिर्लक्ष्यं कथ्यते। नासाग्राद् बहिरङ्गुलिद्वयमारक्तं तेजः ध्यायेत्। अथवा स्थिरदृष्ट्या आकाशमेवावलोकयेत्। किरणैर्व्याप्तमाकाशमण्डलं पश्यति। एवं दृष्टेर्निर्मलीकरणं भवेदिति। अथवा ऊर्ध्वदृष्ट्यन्तरालं लक्षयेत्। ज्योतिर्मुखानि पश्यति। अथवा ऊर्ध्वं तिर्यग्वा यत्र तत्राकाशं पश्येत्। आकाशसदृशं चित्तं मुक्तिप्रदं भवति। अथवा दृष्ट्यन्तस्तप्तकाञ्चनसन्निभां भूमिं पश्येत्। दृष्टिः स्थिरा भवतीति।

**मध्यमलक्ष्यम्–** मध्यमलक्ष्यं तु देहाद्बहिर्भूतानां देहान्तर्दर्शनमिति। इदं ध्यानं कस्यापि विशिष्टलक्ष्यस्य विषये न भवति। अपितु श्वेतवर्णस्य, कृष्णवर्णस्य, रक्तवर्णस्य वा, अग्निशिखायाः, सूर्यमण्डलस्य, चन्द्रमण्डलस्य, विद्युत्कारस्य वा स्वशरीरस्य कस्यापि अङ्गेन वा ध्यानं स्थिरं भवति।

लक्ष्यत्रयकथनानन्तरं गोरक्षनाथः व्योमपञ्चकविषये अवदत्। 'व्योम' शब्दस्य अर्थः आकाशः। यथैव आकाशः व्यापकोऽस्ति तथैव आत्मनः स्वरूपं सर्वव्यापकम् अस्ति। विविधेषु शास्त्रेषु पञ्चविधाकाशविषये वर्णितमस्ति। आत्मनः स्वरूपस्य अभिव्यक्तये पञ्चव्योम्नः ध्यानमावश्यकं वर्तते इति। व्योमपञ्चकं यथा– आकाशं, पराकाशं, महाकाशं, तत्त्वाकाशं, सूर्याकाशमिति। एवं व्योमपञ्चकध्यानं कृत्वा साधकस्य मनः आकाशवत् शुद्धं, विशालं, दिव्यं च भवति।

एवंप्रकारेण गोरक्षनाथस्य योगदर्शने मोक्षमार्गानुशीलने षट्चक्राणि, षोडशाधाराणि, लक्ष्यत्रयं, व्योमपञ्चकं च अत्यन्तं महत्त्वपूर्णानि अवयवत्वेन दृश्यन्ते। एतेषां सम्यगनुसन्धानं साधकं सूक्ष्मशरीरविज्ञानतः आत्मसाक्षात्कारपर्यन्तं नेतुं समर्थं भवति। षट्चक्रसाधनया कुण्डलिन्याः जागरणं, षोडशाधाराणां विशुद्ध्या आत्मस्थैर्यं, लक्ष्यत्रयस्य साधनया चित्तनिवृत्तिः, व्योमपञ्चकस्य अनुभवेन परमचैतन्यस्य साक्षात्कारः सम्पद्यते।

अतः अस्य सम्पूर्णप्रक्रियायाः मूलम् अन्तर्मुखता, संयमः, तथा च गुरुप्रदर्शितमार्गे अनवरतसाधनमेव इति गोरक्षयोगदर्शनस्य निष्कर्षरूपेण प्रतिपाद्यते।

**अष्टाङ्गयोगः**

अष्टाङ्गयोगमाध्यमेन कैवल्यं प्राप्यते। महर्षिपतञ्जलिना राजयोगमाध्यमेन अष्टाङ्गयोगस्य सैद्धान्तिकपक्षस्य आलोचना कृता वर्तते। परन्तु योगस्य नाथसम्प्रदाये हठयोगे च अष्टाङ्गयोगस्य व्यावहारिकपक्षस्य आलोचना भवति। अध्यायेऽस्मिन् भगवत्पतञ्जलि-कृतयोगसूत्रानुसारं अष्टाङ्गयोगस्य वर्णनेन सह सिद्धसिद्धान्तपद्धतिदृष्ट्वा अष्टाङ्गयोगानां वर्णनं विद्यते। अष्टाङ्गयोगेषु समाधिः मुख्यो वर्तते, तस्मात् समेषां योगाङ्गानां वर्णनक्रमे समाधेः विशिष्टा व्याख्या अत्र कृतास्ति।

**यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि**[12] इति च अष्टयोगानां भागाः सन्ति। एतान् ज्ञात्वा अभ्यासेन च योगः परिपूर्णः भवति, एवं च साधकः सिद्धयोगीति नाम्ना अभिधीयते।

**यमः –** अष्टाङ्गयोगस्य प्रथममङ्गं यम इति ज्ञेयः। गुरुगोरक्षनाथेन यमस्य लक्षणं क्रियते यथा– **यम इति उपशमः सर्वेन्द्रियजय आहारनिद्राशीतवातातपजयश्चैवं शनैः शनैः साधयेत्।।**[13] सर्वेन्द्रियजय इति ज्ञानेन्द्रियाणि न विषयासङ्गं विदधति। बुभुक्षा विपासा निद्राशीतवातजबाधा च न भवति। गुरुगोरक्षनाथेन विवेकमार्तण्डे यमस्य दशलक्षणनां विषये चर्चा कृता।[14]

**नियमः–** अन्तकरणस्य वृत्तीनां निरोध एव नियमः। एकान्तवास इति अरण्यनगकन्दरादौ वा योगिमण्डले वासो न तु प्राकृतजनेषु केनापि सह सम्बन्धाभिमानो न कर्तव्यस्तेन रागो न भवेत् इति। हठयोगप्रदीपिकायां नियमस्य दशभागविषये विस्तृतेन आलोचितम्।[15]

**आसनम्–** गोरक्षनाथेन उक्तं यत्, सदा स्वरूपे समासनता इत्युक्ते तत्साधकत्वात् सम्यक् स्थानमप्यासनमिति। स्वस्तिकासनं, पद्मासनं, सिद्धासनमेतेषां मध्ये यथेष्टमेकं विधाय सावधानेन स्थातव्यमित्यासनलक्षणम्।

**प्राणायामः–** योगाङ्गेषु चतुर्थमङ्गं प्राणायामः इति। प्राणवायोः स्थैर्यकरणं प्राणायाम इति कथ्यते। स च चतुर्विधः रेचकपूरककुम्भकसङ्घट्टकरणानीति। रेचकः कुक्षिस्थवायोर्बहिर्निःसारणम्। पूरको बाह्यवायुमाकृष्य देहाभ्यन्तरेऽवस्थापनम्। कुम्भक उभयगतिनिरोधः यथाशक्ति धारयति तदा कुम्भकः। चतुर्थं करणं सङ्घट्टना। तल्लक्षणं तु पूरकं रेचकं चानपेक्ष्यैव प्राणस्य धारणमिति।

**प्रत्याहारः–** चैतन्यात्मनोऽश्वरूपेषु इन्द्रियाणां स्वस्वविषयेण प्रवृत्तिः। तानि इन्द्रियाणि विषयेभ्यः निवर्त्य आत्मानं प्रति ध्यानं 'प्रत्यहारः' इति कथ्यते। गीतायां प्रत्याहारस्य कृते कूर्मसादृश्यं कथितमस्ति।

**यदा संहरते चायं कूर्मोङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।**[16]

**ध्यानम्–** अन्यत्र तु, ध्यानमिति सप्तमाङ्गत्वेन निरूपितम्। इह तु षष्ठाङ्गत्वेनेति विवक्षाभेद एव न वस्तुभेद इति सर्वमनवद्यमिति ध्यानम्। अखण्डसच्चिदानन्दो द्वैतरहितः परमात्माऽस्ति। स विषयविषयिसंयोगेन प्रकाशते, तत्तत्स्वरूपमेवेति भावयेत्। सर्वभूतेषु समदृष्टिश्च इति ध्यानलक्षणम्। अतः सिद्धमद्वैतमेव तत्त्वं सर्वभूतेषु समदृष्ट्या,

एवात्मा सर्वभूतेषु साक्षातकरणमित्यर्थः। गीतायामस्ति '**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि**'[17] इति ध्यानम्।

**धारणा–** स बाह्याभ्यन्तर एकमेव निजतत्त्वस्वरूपमेवान्तःकरणेन साधयेत्, यथा यद्यदुत्पद्यते तत्तन्निराकारे धारयेत्, स्वात्मानं निर्वातदीपमिव सन्धारयेदिति धारणालक्षणम् इति गोरक्षनाथेन उच्यते।

**समाधिः–** अन्तःकरणस्य सर्वतत्त्वानि प्रति समानरूपेण तटस्थता, अनायासस्थिति-मत्त्वमिति समाधिः इति गोरक्षनाथेन वर्णितम्।

विशेषतः अष्टाङ्गयोगस्य विवेचनेन गुरुगोरक्षनाथः पतञ्जलियोगदर्शनेन सादृश्यं दर्शयन् अपि, स्वीयमार्गे अधिकं तात्त्विकं, आध्यात्मिकं च गम्भीरत्वं प्रकाशयति। अत्र योगः केवलं चित्तवृत्तिनिरोधमात्रं न, अपि तु शक्तिसञ्चारणात् आत्मबोधपर्यन्तं सप्रयोजनक्रमयुक्ता साधनपद्धतिरिति स्पष्टं दृश्यते। अत्र नवचक्रस्य, षोडशाधारस्य, लक्ष्यत्रयस्य, व्योमपञ्चकस्य च यथावत् निरूपणं दृष्टव्यं यत्र साधकस्य स्थूलसूक्ष्मस्वरूपे प्रवेशः, शक्त्याविष्कारः, चित्तैकाग्रता, आत्मतत्त्वावबोधः च क्रमशः साध्यते।

**कुण्डलिनीजागरणम्–**

कुण्डलिनीमहाशक्तेः जागरणेन साधकस्य समाधिसिद्धिः भवति। निरन्तरं नाथयोगस्य साधनेन साधकः यदा मूलाधारस्थमहाशक्तिं जागरितां कृत्वा ऊर्ध्वगतिं प्रददाति, तदा सा शक्तिः षट्कस्य भेदनं कृत्वा सहस्रारस्थेन परब्रह्मशिवेन सह तादात्म्यं स्थापयति। येन साधकस्य समाधिसिद्धिः भवति। सिद्धसिद्धान्तपद्धत्यनुसारेण सर्वेषां तत्त्वानां उद्यमविहीनसमावस्था समाधिः इति ज्ञायते। समाधियुक्तयोगिजनानां कालेन न तु मृत्युः भवति, न तु सः कर्मणा पतति। अपि च सर्वेषु शस्त्रेषु सः अभेद्यः भवति। केनापि प्राणिमाध्यमेन तस्य वधोऽपि न भवति। यन्त्रेण मन्त्रेण च सः अग्राह्यो भवति। एवं प्रकारेण श्रीगोरक्षनाथेन सिद्धसद्धान्तपद्धत्यां समाधेः फलमित्थम् उक्तम्।

**गोरक्षनाथमतानुसारं कायासाधनस्य महत्त्वम्–**

गोरक्षनाथेन स्पष्टं प्रतिपादितं यत्– कायाकल्पेन एव सिद्धिः लभ्यते। कायस्य विशुद्धिः, योगाभ्यासेन दीर्घजीवनं, रोगरहितता च प्राप्ता चेत्, तेन साधकः चित्ते स्थैर्यं, इन्द्रियाणां संयमं, मनसो निग्रहं च साधयित्वा आत्मचिन्तनं कर्तुं शक्नोति। एवं संयमेन जीवनचर्यया साधकः आत्मस्वरूपानुसन्धानं कृत्वा मोक्षं प्राप्नोति। अयं मोक्षः निर्वाणपदम् इत्युच्यते, यत्र स्थितः साधकः भवबन्धनात् मुक्तः भवति। नाथसम्प्रदायेन एषैव सिद्धिः इति परिगण्यते। एतां दृष्ट्वा, शरीरमेव दिव्यम्, अमरं, चैतन्यमयं च विधाय तस्मात् मोक्षमार्गे प्रस्थानं क्रियते।

एतच्च कायसिद्धिः इत्युच्यते यत्र साधकः स्वकायं योगबलात् न केवलं दीर्घजीवनयुक्तं करोति, अपि तु तद् मोक्षसाधनाय पात्रं च करोति। यदा साधकस्य देहेन साधना निष्पन्ना सिध्यति, तदा देहत्यागबुद्धिः, हेयभावः च स्वयमेव नश्यति। देह एव साधनं, देह एव सिद्धिदायकं इति तत्त्वं नाथदर्शनस्य विशेषलक्षणम्।

यत्किमपि ब्रह्माण्डे विद्यमानं तदेव अस्मिन् नरपिण्डेऽपि अस्ति। पिण्डब्रह्माण्डयोः मूलाधारभूतं ब्रह्मैव, यः उभे व्याप्य स्थितः अस्ति। अतः यः ब्रह्म अलखनिरञ्जनः, निराकारः परमपिता परमात्मा अयं यस्य पिण्डे अन्तः स्थितः, तस्य रहस्यस्य यथार्थज्ञानं स्वरूपावस्थानम् इत्युच्यते। तुच्छया साधनया तस्य ज्ञानस्य प्राप्तिः न सम्भवति, केवलं योगसाधनया एव तदवबोधनं सिद्ध्यति। कारणं यद्योगसाधनया एव पिण्डे स्थितायाः मूलाधारशक्तेः ऊर्ध्वगमनं सम्भवति, यया सह ब्रह्मरन्ध्रे स्थितं शिवं प्रति साक्षात्कारो जायते सा एव मेलनावस्था स्वरूपावस्थानं कथ्यते। एषा च स्थितिः नाथानां साक्षात्कारादेव सम्पद्यते।

**प्रबन्धसारः**

'सिद्धसिद्धान्तपद्धतौ परमपदम्' इत्यस्मिन् विषये अत्रेदं स्पष्टं प्रतिपादितं यत् परमपदस्य तत्त्वं केवलं सैद्धान्तिकं नास्ति, अपि तु योगप्रक्रियया अनुभाव्यमानं जीवन्मुक्त्याः परमलक्ष्यमेव। गोरक्षनाथः स्वस्य ग्रन्थे योगमार्गस्य, कायसिद्धेः, शक्तिसञ्चारणस्य, ब्रह्मसाक्षात्कारस्य च यं परिष्कृतं मार्गं प्रदर्शयति, स एव परमपदस्य प्राप्त्युपायः इति निश्चयेन अवगन्तव्यम्। परमपदस्य स्वरूपं नाथपरम्परायां निर्विकल्पं चिन्मात्रतत्त्वं, शिवत्वावस्था, स्वरूपावस्थानं वा इत्यन्यैः शब्दैः विवक्षितं दृश्यते। एषा अवस्था साधकस्य योगमार्गेण, शक्तिसञ्चरणेन, पिण्डब्रह्माण्डैक्यदर्शनेन च उपलब्ध्यर्था संस्तूयते। 'यत् पिण्डे तद् ब्रह्माण्डे' इत्यस्य सिद्धान्तस्य आलम्बनेन गोरक्षनाथः दर्शयति यत् जीवस्य शरीरे एव ब्रह्मसाक्षात्कारस्य आधारः अस्ति। यत्र शक्तिरूपिणी कुण्डलिनी योगसाधनया उन्नीयमानास्ति, तत्र ब्रह्मरन्ध्रे स्थितेन शिवेन सह ऐक्यं सञ्जायते, यत्र न कश्चित् भेदः, न च द्वैतमवशिष्यते। एवं स्थिते, नाथानां दर्शनं परमपदं प्राप्तुं केवलं ज्ञानमार्गं न समाश्रयति, अपि तु कायसिद्धिं, प्राणायामं, ध्यानं, समाधिं च योगाङ्गानि आश्रित्य प्रत्यक्षानुभवेन तस्य साक्षात्कारं समाचष्टे।

अतः, 'सिद्धसिद्धान्तपद्धतौ परमपदम्' इत्येतं विषयम् अधिगच्छतः साधकस्य विवेकः जागरूकः भवति यत्तस्य मोक्षः, निर्वाणम् अथवा केवलं मृत्युबाधितं फलं न, अपि तु जीवन्मुक्त्या सह अनुभाव्यमानं स्थितप्रज्ञतया युक्ता चैतन्यमयावस्था एव। अयं

शोधप्रबन्धः प्रतिपादयति यत् गोरक्षनाथस्य दृष्टौ परमपदप्राप्तिः आत्मदर्शनस्य, ब्रह्मैक्यस्य, चैतन्यविलीनत्वस्य च त्रैविध्यं वहति, यत्र साधकः शिवस्वरूपत्वं प्राप्य भवबन्धनात् नितरामेव विमुच्यते इति शिवम्।

*

## सन्दर्भा


1. शब्दकल्पद्रुमः 2. सिद्धसिद्धान्तपद्धतिः (सि.सि.प.) – 5
3. बृहदारण्यकोपनिषद् (श.भा.) – 11518
4. शङ्खमुद्राधारणं च केशरोमप्रधारणम्। अमरीपानममलं तथा मर्दनमुत्कटम्।। एकान्तवासो दीक्षा च सन्ध्या जपममायया। ज्ञानमह्वाय मूर्तेस्तु तत्पूजा च यथाविधि।। शङ्खाध्यातं शृङ्गिनादं कौपीनं पादुके तथा। अङ्गवस्त्रं बहिर्वस्त्रं कम्बलं छत्रमद्भुतम्।। वेत्रं कमण्डलुं चैव भस्मना च त्रिपुण्ड्रकम्। कुर्यादेतान् प्रयत्नेन गुरुवन्दनपूर्वकम्।।
सिद्धसिद्धान्तपद्धतिः – 5.13,14,15,16।
5. सिद्धसिद्धान्तपद्धतिः – 5.18 6. सिद्धसिद्धान्तपद्धतिः – 5.21
7. तज्ज्ञेयं सद्गुरोर्वक्त्रान् नान्यथा शास्त्रकोटिभिः। न तर्कशब्दविज्ञानान् नाचारा द्वैतपाठनात्।। वेदान्तश्रवणान्नैव तत्त्वमस्यादिबोधनात्। न हंसोच्चारणाज्जीवब्रह्मणोरैक्यभावनात्।। सिद्धसिद्धान्तपद्धतिः – 5.31–32
8. सिद्धसिद्धान्तपद्धतिः – 2.31
9. मूलादिब्रह्मरन्ध्रान्तं षट्चक्रं परिचिन्तयेत्। विद्युत्कोटिसमप्रख्यं सर्वतेजोमयं परम्।।
–शिवमहापुराण 3.47,
षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम्। योगचूडामण्युपनिषद् – 3
10. स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयः। स्वाधिष्ठानाश्रयादस्मान्मेढ्रमेवाभिधीयते।।
गोरक्षसंहिता 1.21
11. (क) पीठत्रयं ततश्चोर्ध्वं निरुक्तं योगचिन्तकैः। तद्बिन्दुनादशक्त्याख्यं भालपद्मे व्यवस्थितम्।।
(ख) यः करोति सदाध्यानमाज्ञापद्मस्य गोपितम्। पूर्वजन्मकृतं कर्म विनश्येदविरोधतः।।
शिवसंहिता – 4.147, 148
12. सि.सि.प. 2.31 13. सि.सि.प. 2.32
14. अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः। दयार्जवमित्याहारः शौचं चैव यमा दश।।
– विवेकमार्तण्डः
15. ह.यो.प्र. 1.2 16. गीता, 2.58
17. गीता, 6.29


*

# मीमांसादर्शनानुसारम् अपूर्वतत्त्वम् : एकं संक्षिप्तं विश्लेषणम्

**डॉ. सुप्रिय रायः**
**डॉ. सोमनाथ दासः च**

**शोधसारांशः**

भरतीयदर्शनेषु मीमांसादर्शनस्य महत्त्वपूर्णं स्थानं वर्तते। विषयबाहुल्यदृष्ट्या विषयगाम्भीर्यदृष्ट्या च अस्य दर्शनस्य प्रशस्तिः नितरां विद्यते। वैदिककर्मकाण्डरूपेण, वाक्यशास्त्ररूपेण च नैकासां समस्यानां समाधानाय इदं शास्त्रं न केवलं दार्शनिकसाहित्याय अपितु व्याकरणधर्मशास्त्रादीनाम् अध्ययनाय अपि अत्यन्तमेवोपादेयं वर्तते। कुमारिल-वचनानुरोधेन विचारप्रधानस्यास्य शास्त्रस्य विचारशास्त्रमित्यभिधानं सर्वत्रैव शास्त्रे कृतं वर्तते। विचारोपायभूतं न्यायनिबन्धनं मीमांसाशास्त्रम्। पदवाक्यप्रणाणशास्त्रेषु च इदं शास्त्रं वाक्यशास्त्रस्य रूपेणापि शोभते। धर्मार्थकाममोक्षेषु परमपुरुषार्थः मोक्षः। प्राचीनाः मीमांसकाः स्वीकुर्वन्ति स्वर्गः एव परमपुरुषार्थः। प्राचीनमीमांसादर्शने जीवस्य बन्धनमुक्त्योः उल्लेखो नास्ति। किन्तु नव्यमीमांसकाः जीवस्य बन्धनं मुक्तिं च अङ्गीकुर्वन्ति। वेदविहितेन यागयज्ञादिना स्वर्गलाभः सम्भवति। निष्कामो भूत्वा यागयज्ञादयः अनुष्ठीयन्ते चेत् मोक्षोऽवश्यं भवति। अस्मिन् दर्शने मोक्षावस्था नाम सुखदुःखादीनाम् अवचेतनावस्था उच्यते। उत्तरमीमांसकानां मते आत्मा नित्य–शुद्ध-मुक्तस्वभावः भवति। अविद्याकारणात् आत्मस्वरूपम् अज्ञात्वा जीवः स्वं कर्तारं भोक्तारं च मन्यते। एवञ्च अनित्ये संसारे सुखं दुःखं च प्राप्नोति।

**मुख्यशब्दाः**

मीमांसा, अपवर्गः, पुरुषार्थः, स्वर्गप्राप्तिः, नित्यकर्म, यज्ञकर्म, धर्मः, अर्थः।

**प्रस्तावना**

वैदिककालात् परिदृश्यते यत् तत्त्वानुसन्धानार्था प्रबला इच्छा मनुष्येषु वर्तते। आहारनिद्रादिकर्मसु उत्कृष्टाः जीवाः, जगत् आत्मा सृष्टिः जन्म मृत्युः चेत्यादीनां तत्त्वानां

रहस्योन्मोचनाय प्रवृत्ताः मनुष्याः। एतत्तत्त्वानुसन्धानमेव दर्शनशास्त्रस्य मुख्यं कार्यम्। दर्शनशास्त्रं नाम विचारशास्त्रम्। विचारेण वस्तुसिद्धिरेव बुद्धिमतः परिचयः। कर्मणः अनुसारं फलभागः एव कर्मवादस्य मुख्यः सिद्धान्तः। एवमुच्यते यत्– 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति। शुभं वा अशुभं वा भवतु, कर्मानुसारि फलं जीवः प्राप्नोति। भारतीयदर्शने चार्वाकं विहाय प्रायः अन्ये सर्वे कर्मवादं स्वीकुर्वन्ति। कामक्रोधादिजन्यं पुण्यं पापं वा कर्म संसारहेतुः भवति। यथा कर्म तथा भोक्तव्यम्। उच्यते यत् 'साधुकारी साधुर्भवति, पापकारी पापी भवति, पुण्यः पुण्येन कर्मणा पापः पापेन'[1] इति। अस्मिन् लोके जनाः यत्कर्म कुर्वन्ति तत्कर्मणा लोकान्तरे गते अपि संस्कारात् पुनः कर्मानुष्ठानार्थं इहलोकम् आगच्छन्ति। कर्मफलभोगार्थमेव जीवस्य देहात् देहान्तरं प्रति गमनम्। कर्मफलभोगार्थं जीवस्य पुनर्जन्म भवति। भारतीयदर्शने एतदेव जन्मान्तरवादनाम्ना प्रसिद्धम्। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उच्यते यत् –

**बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।**
**तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥**[2]

धर्मार्थकाममोक्षेषु परमपुरुषार्थः मोक्षः। मीमांसादर्शने विचार्यविषयः तावत् धर्मः इति। मीमांसादर्शनस्य प्रणेता आचार्यः जैमिनिः द्वादशलक्षणीग्रन्थस्य प्रारम्भे सूत्रं प्रणिनाय '**अथातो धर्मजिज्ञासा**'[3] इति। तस्मात् मीमांसादर्शनानुसारेण कः नाम धर्मः इति ज्ञातव्यम्। धर्मविषये मीमांसासूत्रं हि '**चोदनालक्षणोऽर्थो धर्मः**'[4] इति। यद्यपि चोदनापदस्य अर्थः प्रेरकत्वम्, तथापि अत्र चोदनापदस्य अर्थः विधिरूपः वेदः। तस्मात् वेदे यत् कर्तव्यत्वेन प्रतिपाद्यते स एव धर्मः इति ज्ञातव्यम्। अर्थसंग्रहकारस्य लौगाक्षिभास्करस्य मते यागादिरेव धर्मः। धर्मस्य लक्षणं हि वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः इति वेदेन प्रतिपाद्यते यः विषयः, यश्च प्रयोजनवान् (अर्थवान्) भवति स धर्मः। तथाहि भोजनं यद्यपि प्रयोजनवत् तथापि तत् स्वाभाविकं, न तु वेदप्रतिपाद्यं तस्मात् भोजनं न धर्मः। श्येनादियागः वेदेन प्रतिपाद्यते चेत् अपि न धर्मः, यतो हि तत्र अर्थवत्त्वं नास्ति, अनर्थवत्त्वम् एव अस्ति – '**धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत्।**'[5] स्वाध्यायोऽध्येतव्यः इति वेदवाक्येन प्रत्यहं वेदपाठः कर्तव्यत्वेन विधीयते, अत्र अर्थवत्त्वम् अपि विद्यते इति कारणात् स्वाध्यायः धर्मः इति ज्ञातव्यम्। यजेत स्वर्गकामः इति वेदवाक्येन विधीयते यत् यः स्वर्गम् इच्छति सः यागं कुर्यात् इति। अत्र वेदप्रतिपाद्यत्वम् अस्ति, अर्थवत्त्वम् अपि अस्ति इति कारणात् अयं धर्मः। प्राचीनाः मीमांसकाः स्वीकुर्वन्ति यत् स्वर्गः एव परमपुरुषार्थः। प्राचीनमीमांसादर्शने जीवस्य बन्धनमुक्त्योः उल्लेखो नास्ति। किन्तु

नव्यमीमांसकाः जीवस्य बन्धनं मुक्तिं च अङ्गीकुर्वन्ति। वेदविहितेन यागयज्ञादिना स्वर्गलाभः सम्भवति – '**स स्वर्गः स्यात् सर्व्वान् प्रत्यविशिष्टत्वात्।**'[6] निष्कामो भूत्वा अनुष्ठीयन्ते चेत् मोक्षोऽवश्यं भवति। अस्मिन् दर्शने मोक्षावस्था नाम सुखदुःखादीनाम् अवचेतनावस्था उच्यते। उत्तरमीमांसकानां मते आत्मा नित्य–शुद्ध–मुक्तस्वभावः भवति। अविद्याकारणात् आत्मस्वरूपम् अज्ञात्वा जीवः स्वं कर्तारं भोक्तारं च मन्यते। एवञ्च अनित्ये संसारे सुखं दुःखं च प्राप्नोति। अविद्या अर्थात् अज्ञानमेव बन्धनं प्रति कारणम्। ज्ञानेन अविद्यानाशः यदा सम्भवति तदा जीवः स्वस्वरूपं जानाति। स्वस्वरूपज्ञानलाभ एव अद्वैतमते मुक्तिः। अद्वैतब्रह्मज्ञानमेव मुक्तेः साधनम्। उच्यते यत्– 'ज्ञानादेव कैवल्यं न चान्यथा' इति।

मीमांसकाः नित्यम् आत्मानं विश्वसन्ति। तेषां मते देहान्ते आत्मा स्वर्गं गच्छति यज्ञफलं च गृह्णाति। एषः नित्यः आत्मा देहबुद्ध्यादिभ्यः भिन्नः। कुमारिलभट्टस्य मते आत्मा न ज्ञानस्वरूपः, यतो हि ज्ञानम् अनित्यम्, आत्मा नित्यः। तस्मात् कुमारिलभट्टः अद्वैतवेदान्तमतं खण्डयित्वा देहादिभ्यः आत्मनः भिन्नत्वं प्रतिपादयति। शबरमुनिः बौद्धमतं खण्डयित्वा आत्मनः स्थायित्वम् अङ्गीकरोति। प्राभाकरमते आत्मा सर्वव्यापी नित्यः कर्ता भोक्ता बुद्धीन्द्रियेभ्यः च भिन्नः। तस्य मते आत्मा न स्वप्रकाशः, न एकः, प्रत्येकं देहभेदेन आत्मानः बहवः भवन्ति।

मीमांसकानां यज्ञकर्मणि विश्वासः आसीत्। तेषां सकाशे ईश्वरः गौणः भवति। यद्यपि मीमांसासूत्रे ईश्वरोल्लेखोऽस्ति तथापि सर्वज्ञस्य सर्वेश्वरस्य कारुण्यवतः च ईश्वरस्य अनुल्लेखात् ईश्वरः गौणः भवति। देवता ईश्वरो वा प्रतीकमात्रं भवति। ईश्वरः न फलदाता। कुमारिलभट्टः प्राभाकरः च मन्यते यत् यज्ञः एव फलदाता। अतः देवतास्वीकारस्य ईश्वराङ्गीकारस्य च प्रयोजनं नास्ति। वेदस्य नित्यत्वात् वेदस्य प्रणेता ईश्वरः न भवति इति तेषां मतम्।

जैमिनिः मीमांसासूत्रे शबरभाष्ये च मोक्षस्योल्लेखो नास्ति। अत्र स्वर्गलाभस्य उपायः वर्णितोऽस्ति। किन्तु कुमारिलभट्टाः प्रभाकराः चेत्याद्याचार्याः अन्यैः दर्शनैः प्रभाविताः सन्तः परमपुरुषार्थत्वेन मोक्षं स्वीकृतवन्तः। तेषां मते शरीरात्मनोः सम्बन्धः एव जन्म, तयोः विच्छेदः मृत्युः। दुःखस्यात्यन्तिकनिवृत्तिः मोक्षः। निष्कामकर्मणा चित्तशुद्धिः भवति, शुद्धचित्तसम्पन्नः जीवः मोक्षे अधिकारी भवति। मोक्षः भवति आनन्दस्वरूपावस्था। किन्तु प्रभाकरमते आत्मनः निर्गुणत्वात् आनन्दानुभवः कदापि न सम्भवति।

मीमांसादर्शने अपूर्वं काम्यकर्मजन्यशक्तिरूपम्। अपूर्वविषये मीमांसासूत्रं हि '**चोदना पुनरारम्भः**'[7] मीमांसादर्शनानुसारं स्वर्गकामी जनः अग्निहोत्रादिना कर्मणा स्वर्गं लभते।

किन्तु कार्यकारणसिद्धान्तानुसारं यथा कार्योत्पत्तेः अव्यवहितं पूर्वं कारणं तिष्ठति तथैव कारणात् अव्यवहितात् परमेव कार्योत्पत्तिः भवति। यदि स्वर्गलाभः कार्यं भवति, पुनश्च यज्ञादिकर्म कारणं भवति तर्हि कार्यकारणसिद्धान्तोऽयं असमीचीनः भाति। कारणं हि यज्ञस्य अव्यवहितपरं स्वर्गलाभः न भवति। अस्मात् कारणात् स्वर्गलाभयज्ञकर्मणोः अपूर्वत्वं मीमांसकाः स्वीकृतवन्तः। तम् अपूर्वं यज्ञम् आचरतः जनस्य आत्मनि संस्काररूपेण तिष्ठति, एवं च यथासमयं फलं प्रददाति।

मीमांसकानाम् एकः मूलभूतः सिद्धान्तोऽस्ति– **'आम्नायस्य क्रियार्थत्वादानर्थक्य-मतदर्थानां तस्मादनित्यमुच्यते'**[8] अर्थात् वेदस्य तात्पर्यं भवति क्रिया 'आम्नायस्य क्रित्वार्थत्वात्', अत्र क्रिया यज्ञकर्म इत्यर्थः। मीमांसकानां मते यज्ञकर्म यज्ञफलस्य एकमात्रं कारणम्। यज्ञफलं वैदिकनिर्देशा यज्ञानुष्ठानं कर्तुं इच्छा। यथा वेदेषु उक्तम्– 'अग्निहोत्रं जुहुयात् स्वर्गकामः' – अर्थात् 'स्वर्गार्थं अग्निहोत्रं कुरु' इत्यादि। महर्षिः बादरायणः स्वस्य ब्रह्मसूत्रग्रन्थे जैमिनिमतस्य उल्लेखं कृत्वा कथयति– **'धर्मं जैमिनिरत एव'**[9] अर्थात् आचार्यः जैमिनिः धर्मः अर्थात् अनुष्ठानम् फलदाता इति कथयति।

प्राचीनमीमांसादर्शने स्वर्गलाभ एव परमपुरुषार्थः इति उक्तम्। परन्तु परवर्तिनि काले मीमांसकाः मोक्षम् एवं परमपुरुषार्थत्वेन स्वीकुर्वन्ति शरीरादिभिः सह जीवस्य सम्बन्धः एवं च बन्धनम्। यदा शरीरादिभिः सह जीवस्य सम्बन्धनाशः भवति तदा मोक्षं यावत् शरीरं तिष्ठति तावत् सुखदुःखभोगः सम्भवति। प्रभाकरमते मोक्षे जीवस्य सर्वप्रकाराणां दुःखानाम् आत्यन्तिकतया विनाशः भवति। कुमारिलभट्टमते काम्यनिषिद्धकर्मणोः परित्यागेन नित्यनैमित्तिककर्मानुष्ठानेन सुखदुःखभोगेन यस्य सर्वं पापं क्षीणं स शमदमादिपालनेन वेदान्तादिभिः प्रदर्शितोपायेन आत्मतत्त्वविचारेण मोक्षं प्राप्नोति। मोक्षः नाम न केवलं दुःखाभावः अपि तु आनन्दस्य अभिव्यक्तिः। मोक्षे शरीरस्य विनाशः भवति, तेन जीवस्य पुनर्जन्म न भवति। सर्वाणि हि भारतीयदर्शनानि पुरुषार्थम् आश्रित्य प्रवर्तन्ते। मीमांसादर्शनम् अपि पुरुषार्थम् एव आश्रित्य प्रवर्तते। प्राचीनमीमांसादर्शने स्वर्गलाभः एव मोक्षः परन्तु आधुनिकानां मीमांसकानां मते जीवस्य शरीरसम्बन्धनाशः एव मोक्षः, स एव परमपुरुषार्थः। मोक्षे सति जीवस्य आत्यन्तिकतया सर्वप्रकाराणां दुःखानां विनाशः भवति।

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यम्। यतः मोक्षस्य प्राप्त्यनन्तरं न पुनः दुःखादीनां भोगः भवति। तादृशमोक्षतत्त्वस्य पुरुषार्थश्रेष्ठस्य प्राप्त्यर्थं सर्वे दार्शनिकाः स्वतः प्रयत्नशीलाः भवन्ति। अर्थात् समेषां दार्शनिकानां मुख्यं लक्ष्यं भवति मोक्षः। तत्र दुःखानाम् आत्यन्तिकी निवृत्तिर्मोक्षः इत्यत्र नास्ति दार्शनिकानां विप्रतिपत्तिः। परन्तु स च मोक्षः कथं भवति इत्यत्र अस्ति दार्शनिकानां वैमत्यम्।

तत्र न्यायमते आत्यन्तिकदुःखनिवृत्तिरूपः यो हि मोक्षः स च प्रमाणादिषोडश-पदार्थतत्त्वज्ञानेन सम्भवति। एवञ्च षोडशपदार्थतज्ञानेन मिथ्याज्ञानस्य निवृत्तिर्भवति। यतः दुःखमयसंसारस्य मूलकारणं मिथ्याज्ञानं भवति। मिथ्याज्ञाननाशे सति दोषाणां नाशः दोषनाशे सति प्रवृत्तेः नाशः, प्रवृत्तिनाशे सति एकविंशत्यात्मकदुःखानां नाशः, तादृशानाम् एकविंशत्यात्मकदुःखानामात्यन्तिकनिवृत्तिरेव मोक्ष इति न्यायसिद्धान्तः। तथाचोक्तं सूत्रकारेण– '**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः**' इति। तत्र मोक्षविषये अन्येषां बौद्धादीनाम् अवैदिकदार्शनिकानां सांख्यादिवैदिकदार्शनिकानां यन्मतं विद्यते तत्सर्वमत्र सम्यग् विविच्य न्यायसिद्धान्तानुमतं यन्मतं विद्यते तस्य चर्चा अत्र करिष्यते। अपवर्गः निश्श्रेयसं मोक्षः इति पर्यायपदानि। अपवर्गश्च दुःखानाम् आत्यन्तिकी निवृत्तिरेव। दुःखमयसंसारस्य मूलं मिथ्याज्ञानम्। अपवर्गस्य कारणं तत्त्वज्ञानम्। मिथ्याज्ञानरूपबीजात् क्रमेण दुःखमयः संसारवृक्षः निष्पद्यते। तत्त्वज्ञानात् क्रमेण संसारनिवृत्तिरूपः अपवर्गः सम्पद्यते।

मीमांसकाः अपूर्ववादस्य अवधारणा अपूर्वकल्पना अस्ति। कर्मणा फलैः च सह 'अपूर्वस्य' सम्बन्धः कर्मणः तत्फलस्य च सर्वेषु प्रतिनिधिषु केनचित् प्रकारेण वा अन्येन वा स्वीकृतः अस्ति, यत् वास्तविकम् अस्ति। प्रभावः अस्ति यत् यदा कश्चन जनः कर्म करोति तदा तस्य परिणामः अनिवार्यः भवति। किन्तु कर्मफलप्रदः कः इति जिज्ञासा स्वाभाविकी। यदा सामान्यजनाः वदन्ति यत् भाग्यं कर्मफलदातृत्वेन गणयितुं शक्यते, परन्तु वेदान्ते केवलम् ईश्वरः एव दाता इति मन्तव्यम्। मीमांसकस्य मते यावत् अदृश्यं परिणामं न जनयति तावत् किमपि कर्म फलं दातुं न शक्नोति। एतदेव 'अपूर्व' इति संज्ञया संज्ञितम् अस्ति। जैमिनी अपूर्वतत्त्वम् एकां शक्तिं स्वीकरोति, स्वर्गस्य कालान्तरभावित्वात्।

यागस्य क्षणिकत्वात् कथं कालान्तरभाविस्वर्गादिसाधनसमर्थो भवेत् यागः? कुतः– यागः क्रियारूपः क्रिया च क्षणिका, तृतीयक्षणे नश्यति। तथा च कथं अविद्यमानः त्यागः कालान्तरभावि फलं प्रति साधनं (कारणम्) भवेत्? कार्यकारणयोः सामानाधिकरण्यं लोके दृष्टम्। यस्मिन् देशे काले च दण्डचक्रकुन्तलादिरूपं समस्तं कारणं तत्रैव घटादिकार्यमिति लोके दृष्टमिति प्रकृते कथं निर्वाहः भवेदिति चेत् तन्निर्वाहार्थमेव 'अपूर्वं' कल्प्यते। तच्चापूर्वं फलबलात्कल्प्यते। तत्र श्रुतार्थापत्तिरेव प्रमाणम्। वेदवाक्येन 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिना यागस्वर्गादिफलयोः साध्यसाधनभावः विहितः। यागस्तु क्षणिक इति श्रुतसाध्यसाधनभावान्यथाऽनुपपत्त्या अर्थापत्त्या अपूर्वं कल्प्यते। फलबलात्कल्प्यत

इति कृत्वा यत्र स्वर्गादिफलं तत्रैवापूर्वमिति परमापूर्वं यजमानात्मन्येव कल्प्यते। तानि च अपूर्वाणि अनेकविधानि। अङ्गपूर्वाणि उत्पत्त्यपूर्वाणि समुदायापूर्वाणि परमापूर्वमथवा फलापूर्वमिति भिन्नानि परमापूर्वं परं सर्वत्र फलाव्यवहितपूर्वत्वात् यजमानात्मन्येव। अन्यानि तु ब्रीह्यादिद्रव्याश्रितत्वेन क्वचित् गुणाश्रितत्वेन इति यथायथं कल्प्यन्ते। तच्च फलपर्यन्तं तिष्ठति। सन्निपत्योपकारकाङ्गानां तु उत्पत्त्यपूर्वजनने उपयोगः। एवञ्च यागावान्तरव्यापारत्वेन अङ्गीकारात् यागः स्वजन्यापूर्वद्वारा कालान्तरभावि फलं प्रति कारणं भवतीति फलभावनायां यागस्य करणत्वेनान्वये न किञ्चिद्बाधकम्।

*

## सन्दर्भा


1. ब्रह्मवैवर्तपुराणम्, 1.44.74
2. श्रीमद्भगवद्गीता, 4.5
3. मीमांसादर्शनम्, 1.1.1
4. मीमांसादर्शनम्, 1.1.2
5. मीमांसादर्शनम्, 2.2.9
6. मीमांसादर्शनम्, 4.3.15
7. मीमांसादर्शनम्, 2.2.5
8. मीमांसादर्शनम्, 1.2.1
9. ब्रह्मसूत्रम्, 3.2.40
10. मीमांसादर्शनम्, 2.2.6


*

# महर्षिपाणिनेः तन्त्रस्य समन्वयवादिनी दृष्टिः

**कु. दामिनी राय**

**शोधसारः –**

पाणिनेराचार्यस्य व्याकरणग्रन्थे अष्टाध्याय्यां तस्य समन्वयवादिनी दृष्टिः सुस्पष्टं परिलक्षिता भवति। यत्र कुत्रापि आचार्यस्य पुरस्ताद् अनेकमतानि आयान्ति तत्र तत्राचार्यपाणिनिः प्रायेण सर्वाण्यपि मतमतान्तराणि याथातथ्यम् उपवर्ण्य समन्वयं स्थापयति। कृत्रिमाकृत्रिमसंज्ञाप्रसङ्गे, पदार्थनिर्धारणप्रसङ्गे, व्यत्पन्नाव्युत्पन्नप्रसङ्गे, धातूनामर्थनिर्धारणप्रसङ्गे प्रयोगेषु वैकल्पिकव्यवस्थाप्रसङ्गे चेत्यादिस्थलेषु पाणिनेराचार्यस्य समन्वयवादिनी दृष्टिः साक्षादेव दृष्टिपथमायाति।

**कूटशब्दाः –**

समन्वयवादिनी, समन्वयः, शास्त्रादिनिर्माणप्रसङ्गः, अर्थावबोधप्रसङ्गः, जातिपदार्थः, व्यक्तिपदार्थः, कृत्रिमाकृत्रिमसंज्ञाप्रसङ्गे, उभयगतिः, व्युत्पन्नाव्युत्पन्नयोः।

**प्रस्तावना –**

जगतः नियमनं पालनं सञ्चालनादिकं सर्वमपि समन्वयेनैव भवति। नित्यः शुद्धः ईश्वरः अनित्यप्रकृत्या तथा जीवेन सह समन्वयं समुपस्थाप्य सुन्दरं जगद् बिभर्ति। एषः नित्यानित्ययोः समन्वयः प्रतिक्षणं जायमानः वर्तते। जगति सूर्याचन्द्रमसोः, अहोरात्रस्य सुखदुःखयोः, दीक्षातपसोः, श्रद्धामेधयोः, आचार्यान्तेवासिनोः, दम्पत्योः, माता–पुत्रयोः इत्येद्विधः समन्वयः सर्वदा भवति। एतस्मादेव एषा सृष्टिः सरसा शोभना च प्रतिभाति। सर्वे प्राणिनः स्वस्वावश्यकतानुसारं वस्तुनः प्रयोगं कुर्वन्तः आनन्दीभवन्ति तथा स्वध्येयं प्रति अग्रेसरन्ति। एतैः अनित्यसाधनैः सह समन्वयं कृत्वा जीवः नित्यं साध्यम् आप्नोति। शास्त्रादिनिर्माणप्रसङ्गेऽपि एतादृशी समन्वयस्य स्थितिः आचार्याणाम् ऋषीणां च समक्षम् आयाति। तत्रापि वैयाकरणेषु अन्यतमस्य महर्षिपाणिनेः समन्वयवादिनी दृष्टिः कियती श्लाघनीया वर्तते इति सर्वैः विपश्चिद्भिः सुज्ञातमेव। एतस्याः एव पाणिनेराचार्यस्य समन्वयवादितायाः विषयः सविस्तरम् अग्रे विमृश्यते।

**विषयोपस्थापनं तत्समीक्षणं च**

आचार्याः ऋषयः तत्त्वविदः एतेऽपि लोके समान्यमनुष्यवत् तिष्ठन्ति। अतः किमपि शास्त्रनिर्माणं लोकं विहाय कर्तुं न प्रभवन्ति। ते आचार्याः लौकिकमलौकिकं सर्वं निरीक्ष्य सामञ्जस्यं कृत्वैव शास्त्रं कुर्वन्ति। शब्दतत्त्वविदः आचार्यस्य समन्वयवादिता भूयो भूय उपलभ्यते। यथा महाभाष्यकारपतञ्जलिमुनिः कथयति– '**सर्ववेदपारिषदं हीद शास्त्रं, तत्र नैकः पन्थाः शक्यः आस्थातुम्।**'[1] आचार्यः सूक्ष्मक्षिकया सर्वेषु प्रदेशेषु एकपक्षीयमतानि परित्यज्य समन्वयवादम् अवलम्ब्य शास्त्रस्य अन्वाख्यानं कृतवान् इति परिलक्ष्यते। आचार्यस्य समन्वयवादितायाः एव वैशिष्ट्यं वर्तते यद् व्याकरणं प्रकृति–प्रत्ययं विभजत्यपि सन्धिं शिक्षयति, द्वन्द्वेऽपि (विवादे) समाहारम् (एकता) शिक्षयति, समासवृत्तौ व्यपेक्षाभावेन सह एकार्थीभावम् एकलक्ष्यताम् एकोद्देश्यतां च शिक्षयति, तद्धितवृत्तौ '**समार्थानां प्रथमाद्वा**'[2] सूत्रे 'वा' इति पदं पठित्वा तद्धितप्रयोगविषये भाषागतं स्वातन्त्र्यं निरूपयति।

**उदाहरणद्वारा समन्वयस्य पुष्टिः**

माहेश्वरसूत्रस्य आदौ एवं समन्वयः परिलक्ष्यते। 'अथ शब्दानुशासनम्' अस्मिन् सूत्रे केषां शब्दानामनुशासनम्? तर्हि लौकिकानां वैदिकानाञ्च, एवमुक्त्वा आचार्यपतञ्जलिः उभयविधशब्दस्य समन्वयं ज्ञापयति। साधुशब्दैः अर्थबोधः अथवा असाधुशब्दैः? अर्थबोधप्रसङ्गोऽपि महाभाष्ये चर्चितः वर्तते। तत्र गौः इत्युच्चारणेन एव सास्नादिमत्त्वस्य ग्रहणं भवति उत गावी, गोणी,गोता किमपि वदेम चेदपि गोपदार्थस्य ग्रहणं भविष्यति? अत्र नैयायिकाः साधुशब्दैः एव अर्थबोधं स्वीकुर्वन्ति तथा च गोण्यादिस्थलेषु साधुशब्दस्य स्मरणद्वारा गोणीशब्देन अर्थबोधस्य सामर्थ्यं जायते। यथा प्रदीपे कैय्यटाचार्यः वदति– 'यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययन्ति। केचिच्चापभ्रंशाः परम्परया निरूढिमागताः साधुशब्दानस्मारयन्त एवार्थं प्रत्याययन्ति।' इत्थमेव मीमांसकाः अपि स्वीकुर्वन्ति। परञ्च आचार्यपाणिनिः 'साध्वसाधुभिः उभयविधशब्दैः अर्थबोधकता जायते' इति स्वीकुर्वन् समन्वयात्मिकां दृष्टिं स्थापयति तथा च साधुशब्दानां प्रयोगे धर्मस्य आधिक्यं सूचयति। अर्थाद् ये साधु–असाधुशब्देषु साधुशब्दं प्रयुञ्जते ते अभ्युदयेन युञ्जते। एवमुक्त्वा साधुशब्दप्रयोगार्थम् अभिप्रेरयत्याचार्यः। असाधुशब्देन अर्थबोधस्तु जायते किन्तु अभ्युदयो न भवतीति भेदः। कौण्डभट्टाचार्येणोक्तम्– '**वाचकत्वाविशेषेऽपि नियमः पापपुण्ययोः।**'[3] अर्थात् पापस्य कारणम् अपशब्दोऽस्ति। एतस्यायम् आशयः साधुशब्दस्य प्रयोगे प्रवृत्तिः स्यादिति।

**जातिपदार्थः उत व्यक्तिपदार्थः ?**

एषः पक्षोऽपि विवादास्पदः वर्तते। नैयायिकाः आचार्याः व्यक्तिपदार्थं स्वीकुर्वन्ति, मीमांसकाः आचार्याः जातिपदार्थम्। तथा च ये व्याकरणाचार्याः तेषामपि अस्मिन् विषये ऐकमत्यं नास्ति। तत्र व्याडिः आचार्यः द्रव्यपदार्थं स्वीकरोति, '**द्रव्याभिधानं व्याडिः**'[4] तथा वाजप्यायनः आचार्यः आकृतिपदार्थं स्वीकरोति, 'आकृत्यभिधानाद्वा एकं विभक्तौ वाजप्यायनः।' अत्रापि आचार्यः मध्यममार्गमनुसरन् उभयविधमतस्य समन्वयं स्वीकृत्य सूत्रं कृतवान्। यथा महाभाष्ये उक्तम्–'उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिपदार्थं मत्वा– 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इत्युच्यते। द्रव्यं पदार्थं मत्वा 'सरूपाणामेकशेष एकविभक्तौ' इत्यारभ्यते।'

**कृत्रिमाकृत्रिमसंज्ञाप्रसङ्गे उभयगतिः**

लोके अनुकरणात्मकसंज्ञाः विहाय अपराः संज्ञाः अकृत्रिमाः एव। तत्तत्पदार्थबोधाय लोकव्यवहाराय अन्यव्यावर्तनाय च संज्ञाः क्रियन्ते। येन तया संज्ञया वस्तुविशेषस्य व्यक्तिविशेषस्य च बोधः स्यात्। अतः सौकर्यार्थं संज्ञाभिधानं विहितम्। अतः देशविशेषे एकः पदार्थः पृथक्पृथक्संज्ञया बोध्यते। यथा–गौः, गाय, COW इत्यादिः। एताः संज्ञाः लोके अकृत्रिमवद् दृश्यन्ते अतिप्रसिद्धिकारणेन। इदानीं यदा आचार्यपाणिनिः सूत्रनिर्माणं करोति तदा लोकसंज्ञया पूर्णतया अवगतः वर्तते, यतोहि सोऽपि लौकिकः। तथापि 'एकं द्वे त्रीणि' इति लोकप्रसिद्धसंख्यासु सतीष्वपि 'बहुगणवतुडति संख्या' इति सूत्रेण विशेषशब्दस्य संख्यासंज्ञां कृत्वा लोकविदितायाः संख्यायाः उपेक्षां करोति इति चेन्न, आचार्यः अस्मिन् शास्त्रे उभयगतितां स्वीकरोति। अर्थाद् याः लोकदृष्ट्या कृत्रिमाः संज्ञाः वर्तन्ते तथा च याः लोकविदिताः अकृत्रिमाः संज्ञाः वर्तन्ते, तासामपि समावेशम् आचार्यः करोति। इत्थमेव कर्मणः प्रसङ्गेऽपि 'कर्तुरीप्सिततमं कर्म' (कृत्रिमस्य) 'कर्तरि कर्मव्यतिहारे' (अकृत्रिमस्य) उभयविधकर्मणः ग्रहणं भवति। अधिकरणसंज्ञायामपि तथैव 'आधारोऽधिकरणम्' इत्यत्र कृत्रिमसंज्ञायाः तथा च 'विप्रतिषिद्धं चानधिकरणवाचि' इत्यत्र अकृत्रिमसंज्ञायाः ग्रहणं भवति।

**व्युत्पन्नाव्युत्पन्नयोः प्रातिपदिकयोः समन्वयः**

केचन शब्दाः यौगिकाः, केचन रूढिशब्दाः योगरूढाः इत्यत्रापि आचार्याणां मतैक्यं न दृश्यते। शाकटायनाचार्यः यौगिकपक्षं स्वीकरोति यथा 'सर्वाणि नामानि आख्याताजानि इति शाकटायनः नैरुक्तसमयश्च।' अर्थात् निरुक्तकारस्य तथा शाकटायनाचार्यस्य मते सर्वाणि नामानि प्रातिपदिकानि आख्यातजानि वर्तन्ते परञ्च गार्ग्याचार्यस्य मते तथा च

वैयाकरणानां मते सर्वाणि प्रातिपादिकानि आख्यातजानि न विद्यन्ते। यथा निरुक्ते 'न सर्वाणि इति गार्ग्यः। वैयाकरणानां चैके।' अर्थात् पाणिनिप्रभृतयः आचार्याः उभयपक्षम् 'आख्यातजानि व्युत्पन्नानि' एवम् 'अव्युत्पन्नानि प्रातिपदिकानि' इत्युभयपक्षं स्वीकुर्वन्ति। अत एव 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति परिभाषा क्रियते। तथा च महाभाष्यकारः आचार्यपतञ्जलिः 'उणादयो बहुलम्' सूत्रे कथयति–

**बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम्।**
**कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु॥**
**संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।**
**कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु॥**

इत्थम् उणादिशास्त्रे ये शब्दाः सन्ति ते अव्युत्पन्नाः यथा कथञ्चित् व्युत्पाद्याः सन्ति। तदर्थम् आचार्येण बाहुलकस्य विधानं क्रियते। बाहुलकस्य लक्षणं यथा–

**क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**[5]

वस्तुतः बाहुलकशास्त्रं वैयाकरणानां अगतिकगतिमत्त्वमेव, परञ्च सर्वविधशब्दानां समावेशार्थं साहाय्यं करोति तथा सर्वत्र समन्वयं स्थापयति, येन मार्गः सुकरः भवति। '**पृषोदरादीनि यथोपदिष्टम्**'[6] तथा च निपातनविधायकानि सूत्राण्यपि एतादृशानि सन्ति।

**प्रयोगदृष्ट्या समन्वयः**

प्रयोगद्वैतदृष्ट्या समन्वयं पश्यामः चेद् वैकल्पिकानि यानि उदाहरणानि सन्ति तेषां सर्वेषां समावेशः अत्र भवति। विभाषाशास्त्रं साक्षाद् एव प्रमाणं वर्तते समन्वयस्य। यत्र कुत्रापि आचार्यः नियमनप्रसङ्गे विभाषा, वा, अन्यतरस्याम् आदिशब्दानां प्रयोगं करोति तत्रैव अन्यस्य समावेशः जायते। यथा– '**अचो रहाभ्यां द्वे**'[7] अनेन यरो वा द्वे भवतः अर्थात् 'अर्क्कः, अर्कः। आर्य्यः, आर्यः। सूर्य्यः, सूर्यः। ब्रह्म्मा, ब्रह्मा। अपह्न्नुते, अपह्नुते। उभयमपि प्रयोक्तुं शक्नुमः। सम्प्रत्यपि बङ्गप्रान्तीयग्रन्थेषु द्वित्वस्य प्रयोगः दरीदृश्यते, तथा उत्तरभारते प्रायः द्वित्वस्यास्य अभावः एव। एवमेव महाभाष्यकारः महर्षिपतञ्जलिः निर्दिशति– 'एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दाः तत्र तत्र नियतविषयाः दृश्यन्ते।' तद्यथा– 'शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।' एवं विभिन्नप्रान्ते यत् प्रयोगवैभिन्यं जायते तत् स्वाभाविकमेव।

भाषायाः प्रकृतिरेव एषा परिवर्तनशीलता। एतत् सर्वमपि प्रसङ्गं मनसि निधाय एव आचार्यपाणिनिः धातुपाठं रचितवान्। तथा चैकार्थवाचिनाम् अनेकधातूनां परिगणनम्, अनेकार्थवाचकस्य चैकधातोः निर्देशं कृतवान्। यथा– एकार्थवाचिनः अनेकधातवः– उख, उखि, वख, वखि, मख, मखि, णख, णखि, रख, रखि,लख, लखि, इख, इखि, ईखि, वल्गु, रगि, लगि, अगि, वगि, मगि, तगि, त्वगि, श्रगि, श्लगि, इगि, रिगि, लिगि, गत्यर्थाः।। (भ्वादिर्गणः) अनेकार्थानां कृते एकधातुः– 'अव' रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गन-हिंसादानभागवृद्धिषु। एवम् एकस्य धातोः अष्टादश अर्थाः निर्दिष्टाः आचार्येण। इतोऽपि प्रयोगप्रसङ्गे एकम् अन्यद् उदाहरणं पश्यामः– '**उदक् च विपाशः**'[8] विपाशः उत्तरे कूले ये कूपास्तेष्वभिधयेषु अण् प्रत्ययो भवति चातुरार्थकः। दत्तेन निर्वृत्तः = दात्तः कूपः। अर्थाद् विपाशः उदङ्दिशि ये कूपाः तत्र अण्, दक्षिणदिशि च ये कूपाः तत्र अञ् स्यात्। अर्थात् अणञोः केवलं स्वरमात्रस्य भिन्नता अस्ति। अञ् प्रत्यये सति आद्युदात्तः '**ञ्नित्यादिर्नित्यम्**'[9] इति सूत्रेण। अण् प्रत्यये सति प्रत्ययस्वरेण अन्तोदात्तः शब्दः जायते।

**अनेकाचार्याणां समन्वयः, आचार्यान्तराणां मतस्य स्वीकरणम् –**

**1. तृषिमृषिकृशेः काश्यपस्य**[10]

तृषि, मृषि, कृषि इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मते वा न किद् भवति। तृषित्वा, तर्षित्वा। मृषित्वा, मर्षित्वा।

**2. अवङ् स्फोटायनस्य**[11]

अचि परतः गोः स्फोटायनस्याचार्यस्य मतेन अवङ् आदेशो भवति। गवाग्रम्, गोऽग्रः। गवाजिनम्, गोऽजिनम्।

**3. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च**[12]

इकोऽसवर्णेऽचि परतः शाकल्यस्याचार्यस्य मतेन प्रकृत्या भवन्ति, ह्रस्वश्च तस्येकः स्थाने भवति। दधि अत्र, दध्यत्र। मधु अत्र, मध्वत्र।

**4. ई 3 चाक्रवर्णमस्य**[13]

ई3कारः प्लुतोऽपि परतश्चाक्रवर्मणस्याऽऽचार्यस्य मतेन अप्लुतवद् भवति। अस्तु हीत्यब्रवीत्, अस्तु ही3 इत्यब्रवीत्।

**5. वा सुप्यापिशलेः**[14]

सुबन्तावयवे धातावृकारादौ परतः अवर्णान्तादुपसर्गात् पूर्वपरयोरापिशलेराचार्यस्य

मतेन वा वृद्धिरेकादेशो भवति। उपर्षभीयति, उपार्षभीयति। उपल्कारीयति, उपाल्कारीयति।

**6. नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्**[15]

उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति, पूर्वेण प्राप्तः प्रतिषिध्यते, अगार्ग्यकाश्यपगालवानां मतेन। उदात्तोदयः– गार्ग्यस्तत्र, गार्ग्यस्तत्र। स्वरितोदयः– गार्ग्यः क्व।

**7. त्रिप्रभृतिषु शाकटायनस्य**[16]

त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्याचार्यस्य मतेन द्वित्वं न भवति। इन्द्रः। चन्द्रः। राष्ट्रम्।

**8. ओतो गार्ग्यस्य**[17]

ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मतेन अशि परतः। भो अत्र। भगो इदम्।

**9. ऋतो भारद्वाजस्य**[18]

ऋकारान्ताद् धातोः भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटः स्थलि इडागमो न भवति। स्मर्ता– सस्मर्थ। ध्वर्ता– दध्वर्थ।

**उपसंहारः –**

उपर्युक्तदृष्टान्तसिद्धान्तानुसारं सुस्पष्टं जातं यद् आचार्यः पाणिनिः निश्चितरूपेण समन्वयवादी वैयाकरणो वर्तते। कदाचिदस्य आचार्यपाणिनेः समन्वयवादिनी दृष्टिरेव तस्य प्रसिद्धौ महत्त्वपूर्णां भूमिकाम् आवहति। सर्वेषाम् आचार्याणां, मतानां, वादादीनां समन्वयेनैव सर्वेषां सम्माननं, विषयस्य च सर्वविधं साङ्गोपाङ्गज्ञानं भवति। येन सिद्धान्तः भूयोभूयोऽपि सम्पुष्टो भवति।

*

## सन्दर्भाः


1. महाभाष्यम्, 2.1.58
2. अष्टाध्याया, 4.1.82
3. वैयाकरणभूषणसारः, शक्तिनिर्णयः
4. महाभाष्ये सरूपाणाम् सूत्रे

5. मुखनासिकावचनोऽनुनासिकः इति सूत्रे
6. अष्टाध्यायी, 6.3.109
7. अष्टाध्यायी, 8.4.46
8. अष्टाध्यायी, 4.2.74
9. अष्टाध्यायी, 6.1.197
10. अष्टाध्यायी, 1.2.25
11. अष्टाध्यायी, 6.1.123
12. अष्टाध्यायी, 6.1.127
13. अष्टाध्यायी, 6.1.130
14. अष्टाध्यायी, 6.1.92
15. अष्टाध्यायी, 8.4.66
16. अष्टाध्यायी, 8.4.51
17. अष्टाध्यायी, 8.3.20
18. अष्टाध्यायी, 7.2.63

*

## किञ्चिद् रामायणीयम्

**निहतं भ्रातरं रावणं दृष्ट्वा विभीषणस्य विलापः–**

* हे वीरविक्रान्त! विख्यात! प्रवीण! नयकोविद!
  महार्हशयनोपेत! किं भुवि निहतः शेषे?
* दर्पात् प्रहस्तादयः त्वया न बहु अमन्यन्त, तस्याऽयम् उदर्कः।
* (त्वयि गते) सुनीतानां सेतुः गतः, धर्मस्य विग्रहो गतः, सत्त्वस्य संक्षेपः गतः, सुहस्तानां गतिः गता, भूमौ आदित्यः पतितः, चन्द्रमाः तमसि मग्नः, चित्रभानुः प्रशान्तार्चिः, व्यवसायो निरुद्यमः (अभवत्)।

**सम्प्रति निहतः रावणः–**

* धृतप्रवालः, प्रसभाग्र्यपुष्पः, तपोबलः, शौर्यनिबद्धमूलः, महान् राक्षसराजवृक्षः रणे राघवमारुतेन सम्मर्दितः।
* तेजोविषाणः, कुलवंशवंशः, कोपप्रसादापरगात्रहस्तः रावणगन्धहस्ती इक्ष्वाकुसिंहावगृहीतदेहः क्षितौ सुप्तः।
* पराक्रमोत्साहविजृम्भितार्चिर्निश्वासधूमः स्वबलप्रतापः प्रतापवान् राक्षसाग्निः रामपयोधरेण निर्वापितः।
* सिंहर्क्षलाङ्गूलककुद्विषाणः पराभिजित् गन्धनगन्धवाहः चापलकर्णचक्षुः रक्षोवृषः क्षितीश्वरव्याघ्रहतः अवसन्नः।

**रामस्य विभीषणं प्रति आश्वासनवचनम्–**

* अयं (रावणः) समरे चण्डविक्रमः अत्युन्नतमहोत्साहः पतितः।
* संख्ये निहतः क्षत्रियः न शोच्यः।

**रावणनिधनात् परं विभीषणः रामं प्रति–**

* अयं (रावणः) विमर्देषु सुरैः समस्तैः अपि वासवेन अविभग्नपूर्वः भवन्तम् आसाद्य रणे विभग्नः।
* अनेन (रावणेन) वनीपकेषु (याचकेषु) (रत्नानि) दत्तानि, भोगाः भुक्ताः, भृत्याः निभृताः, मित्रेषु धनानि समर्पितानि।
* एषः (रावणः) आहिताग्निः, महातपाः, वेदान्तगः, कर्मसु च अग्र्यशूरः आसीत्।
* सम्प्रति एतस्य यत् प्रेतगतस्य कृत्यं कर्तुम् इच्छामि।

–युद्धकाण्डम् , 109 सर्गः

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा -श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि
18. सोमश्रद्धार्णव - डॉ. गोपबन्धु मिश्रः
1000 रूप्यकाणि